1217.

श्रीः

ॐ

गृह्याग्निसागरः

—कर्ता—

आरडे इत्युपनामक लक्ष्मीधरसूनु नारायणभट्टः

—सम्पादकः—

सां दीक्षितः गोकर्णम्

CSUGCKL
Q2:42y8I 1
16906
Acc.No: 16906

…ञ्चविंशति रूप्यकाणि)

…*istance from the*
MINISTRY OF EDUCATION
GOVERNMENT OF INDIA

Received on 7.4.86 from
Widow SAMBHA DIXIT
CAR STREET, GOKARN
N.K. KARNATAKA.
581326.

CAT NO. 2579.
HOLD ID. 4336.
BOOK NO. 1.
Location. 19-A-2

श्रीः

गृह्याग्निसागरः

Rashtriya Sanskrit Sansthan (Deemed University) Under Ministry of H.R.D., Govt. Of India
GURUVAYOOR CAMPUS
PURANATTUKARA
TR.
KERALA 680 551
LIBRARY

—कर्ता—

आरडे इत्युपनामक लक्ष्मीधरसूनु नारायणभट्टः

Bhatta, Laxshmydharasunu Narayana

—सम्पादकः—

सांबदीक्षितः, गोकर्णम्

With the Financial Assistance from the
MINISTRY OF EDUCATION
GOVERNMENT OF INDIA

॥ गृह्याग्निसागरः ॥

With the Financial Assistance from the
MINISTRY OF EDUCATION
Government Of India

प्रतयः – १०००

शा. श. १९०७

क्रिस्तशक १९८५

श्रीकृष्ण मुद्रणालय, हेगडे-५८१३३०
ता : कुमटा (उत्तर कन्नड)

Q2:42481
KENDRIYA SANSKRIT VIDYAPEETHA
16906
Accession No
10-6-93
GURUVAYOOR

श्रीः

श्री चन्द्रमौलीश्वराय नमः

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य

जगद्गुरु-श्रीशङ्करभगवत्पादाचार्य परंपरागतं

श्री कामकोटि पीठमहासंस्थानम्

कांचीपुरम्

यात्रास्थानं – बरड ता - १२-६-१९८५

"अग्निहोत्रफला वेदाः,, इति श्रीमहाभारते काचन सूक्तिः प्रकाशते। अनया सूक्त्या अग्निहोत्रानुष्ठानपर्यंतं सांग वेदाध्ययनस्य फलं अभिधीयते। वेदविहितं विधिमनुसृत्य उपनयनं, गार्हस्थ्यस्वीकारः, अग्न्युपासनं, अन्वाधानं इत्येव क्रमशः ब्राह्मण धर्माः गृह्यश्रौत सूत्रेषु विधीयन्ते। तेषां धर्माणां प्रत्येकं प्रयोजनानि चाभिधीयन्ते। फलार्थिना ब्राह्मणेन अग्निहोत्रादारभ्य सर्वे यज्ञा अवश्यं अनुष्ठेया भवन्ति। अनुष्ठीयमानानां यज्ञानां सत्स्वपि बहुषु फलेषु दौर्ब्राह्मण्यनिवृत्तिरित्येकं फलं प्रधानं वर्तते। यज्ञानुष्ठानाय अन्या अपि बह्व्यः योग्यताः विद्यन्ते। योग्यता समूहे प्राथम्येन शुद्धिकर्म प्रायश्चित्तं अथवा कृच्छ्राचरणं विधीयते। सपत्नीकस्य गृहस्थस्य यज्ञानुष्ठानयोग्यता, मृदादिस्नानविधिः, पंचगव्यप्राशनं, अग्न्याधानयोग्यकालः, अग्निद्वयसंसर्ग विधिः, विच्छिन्नाग्निपुनःसंधानविधिः, पक्षहोमः, आशौचे होमविधिः, इत्यादिभिः विविधाभिः यज्ञपद्धतिभिः नदनदीतीर्थपूरितः सागर इव पूर्णः 'गृह्याग्निसागरः, इति ग्रन्थः 'आरडे' इत्युपनाम्ना

भट्टनारायणेन विरचितो वेदभाष्य-व्याकरण-विदुषा गोकर्ण वास्तव्येन सांबदीक्षितेन भागार्धेन मुद्रितः पुनरपि यावत् विष-यान्तरैर्मुद्रितो भवतीति श्रुत्वा यज्ञानुष्ठानतत्पराणां याय-जूकानां महोपकाराय भूयादिति शिष्टग्रन्थमुद्रणविषये बद्धश्र-द्धस्य विदुषः प्रयत्नो भूयोऽपि फलोन्मुखो भूयादिति च श्री सांबदीक्षितं शुभाशिषा संयोजयामः ।

क्रोधन ज्येष्ठकृष्ण १०　　　　नारायणस्मृतिः

सम्पादकस्य वक्तव्यम्

उपत्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम् ॥
नमो भरन्त एमसि ॥ ऋग्वेद

अग्निहोत्रं जुहुयात्स्वर्गकामः, इत्यादि वेदवाक्येषु श्रद्धधानाः अस्मत्पूर्वपुरुषाः परंपरया अग्निहोत्रिणः सोमयाजिनश्चासन् । मयाऽपि सांप्रतं स्मार्ताग्निहोत्रं परिचर्यते । तदर्थं तत्र विधीयमानानां कर्मणां कृते जिज्ञासमानेन मया गृहे एव ग्रन्थराशौ 'गृह्याग्निसागरः, इत्याख्यः निबन्धो लब्धः ॥

अस्य प्रकाशनं कर्तव्यमिति मनीषया भारतसर्वकाराः प्रार्थिताः । ते च मुद्रणसाहाय्यधनदाने पुरत आगताः ॥ श्री नीलकण्ठ दीक्षितैः जोगळेकरोपाह्वैः स्वगृहस्थितपुस्तकमपि प्रदत्तम् ॥

हेगडे श्री कृष्णमुद्रणालयस्य गणपति हेगडे महोदयैः सर्वकारीय निबन्धनमनुसृत्य मुद्रणसहकारः प्रदत्तः । श्रीमज्जगद्गुरु कांची-कामकोटि पीठाधीश्वरैः आशीर्वादरूपोऽभिप्रायः प्रदत्तः ।

पुण्यपत्तनस्य टिळक महाराष्ट्र विद्यापीठस्थैः पण्डित चिंतामणि गणेश काशीकर महोदयैः महता परिश्रमेण आमुखं लिखित्वाऽस्मत्परिश्रमः सफलीकृतः । एतेषां केनवा रूपेणानृणी भवामीति न जाने । आस्तिकजनाः पुस्तकं लब्ध्वा कृतिनो भूयासुरिति शिवम् ॥

संपादकः
सांबदीक्षितः
प्राचार्यः श्री मेधादक्षिणामूर्तिवेदभवन
संस्कृत महाविद्यालयः गोकर्णम्
पिन् ५८१३२६

— आमुखम् —

अथायं गृह्याग्निसागरो नाम निबन्ध आश्वलायनशाखीय-स्मार्तकर्मबोधकः आरडे इत्युपनामकेन भट्टनारायणेन लक्ष्मीधरसूनुना विरचितः प्रकाश्यत इति महत्प्रमोदस्थानं वैदिकधर्मश्रद्धावताम् । चतुर्षु वेदेष्वृग्वेदस्य प्राथम्यं प्राचीनपरम्परयाभ्युपगतम् । तच्छाखाभेदविषये विविधाः परम्परा दृश्यन्ते । एकविंशतिधा बाह्वृच्यमिति व्याकरणमहाभाष्ये भगवान पतंजलिः । शाकला बाष्कला आश्वलायनाः शाङ्खायना माण्डूकेयाश्चेति पञ्च शाखाः पुराणप्रसिद्धाः । तत्र भारते बहुषु देशेषु शाकला शाखा परंपरया प्रचलति तस्याः संहिताग्रन्थोऽपि मुद्रित उपलभ्यते । शाकलशाखापेक्षया बाष्कलशाखायां विद्यमाना विशेषा बृहद्देवतादिग्रन्थेभ्यो ज्ञातुं शक्यन्ते । आश्वलायनशाङ्खायनशाखयोः कल्पसूत्रे स्तः तयोर्विनियुक्तेषु मन्त्रेषु शाकलशाखापेक्षया केचन विशेषा दृश्यन्ते येभ्यः तत्तच्छाखीयसंहिताया विशेषान् कल्पयितुं शक्यं भवेत् । माण्डूकेया शाखा तु केवलं नाम्ना ज्ञाता ।

"उक्तानि वैतानिकानि गृह्याणि वक्ष्यामः" इत्युपक्रम्य आश्वलायनाचार्या गृह्यकर्माणि वक्तुं प्रवृत्ताः । भारते यत्र शाकलशाखा प्रचलति तत्र प्रायः आश्वलायनसूत्रस्यैव प्रचारः गुर्जरदेशं राजस्थानप्रदेशं च विहाय । आश्वलायनगृह्यसूत्रं चतुरध्यायात्मकं नाम आश्वलायनशाखिनां स्मार्तकर्मप्रतिपादको मूलग्रन्थः । तत्र देवस्वामिनो भाष्यं सिद्धान्तिभाष्यं नारा-

यणहरदत्तयोः टीके इति सूत्रार्थप्रतिपादका ग्रन्था भवन्ति। सूत्रविषयस्य पूरकौ परिशिष्टसंज्ञकौ द्वौ ग्रन्थौ वर्तेते। सूत्राशयं सुबोधतया स्पष्टीकर्तुम् आश्वलायनगृह्यकारिकाः कुमारिल-विरचिताः प्रवृत्ताः। जयन्तस्वामिना विरचिता "विमलोदय-माला" नाम्नी आश्वलायनगृह्यसूत्रस्य पद्धतिः। एते सर्वे ग्रन्था मुद्रिता उपलभ्यन्ते। एतेषां तत्तद्ग्रन्थस्वरूपानुसारेण आश्वलायनशाखीयस्मार्तकर्मावबोधायावश्यकमुपयोगो भवति। एषु ग्रन्थेषु प्रायः आश्वलायनगृह्यसूत्रोक्तविषयाणामेव विस्तरेण स्पष्टीकरणं कृतमुपलभ्यते। परं गच्छता कालेन शाखान्तरवत् आश्वलायनशाखाया अपि परिस्थितिवशादावश्यकतानुसारेण च स्मार्तकर्मणां विस्तारोऽभवत्। गुणोपसंहारन्यायेन शाखा-न्तरेभ्यो बहून् कर्मविशेषान् स्वीकृत्य आश्वलायनीयैः ते स्वकी-येषु स्मार्तकर्मस्वन्तर्भाविताः। ते च परम्परया तैरनिष्ठीयन्ते। स्वशाखायामनुक्तानि परशाखाश्रितानि च कर्माणि स्वशाखीय कर्मवत् प्रामाण्यमर्हन्ति इति पूर्वमीमांसायाः सिद्धान्तः। तान्येतानि कर्माणि प्रमाणोद्धारपूर्वकं स्वीक्रियन्ते। एवं स्वशाखोक्तानां परशाखोद्धृतानां च कर्मणां निरूपणं स्वशा-खीयसूत्रविषयक्रमनिरपेक्षं निबन्धग्रन्थेषु क्रियते। बहवो निबन्ध ग्रन्था मुद्रिता उपलभ्यन्ते। प्रयोगो नाम कस्यचित् श्रौतस्य स्मार्तस्य वा तत्तच्छाखानुसारेणानुष्ठीयमानस्य कर्मणः प्रतिपा-दनम्। प्रयोगग्रन्थाः अनुष्ठातॄणां सौकर्याय रचिता भवन्ति। एवं प्रतिशाखं प्रतिकर्म प्रत्यृत्विजं च बहवः प्रयोगग्रन्था रचिताः। अल्पा एव प्रयोगग्रन्था मुद्रिता दृश्यन्ते। आश्वलायनशाखायाः स्मार्तकर्मप्रतिपादकः यः कोऽपि निबन्धः प्रयोगो वा नाद्यावधि

मुद्रितो दृश्यते । अतः गृह्याग्निसागरनाम्नोऽस्य निबन्धस्य प्रकाशनं आश्वलायनशाखानुयायिनां स्मार्तकर्माभ्यासकानां च सर्वोपकाराय भवेत् ॥

अस्य गृह्याग्निसागरस्य रचयिता आरडे इत्युपनामकः लक्ष्मीधरसुतः आश्वलायनशाखाध्यायी भारद्वाज गोत्रो भट्टनारायणो नाम। महाराष्ट्रियोऽयं पण्डितः। अस्य कुलस्य वसतिः कोंकणदेशे सावंतवाडीसमीपे कस्मिंश्चिद्ग्रामे आसीत्। ऋग्वेदस्य शाकलशाखाध्यायी कर्‍हाटकब्राह्मणोपजातीयोऽयम्। अस्य कुलपुरुषाः न केवलं कोंकणदेशे गोमन्त प्रदेशे च, अपि तु वाराणस्यां मध्यप्रदेशे सागरनगरपरिसरेऽपि वसत्यर्थं गताः। इदम् आरडे कुलं वाराणस्यां संस्कृतविद्वन्मण्डले महती ख्यातिमलभत। प्रायः भट्टनारायगस्य पिता लक्ष्मीधरो वाराणसीं गत इत्यनुमेयं भवति। भट्टनारायणस्य समये वाराणस्यां धर्मशास्त्रविषये ये केचन निर्णया विद्वन्मण्डल्या कृताः तत्र भट्टनारायणस्य हस्ताक्षरमङ्कितं विद्यते। एतादृशोऽधिकारः वाराणस्यां प्रतिष्ठितेषु कुलेषु विद्यमानानां विदुषामेव भवति। तेन लक्ष्मीधरः तस्य पूर्वपुरुषो वा वाराणसीं गत इति तर्कः समुचितो भवति। भट्टनारायणस्य वंशजैरपि संस्कृत पण्डितरूपेण वाराणस्यां ख्यातिः प्राप्ता। पण्डितः आरडे कृष्णभट्टः निर्णयसिन्धुः, गादाधरी, जागदीशी, इति ग्रन्थानां टीका रचितवान्। मोरोपंत पराडकरसंज्ञकस्य विख्यातस्य महाराष्ट्रकवेः सः समकालीन आसीत्। उभयोः परस्परं पत्र व्यवहारोऽपि आसीत्। धर्मसिन्धु–कर्तुः काशीनाथोपाध्यायस्य कनिष्ठो भ्राता विठ्ठलोपाध्यायोऽस्य शिष्य आसीत्। कृष्ण-

भट्टस्य पिता रङ्गनाथः भ्राता च नारायण इत्येतावपि संस्कृत पण्डितावास्ताम् ।

यद्यपि भट्टनारायणः प्रायो वाराणस्यामवसत् तथापि महाराष्ट्रदेशे भागानगरे (आन्ध्रप्रदेशे) अन्यत्र च स बहूनि दिनानि यापितवान् । विपुलग्रन्थावलोकनेन पाण्डित्यं संपाद्य तेषु तेषु देशेऽवटता तेन तत्तद्देशीयानां धर्माचाराणां निपुणमवलोकनं कृतमिति तेन रचितेभ्या ग्रन्थेभ्यः प्रतीयते । न केवलं गृह्याग्नि सागरः अपि तु अन्येऽपि केचन धर्मशास्त्रविषयका ग्रन्थास्तेन विरचिताः ।। तथा च श्राद्धसागरो नाम ग्रन्थोऽनेन रचित इति गृह्याग्निसागर उपलभ्यमानेभ्यो निर्देशेभ्यः स्पष्टं भवति । अस्य महतो ग्रन्थस्य लिखितपुस्तकं वाराणसीस्थ, कात्रेकुलस्य लिखित पुस्तकालये उपलभ्यते । डा. कात्रेमहोदयेन सदाशिवेन लक्ष्मण सूनुना उज्जयिन्यां सिंदिया - प्राच्यविद्यासंस्थायामनुसंधानकार्यं कृतवता भट्टनारायणस्य पाण्डित्यस्य परिचय सम्यक् कारितो वर्तते । (दृश्यतां "भारतीय-विद्या", खण्ड ६, पृ ७४–८६ मुम्बापुर्यां क्रिस्ताब्दे १९४५) । श्राद्धसागरे श्राद्धसंबन्धिनां सर्वेषां विषयाणां विस्तरेणोपन्यासः कृतः । यथा श्राद्धलक्षण-विचारः, श्राद्धस्य प्रकाराः, विष्णुश्राद्धं गयायां कर्तव्यं, श्राद्धस्य पिण्डदानादीन्यङ्गानि, श्राद्धनिर्णयः, श्राद्धस्याधिकार इत्यादि । एतेषां विषयाणां समर्थनपराणि बहूनि वचनानि गृह्यसूत्रेभ्यः पुराणेभ्यः स्मृतिभ्यो निबन्धेभ्यश्चोद्धृतानि । अयं ग्रन्थो भट्टनारायणेन बसवणपण्डितानां प्रेरणया रचित इति प्रतिप्रकरणं कृतेनोपसंहारेण ज्ञायते ।

अनेन विदुषा पूजासागरसंज्ञकोऽप्येको लघुग्रन्थो रचितो वर्तते। उज्जयिनीस्थ सिंदियाप्राच्यविद्यासंस्थायामस्य लिखितपुस्तकं सुरक्षितं वर्तते । अत्रोपवर्णिता विषया इत्थम् -- पूजाविधेः विविधाः प्रकाराः, विविधजातीयैः पुरुषैः कर्तव्या प्राणप्रतिष्ठा, पञ्चायतनानि, कुलदेवताः, मन्दिरदेवताः शालिग्रामपूजा, लिङ्ग पूजा, शङ्खघण्टाकलशादीनां लक्षणानि, उपचारद्रव्याणि पूजाङ्गानि चेति । निबन्धेऽस्मिन् पुराणस्मृतितन्त्रादिभ्यो बहुभ्यो ग्रन्थेभ्यः उद्धरणान्युद्धृतानि दृश्यन्ते। ग्रन्थस्य प्रास्ताविकाज्ज्ञायते यत् भट्टनारायणेनायं ग्रन्थो १५७२ शाके पूर्णग्रामे (= पुणे नगरे) (कसबा-) गणेशसंनिधौ शाहाजीराज्ञः पुरोहितस्य आर्वीकरस्य (= राजोपाध्ये इत्युपनामकस्य) आश्रितस्य (महाबळेश्वरकर) गोपालभट्टस्य प्रेरणया रचित इति । अयं गोपालभट्टः सूर्योपासक श्रीधरसूनुः शिवाजीराज्ञः तन्मातुः जिजाबाईमहोदयायाश्च मन्त्रगुरुरासीत् । पूजासागरे एकस्मिन् स्थले भट्टनारायणेन रचितस्य आह्निकसागरस्य निर्देश उपलभ्यते। तेनैतत्संज्ञको ग्रन्थोऽपि तेन निरमायि इति दृश्यते । दुर्दैववशादस्य ग्रन्थस्यैकमपि लिखितपुस्तकं नोपलब्धमद्यावधि । अन्येऽपि केचन ग्रन्था ग्रन्थांशा वा अनेन पण्डितेन रचिता दृश्यन्ते। किंतु ते स्वतन्त्रा ग्रन्था उत उपरिनिर्दिष्टग्रन्थानामेवांशा इति स्पष्टं ज्ञातुं न शक्यते ।

गृह्याग्निसागरो नाम निबन्धः भट्टनारायणेन १५६२ शाके रचित इति ग्रन्थस्योपसंहाराज्ज्ञायते । गृह्याग्निसागरो नाम गृह्याग्नौ क्रियमाणानां कर्मणां समूहः। भागानगरे निबन्धस्योपक्रमे तेन लिखितम् --

यथाज्ञानं विचार्याथ पक्षं शिष्टैरनुष्ठितम् ।
त्रीणि सूत्राणि तद्ग्रन्थानालोच्यान्यांश्च भूरिशः ॥

"त्रीणि सूत्राणि" नाम आश्वलायनबोधायनापस्तम्बानां गृह्य सूत्राणि । "तद्ग्रन्थान्" नाम तेषां सूत्राणां परिशिष्टानि भाष्याणि पद्धतीः निबन्धांश्च । "अन्यांश्च भूरिशः" इति पदैः ज्ञायते यत् निबन्धकारेण पुराणस्मृतिनिबन्धादयो बहवो ग्रन्थाः स्वकीय निबन्धरचनार्थं निपुणमवलोकिताः । तेषु तेषु प्रदेशेषु प्रोषितेन तेन तत्रत्यैः शिष्टैरनुष्ठिताः पक्षा अपि सावधानं प्रत्यक्षीकृता निबन्धे उपयुक्ताश्च । निबन्धेऽस्मिन् प्रतिपृष्ठं बहुभ्यो ग्रन्थेभ्यः श्लोका वाक्यानि वोद्धृतान्युपलभ्यन्ते । सांप्रतिके काले ग्रन्थाः प्रायो मुद्रिता उपयुज्यन्ते तेन च तेषामध्ययनं ग्रन्थरचनायामुपयोगश्च सुकरौ भवतः । परं शतसंख्यापरिमितानमुद्रित–ग्रन्थान् पठित्वा तद्गतानां श्लोकानां वाक्यानां च स्वकीयनिबन्धे समुचितस्थले निवेशनं न सुकरम् ।

निबन्धकारेणानेन न केवलं गृह्यसूत्राणि अपि तु श्रौतसूत्राण्यप्यवलोकितानि वारंवारं तद्गतसूत्राण्युद्धृतानि च । यतः प्रायः श्रौतकर्मावलम्बीन्येव स्मार्तकर्माणि भवन्ति । तेन च औपासन होमविचारे अग्निहोत्रविचारः पार्वणस्थालीपाकविचारे च दर्श पूर्णमासविचारः स्वभावत एवापतति । कात्यायनपरिभाषासूत्रमप्येकत्रोद्धतं दृश्यते (पृ.४०) । स्वकीयशाखायाः श्रौतसूत्रं गृह्यसूत्रं परिशिष्टे कारिकाः सूत्रटीकाः जयन्तकृता विमलोदयमाला चेति ग्रन्थेभ्यो नैकान्युद्धरणानि निबन्धकारेण कृतानीति नात्राश्चर्यम् । बोधायनश्रौतसूत्रगतः अग्न्याधानाग्निहोत्रपात्र–निर्माणादिविषयभागोऽनेन यथावसरमुद्धृतः । आपस्तम्बशाखाया

नित्यनैमित्तिकप्रायश्चित्तप्रतिपादकात् त्रिकाण्डमण्डनात् बहुशः कारिका उद्धृताः। शुक्लयजुषां शतपथब्राह्मणमप्यनेनावलोकितम्। स्मृतिभ्यो बहूनि वचनान्युद्धृतानि । स्मृत्यर्थसारो वारंवारमुपयुक्तो दृश्यते। एकस्य ग्रन्थस्य नैकानि पुस्तकान्यवलोक्य तेषु विप्रतिपत्तिश्चेत् साप्यनेन निर्दिष्टा। तथा च कृच्छ्रविवरणावसरे निबन्धकारो लिखति (पृ॰३१) – "रुद्रैकादशनीत्यादिकं काश्यामेकस्मिन् स्मृत्यर्थसारपुस्तके स्थितं दृष्टं पुस्तकान्तरे तु न दृश्यते। तत्त्वं तु तदीश्वरो वेत्ति । केचन शाखान्तरग्रन्था अल्पपरिचिता अप्यनेन दृष्टाः। तथाच यज्ञपार्श्वे वाजसनेयिनां परिशिष्टे " आवसथ्ये त्रयस्त्रिंशम् " इत्यावसथ्याधाने त्रयस्त्रिंशद्ब्राह्मणा भोजयितव्या इत्यादिष्टम्। औपासनाग्नेः पुनः संधानेऽपि आवसथ्यतुल्य एव व्यवहारः संपादनीय इति निबन्धकारो मन्यते। पक्षहोमप्रसंगे सायं होमः पृथक्कर्तव्य इति मतस्य पुष्ट्यर्थं मैत्रायणीय परिशिष्टवचनमुदाहृतम्।

अत्र गृह्याग्निसागरे ये विषया उपन्यस्तास्तेषां परिचयोऽनुक्रमणिकावलोकनेन भवेत्। तत्रेदमवधेयं यत् अत्र विषयानुक्रमः आश्वलायनगृह्यसूत्रविषयक्रमानपेक्ष इति । एवं सत्यपि गृह्यसूत्रोक्तानां सर्वासां पाकसंस्थानां प्रपञ्चो भट्टनारायणेन कृत इति स्पष्टम्। निबंधकारस्य समये सर्वासां पाकसंस्थानामनुष्ठानस्य परम्परा अंशतोऽपि तावदासीदित्यनेन तर्क्यते। गृह्याग्निविच्छेद प्रसंगानां प्राचुर्यात् तत्प्रायश्चित्तविचारो भट्टनारायणेनादावेव विस्तरेणोपन्यस्तः। अत्र विषये भट्टनारायणेनोक्तम् — भट्टैः प्रयोगरत्ने आलस्यात्प्रमादान्नास्तिक्याद्वा पक्षत्रयेऽपि प्रतिवर्षं प्रायश्चित्तं प्राजापत्यं गोदानं चेत्यादयो बहवः पक्षाः पृथक्पृथ-

युक्ताः। तत्र त्रयाणां निमित्तानां मध्ये येन केनापि निमित्तेन जातस्याग्निविच्छेदस्य आलस्यपरं परिकल्प्य "यावन्त्यब्दान्यतीतानि निरग्नेस्तु द्विजन्मनः। तावन्ति कृच्छ्राणि चरेद् होम्यं दद्याद् द्विजातये" इत्येतस्य सुलभत्वेन दर्शनादेतस्यैव प्रायेण अनुष्ठानदर्शनाच्च, (पृ. २)। ततश्च बहूनां निबंधकाराणां मतांतराण्यपि प्रदर्शितानि। एवं समन्वय सिद्धांतमाश्रित्य सूत्रकारस्य निबंधकाराणां च मतानां समानं प्रामाण्यमंगीकर्तव्यमिति प्राचीना धर्मशास्त्रपरम्परा। गृह्याग्निविच्छेदप्रायश्चित्तवदन्येष्वपि विषयेष्वयमेव प्रकारः।

निबंधेऽस्मिन्नौपासनहोमपार्वणस्थालीपाकादयः पाकसंस्थाः तदनुषंगिणश्च बहवो विषया विचारिताः। तत्र विविधानां कर्मणां प्रयोगा विहिताः केषांचन विषयाणां निर्णयाश्च कृताः। एवमस्य ग्रंथस्य निबंधरूपत्वं च व्यक्तं भवति। यथायं ग्रंथ आश्वलायनशाखानुयायिनामुपकाराय भवेत्तथा वैदिकधर्मशास्त्रस्य सामान्याभ्यासकानामपि। अस्य ग्रंथस्य लिखित पुस्तकानि भारते बहुत्रोपलभ्यंते। तेषु कानिचित् संपाद्य श्रीमद्भिः सांबोपाध्यायैराश्वलायनशाखिभिः वेदशास्त्राध्ययनाध्यापनैकव्रतैः श्री गोकर्णक्षेत्रनिवासिभिर्महता परिश्रमेणायं ग्रंथः परिशोधितः प्रकाशितश्चेत्येतदर्थं ते सर्वथाभिनन्दनमर्हन्तीति शम्।

टिळक–महाराष्ट्र–विद्यापीठम्
पुणे ४११०३०
शाके १९०७ वत्सरे
गुरुपूर्णिमायाम्

चि. ग. काशीकर

अथ गृह्याग्निसागरस्य अनुक्रमणिका

विषया:	पत्रम्
१ मंगलाचरण श्लोकः	१
२ गृह्याग्निविच्छेद प्रायश्चित्तम् ।	१
३ अकृताग्निद्वयसंसर्गः	२
४ प्रायश्चित्तप्रयोगः	३
५ प्रत्याम्नायाः	४
६ क्षौरकर्मणि शिखानाशे	७
७ दशस्नानविधिः	८
८ पंचगव्यविधिः	११
९ दशदानानां परिमाणम्	१२
१० साधारण धर्माः	१३
११ अशक्तस्य हविष्यम्	१४
१२ उपवास प्रतिनिधिः	१४
१३ आयतन प्रकारः	१५
१४ अग्न्याधान नक्षत्राणि	१७
१५ अग्निद्वयसंसर्गविधिः	१९
१६ विच्छिन्नाग्नेः पुनः संधानम् ।	२२
१७ ग्रंथांतरोक्त प्रायश्चित्तम्	२८
१८ कृच्छ्रादिलक्षणम्	२९
१९ अतिकृच्छ्रादि लक्षणम्	३०
२० होमारंभः	३१
२१ प्रादुष्करणकालः	३२
२२ होमकालः	३२
२३ होमकर्तारः	३४
२४ होमद्रव्याणि	३५
२५ होमप्रयोगः	३६
२६ पत्नीकुमारी कर्तृकनिर्णयः	४२

२७	समस्यप्रयोगः	४३
२८	गुर्वापदि पक्षहोमः	४४
२९	शेषहोमः	४५
३०	आशौचे होमविधिः	५०
३१	पिण्डपितृयज्ञप्रयोगः	५२
३२	अग्निसमारोपविधिः	५५
३३	प्रवासकाले कर्तव्य प्रयोगः	५८
३४	अपत्नीकौपासन प्रयोगः	६४
३५	स्थालीपाकारंभः	६५
३६	इष्टिकालनिर्णयः	६७
३७	पात्रलक्षणम्	७०
३८	अग्निमुखादि परिभाषा	७२
३९	पत्न्युपवेशनम्	७९
४०	स्थालीपाकस्य प्रथमारंभः	७९
४१	लघुस्थालीपाकः	८७
४२	स्थालीपाकानां साधारणतंत्रम्	९४
४३	श्रवणाकर्मादीनां कालः	९९
४४	सर्पबलिः	१०७
४५	आश्वयुजीकर्म	१०८
४६	आग्रयण विचारः	११०
४७	आग्रयण प्रयोगः	१११
४८	प्रत्यवरोहणम्	११६
४९	तस्य गृह्यकारिका	११८
५०	पिण्डपितृयज्ञकारिका	१२६
५१	पिण्डपितृयज्ञप्रयोगः	१३३
५२	पिण्डपितृयज्ञव्यतिषंगः	१५२
५३	अष्टकाश्राद्धप्रयोगः	१५६

५४ अष्टमीश्राद्धप्रयोगः १६०
५५ नवमीश्राद्धप्रयोगः १६४
५६ माघ्यावर्षश्राद्धम् १६८
५७ काम्यश्राद्धम् १६९
५८ अग्निनाशप्रायश्चित्तम् १७०
५९ यदि प्रवसति यजमानः पत्न्या
प्रवासनिमित्तं स्यात् प्रायश्चित्तम् १७०
६० बौधायनीयप्रायश्चित्तम् १७०
६१ अग्निनाशकप्रायश्चित्तम् १७१
६२ बौधायनीयप्रायश्चित्तम् १७२
६३ बौधायनसूत्रम् १७२
६४ अग्निनाशकप्रायश्चित्तम् १७४
६५ प्रादुष्करणातिक्रमप्रायश्चित्तम् १७९
६६ अग्न्युद्धरण कालः १८३
६७ अग्निहोत्रहोमकालः १८३
६८ तदतिक्रमे प्रायश्चित्तम् १८४
६९ आहुत्योः संसर्गे प्रायश्चित्तम् । १८६
७० उत्तराहुति स्कंदने १८७
७१ पवित्रेष्टिः १८८
७२ अनापदि पक्षहोमे प्रायश्चित्तम् १८९
७३ आत्मारोपनियमात्यये प्रायश्चित्तम् १८९
७४ अग्नेर्विष्ठाद्युपहतौ प्रायश्चित्तम् १८९
७५ यजमानः संवत्सरातिक्रमे प्रायश्चित्तम् १८९
७६ यत्नं विना प्रज्वलितेऽग्नौ प्रायश्चित्तम् १८९
७७ अग्न्युपघाते प्रायश्चित्तम् १९०
७८ दर्शपूर्णमासानारंभे १९०

७९ अन्वाधानोत्तरे वर्ज्याः १९०
८० एतन्नियमात्यये प्रायश्चित्तम् १९१
८१ अन्वाधानोत्तरं ग्रहणे प्रायश्चित्तम् १९१
८२ यजमानस्य वा ऋत्विजश्च वा स्वप्ने रेतो विसर्गे प्रायश्चित्तम् १९२
८३ बुद्धिपूर्वं रेतउत्सर्गे प्रायश्चित्तम् १९२
८४ इध्माबर्हिषोः पतने प्रायश्चित्तम् १९२
८५ इध्माधानमकृत्वा प्रधानहोमेकृते प्रायश्चित्तम् १९३
८६ आज्यभागोत्तरं तस्य स्मरणे प्रा १९३
८७ पवित्रनाशे प्रायश्चित्तम् १९४
८८ प्रणीताप्रोक्षण्यादिस्रावे प्रा १९४
८९ अग्निहोत्रेऽधिश्रिते मार्जाराद्यंतरागमने प्रायश्चित्तम् १९४
९० हवींषि यत्र कुत्रचित् स्कन्नछिन्न भग्ननष्टादि-निमित्तं प्रायश्चित्तम् १९५
९१ व्याधितत्वपरिहारार्थं प्रा १९६
९२ अशुभस्य प्रदर्शने प्रायश्चित्तम् १९६
९३ क्षुतादिषु जपः १९७
९४ अगमनीयागमने प्रा १९७
९५ अयाज्ययाजने प्रा १९७
९६ अभोज्यभोजने प्रा १९७
९७ अप्रतिग्राह्यप्रतिग्रहे प्रा १९७
९८ चैत्यूपोपघाते प्रा १९७
९९ अकाले अव्याधितस्वापे प्रा. १९८
१०० आगारोपरि कपोतप्रवेशे ,,
१०१ अर्थार्थगमने ,,
१०२ नष्टस्य लाभार्थं कर्म ,,

१०३	प्रज्ञाहीनत्वे	१९८
१०४	महाध्वादिगमने	१९९
१०५	भयङ्करमार्गगमने	,,
१०६	औपासनाग्न्यनुगमने	,,
१०७	अन्वाहिताग्न्यनुगमने	२०१
१०८	अन्वाधानोत्तरं प्रयाणे	२०२
१०९	औपासन होमलोपे	,,
११०	अतीत होमानुष्ठाने	,,
१११	तदूर्ध्वं चेदग्निनाशे	,,
११२	स्थालीपाकत्रयातिक्रमणे	२०३
११३	आयतनादग्नेर्बहिर्गमः	,,
११४	हविर्दोषे दुष्टहविस्थाने स्रुक्भेदे	२०४
११५	अन्यगृह्याग्निना स्वगृह्याग्नि संसर्गः	,,
११६	गृहदाहे	२०७
११७	शवाग्निना संसर्गे	,,
११८	पचनाग्निसंसर्गे	,,
११९	वैद्युताग्नि संसर्गे	२०८
१२०	पर्वण्यश्रुपाते	,,
१२१	पर्वणि व्रतलोपे	,,
१२२	पवित्रनाशे	,,
१२३	स्वयमग्निप्रज्वलने	२०९
१२४	अग्न्युपघाते तु	,,
१२५	अकृताग्रयणे	२१०
१२६	द्विषदन्नभोजने	,,
१२७	पतितान्नभोजने	,,
१२८	कपालनाशे	,,
१२९	मृन्मयांतरस्याशुचिसंसर्गनिमित्ते	२११

१३० तस्यैव भेदने २११
१३१ श्रवणाकर्मणि पुरोडाशनाशे स्फुटने ,,
१३२ यजमाने जीवति मृतशब्दश्रवणे २१२
१३३ यमलजनने ,,
१३४ हूयमानाहुतेर्बहिःस्कंदने ,,
१३५ देवताव्युत्क्रमे २१३
१३६ मंत्र व्युत्क्रमे ,,
१३७ द्रव्य व्युत्क्रमे ,,
१३८ अवदान व्युत्क्रमे ,,
१३९ यागव्युत्क्रमे ,,
१४० हविर्दाहे २१४
१४१ चरौ श्रप्यमाणे प्रागादिदिक्षूत्सेके २१६
१४२ पाकात्पूर्वं हविषां केशाद्युपहतौ ,,
१४३ अवदानदोषे २१७
१४४ एकावदानाद्यकरणे ,,
१४५ यागात्पूर्वं ज्ञाते ,,
१४६ अमदानानंतरं पुरोडाशादौ केशादि दोष दर्शने प्रायश्चित्तम् २१८
१४७ प्रधानधर्मैः हविर्विपर्यासे ,,
१४८ अंगहोमानामकरणे ,,
१४९ प्रधानदेवतांतराय: स्विष्टकृत: प्राक्स्मरणे २१९
१५० प्रयाजाद्यंगयज्ञाकरणे ,,
१५१ प्रधानयज्ञभ्रेषे प्रा. ,,
१५२ ऋत्विजां मंत्रोच्चारणकाले ,,
१५३ दोषदुष्टेन स्कंदेन वा हविषा ,,
१५४ अज्ञानात्प्रधानयागे २२०
१५५ हविर्दोषे ,,

१५६ अमेध्यदेशे स्कन्ने २२०
१५७ दुष्टेन हविषा यागे कृते २२१
१५८ पश्चाद्दोषदर्शने ,,
१५९ हुते हविषि अग्नौ पतिते ,,
१६० भागिन्यै देवतायै विस्मृत्या अभागिन्यै
निरूपिते चेत् ,,
१६१ दर्शपूर्णमासादिषु हविषामुपरि काक आसीदेत् २२२
१६२ श्रवणाकर्मणि एककपालपुरोडाश अपर्यावर्तने ,,
१६३ अनापदि गौणकालः २२३
१६४ गौणकालातिक्रमे ,,
१६५ पञ्चमहायज्ञलोपे २२४
१६६ त्र्यहं दशाहं द्वादशाहं वा लोपे ,,
१६७ स्नातक व्रतलोपे २२५
१६८ अन्वष्टक्या करणे ,,
१६९ आग्रयणादिक पाकयज्ञानां मध्ये अन्यतम
स्याकरणे प्रायश्चित्तम् २२६
१७० पिण्ड पितृयज्ञेऽतिप्रणीतनाशे ,,
१७१ पिण्ड पितृयज्ञाकरणे ,,
१७२ पिण्डपितृयज्ञात्यये वैश्वदेवात्यये पतितान्न
भोजने च ,,
१७३ पिण्डपितृयज्ञलोपे बौधायनापस्तम्बानां
प्रायश्चित्तम् ,,
१७४ द्रव्यशुद्धिः २२७
१७५ अस्थिशुद्धिः २३०

इति गृह्याग्निसागरानुक्रमणिका समाप्ता

॥ श्री गणपतये नमः ॥

॥ अथ गृह्याग्निसागरः प्रारम्भः ॥

नत्वा कृष्णपदांभोजं गणेशं शंकरं शिवम् ।
लक्ष्मीधरं च पितरं भट्टनारायणं तथा ॥ १ ॥
यथाज्ञानं विचार्याथ पक्षं शिष्टैरनुष्ठितम् ।
त्रीणि सूत्राणि तद्ग्रंथानालोच्यान्यांश्च भूरिशः ॥ २ ॥
आरडेत्युपनामा वै भट्टनारायणः सुधीः ।
गृह्याग्निसागरं चैव कुरुते शिष्टतुष्टये ॥ ३ ॥

तत्रादौ सर्वकर्मसु प्रायश्चित्तं विना नाधिकारः तद्विषयस्तत्प्रयोगश्च तावदुच्यते ॥ अग्नीनाधास्यमानो यजमानः, आधानेऽधिकारार्थं प्रागाधानात्प्रायश्चित्तं कुर्यात् । तत्रादौ प्रायश्चित्तकर्तव्यतासूचकानि मूलभूतानि आपस्तंबादिश्रौतविषयकग्रंथस्थानि प्रमाणानि लिख्यंते । तानि तु – संशोध्यात्मानं तपोजपैर्होमैः सभार्यो मैत्रीं कृत्वा सर्वभूतैरिति । आपस्तंबसूत्रभाष्यस्य धूर्तसंज्ञकस्येयं उक्तिः का तस्या इयं रामंडारव्याख्या । साच । कर्मादिष्वेतैर्जुहुयात् पूतो देवलोकान् समश्नुत इत्यादिश्रुतिनिदर्शनात् प्रथमं कृच्छ्रं चरित्वा शुचिः पूतः कर्मण्यो भवतीत्यादि स्मृतिदर्शनाच्च । सर्व वैदिककर्मसाधनभूताऽग्निसंपादनयोग्यतासिध्यर्थं प्रागाधानाधिकारिणोः पत्नीयजमानयोः शुद्धिः कर्तव्या । तथा निर्विघ्नेन कर्म समाप्त्यर्थंच मैत्री सर्वभूतैः पत्नी यजमानाभ्यां कर्तव्या । आंडिलापि ।

आधानस्य कर्म विदुषा ब्राह्मणेन यजेदनुज्ञातः । संशोध्यात्मानं जपहोमं कृच्छ्रचांद्रायणादिभिः सहभार्यया सर्वजनैर्मैत्रीं कृत्वा श्रुताध्ययनसाधुवचनान्यनुरागो वसंते पर्वण्युक्तेषु नक्षत्रेषु ब्राह्मण आदधीत । बौधायनीयकल्पसारेऽपि कृच्छ्रादिशुद्धः कुशली सजायो मैत्रीं व्रजेत्प्राणिना कूष्मांडजपादिभिरेनोनिबर्हणं कृत्वा आधानादि कर्माणि कुर्वंतीति देवस्वामी । एतैः प्रमाणैः कृत्वा आधानाधिकारसिध्यर्थं शरीरशुध्यर्थमेकं प्रायश्चित्तमवगंतव्यम् । तच्च प्रागाधानात्कर्तव्यम् । तच्च षडब्दं त्र्यब्दं सार्धाब्दं वा यथाधिकारं यथाशक्ति कर्तव्यम् । तथाच गृह्याग्निविच्छेदजनितप्रत्यवाय-परिहारार्थमेकं प्रायश्चित्तम् । तत्र गृह्याग्निविच्छेदविषये भट्टैः प्रयोगरत्ने-आलस्यात्प्रमादान्नास्तिक्याद्वा पक्षत्रयेऽपि प्रतिवर्षं प्राय श्चित्तं प्राजापत्यं गोदानं चेत्यादयो बहवः पक्षाः पृथक् पृथगुक्ताः । तत्र त्रयाणां निमित्तानां मध्ये येन केनापि निमित्तेन जातस्याग्नि विच्छेदस्य आलस्यविच्छेदपरत्वं परिकल्प्य " यावंत्यब्दान्यतीतानि निरग्नेस्तु द्विजन्मनः । तावंति कृच्छ्राणि चरेद्धौम्यं दद्याद् द्विजातये । " इत्येतस्य सुलभत्वेन दर्शनादेतस्यैव प्रायेण अनुष्ठानदर्शनाच्च । अग्न्युत्सादादिदिनादासंवत्सरं प्राजापत्यं चरेद्गां च दद्यादिति शंखवचनात् । "स्यादूर्ध्वं त्वब्दकृच्छ्रं खलु भवति धनं गांच दद्याद्विजाते" रिति विश्वदर्शनवचनात् । तदेव पक्षद्वयं शिष्टैरनुष्ठितं पक्षं चाश्रित्य धनिनः प्रतिवर्षं प्राजापत्यं गोदानं च । अशक्तस्य प्रतिवर्षं प्राजापत्यमेव नगोदानं । प्रायश्चित्तद्वयं विलोक्य विचार्य च प्रायश्चित्तं संकल्पं कुर्यात् । अत्र यदा अकृताग्निद्वय संसर्गिको यजमानस्तदाग्निद्वयविच्छेदस्यापि तत्तत्कालगणनया

प्रायश्चित्तं होमद्रव्यदानं स्थालीपाकद्रव्यदानं च पृथक्कार्यम् । अग्निद्वयसंसर्गस्याकृतत्वात् पाणिग्रहणादि गृह्यं परिचरेत् इत्युक्त त्वात् अग्निद्वयसंसर्गविधानाच्च । यथार्धाधानिनः श्रौतस्मार्ता-ग्न्योर्विच्छेदे पृथक् पृथक् प्रायश्चित्तं होमद्रव्यदानं तथा तत्रापि प्रासंगिकमेतत् सद्भिर्विचारणीयम् । तत्राग्नित्यागे निमित्तभेदेन बहुविधं प्रायश्चित्तमुक्तमस्ति । तस्यानुष्ठाने साधारणेन प्रवर्तितु मशक्यत्वात् तदुपेक्षितम् । तत्र शक्तश्चेत्तत्र निमित्तोक्तप्रयोगर-त्नादि ग्रंथांतराद्विचार्य तथा संकल्पं कुर्यात् । तत्र सर्वत्रसाधार-णीयम् ॥

मदनमहार्णवानुसारेण प्रायश्चित्तप्रयोगः ॥ चतुरस्त्रीनेकं वा अध्यात्मविदं ब्राह्मणं पर्षत्वेनोपवेश्य । कृतस्नानः शक्तौ सत्या मार्द्रवासा अभुंजानः पर्षदं प्रदक्षिणीकृत्य हृदयेन दूयमानो धरण्यां साष्टांगं प्रणमेत् । ततस्तैर्विप्रैः किंते कार्यं मिथ्यामवादीः सत्यमेव वदेत्यादि पृष्टे सति आधानेऽधिकारार्थं गृह्याग्नेः परिचरणे पुण्य-कर्मण्यधिकारे वा शरीरशुध्यर्थं गृह्याग्निविच्छेदजनितप्रत्यवाय-परिहारार्थं प्रायश्चित्तं गृहीतुं सभ्येभ्यः पर्षदग्रे गोवृषयोः प्रत्येकं प्रत्याम्नायेन यथाशक्ति स्वर्णरूप्योर्निष्कं तदर्धं तदर्धं वा गोवृषयोः निष्क्रयीभूतं यथाशक्तिद्रव्यं वाऽहं संप्रददे । न ममेति निधाय । अमुकशर्मणो ममेहजन्मप्रभृत्यद्यवावत् ज्ञानाज्ञान कामाकाम सकृत् असकृत् कृत कायिक वाचिक मानसिक सांसर्गिक स्पृष्टास्पृष्ट भुक्ताभुक्त पीतापीत सकलपातकातिपातकोपपातक लघुपातक संकलीकरण मलिनीकरणापात्रीकरण जातिभ्रंशकरण प्रकीर्ण

पातकानां मध्ये संभावितानां पापानां निरासार्थं आधाने पुण्यकर्मणि गृह्याग्निपरिचरणे वाधिकारसिध्यर्थं शरीरशुध्यर्थं गृह्याग्नि विच्छेदश्चेद्विच्छेददिनादारभ्याद्ययावत् गृह्याग्निविच्छेदजनित प्रत्यवायपरिहारार्थं च प्रायश्चित्तमुपदिशंतु भवन्तः ॥ उपदिशामः । एवं तत्तन्निमित्तेषु यथायथोल्लेखो ज्ञेयः । ततः । "सर्वे धर्मविवेक्तारो गोप्तारः सकला द्विजाः । मम देहस्य संशुद्धिं कुर्वंतु द्विजसत्तमाः । मया कृतं महाघोरं ज्ञातमज्ञातकिल्बिषम् । प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छथ । पूज्यैः कृतपवित्रोऽहं भवेयं द्विजसत्तमाः"॥ एवं संप्रार्थ्य ममानुगृह्णन्तु भवंत इति प्रणमेत्। ततस्ते सभ्याः तमुत्सार्य तस्य शरीर द्रव्यादिशक्तियुतमुत्तम मध्यमाधमादि पूर्वोक्तान् पक्षान् विचार्य अस्मिन् पक्षे अयं शक्त इति निश्चित्य पुस्तकवाचनपूर्वकं कथयेयुः ॥ अनुवादकस्याग्रे प्रत्याम्नायांश्च कल्पयेयुः । अस्मिन् काले प्रायश्चित्ताचरिता चंदनपुष्पादिभिः पुस्तकपूजां सभ्यानुवादकपूजां च विधाय निबंध पूजात्वेन किञ्चिद्यथाशक्तिद्रव्यं निधाय कृताञ्जलिपुटो नम्रस्तिस्ठेत् । अनुवादकाय च पापानुसारेण भृतिरूपां दक्षिणां दद्यात् । ततोऽनुवादकः – पूर्वोक्त विशेषण विशिष्टानां पूर्वोक्त पापानां निरासार्थं गृह्याग्निविच्छेद जनित प्रत्यवायपरिहारार्थं वा सभ्यैरुपदिष्टेनामुकाब्दात्मकेन अमुकप्राजापत्यात्मकेन वा प्रायश्चित्तेनामुकप्रत्याम्नायद्वारा प्राच्योदीच्यांगसहितेन चीर्णेन तव शुद्धिर्भविष्यति तेन त्वं कृतार्थो भविष्यसीत्युपदेशस्त्रिः ॥३॥ तत्राब्दादिप्रायश्चित्तं प्राजापत्यमन्यद्वा पर्षदोऽनुमतम् । तत्र प्रत्याम्नायाश्च गायत्र्यायुतजपः ॥ शान्तिहोमादौ गायत्रीकल्पे

योगयाज्ञवल्क्यः – ‘ यत्र यत्र च सङ्कीर्णमात्मानं मन्यते द्विजः । तत्र तत्र तिलैर्होमो गायत्र्या जप एव वा ’ ।। यमोऽपि – तिलैर्घृतयुतैर्होमं हुत्वा वै सुसमाहितः । गायत्र्या प्रयतः शुद्धः सर्वपापैः प्रमुच्यते ।। स्नायाच्छतेन गायत्र्यामंत्रितैःसतिलैस्तथा” इति । गायत्र्या तिलहोमसहस्रं । द्वादशब्राह्मणभोजनम् । तीर्थयोजनयात्रायां एकं गोदानम् । सुवर्णरौप्यनिष्कं तदर्धं तदर्धानां गोमूल्यानां शक्त्या दाने । संहितापारायणे समुद्रगानदीस्नाने शुष्ककेशस्य द्वादशनदीस्नानेषु । द्विगुणद्वादशामान्नदानादौ चैकः प्रजापत्यइति । अत्र गायत्र्यैव तिलहोमसहस्रं वेत्युक्तम् । स्मृत्यर्थसारे - प्राजापत्यप्रत्याम्नायस्थले गायत्र्ययुतजपो वेत्युक्त्वा अनंतरं तिलहोमसहस्रं वेत्युक्तम् । अत्र तिलहोमे मंत्रोनोक्तः । जपेऽदृष्टस्य मंत्रस्य सन्निधानाद्गायत्र्यैव गम्यते । मिताक्षरायां तु – कृच्छ्रायुतं जपो देव्यास्तिलहोमसहस्रकम् । अपरार्केतु — समिद्घृतं तथाधान्यं तिलान्वा मारुताशनः । हुत्वा द्वादशसाहस्रं गायत्र्या कृच्छ्रमाप्नुयात् । द्वादशाधिकं सहस्रं द्वादश साहस्रमित्यर्थः । समुद्रगा नदीस्नाने तु विद्यारण्यकृते सायणीय कर्मविपाके प्रमाणमस्ति । तद्यथा - समुद्रगानदीस्नानं प्राजापत्यसमं स्मृतम् । कृच्छ्रो देव्ययुतं चैव प्राणायामशतद्वयम् ।। तिलहोमसहस्रं च वेदपारायणं तथा । षष्टिश्चतुर्विंशतिर्वा भोज्या द्वादश वा द्विजाः । तत्समृध्यसमृद्धिभ्यां संख्यावैषम्यभाषणम् । इति । संहितापारायणं तु स्मृत्यर्थसारे उक्तम् । एतदनंतरं हेमाद्रौ गायत्रीकल्पोक्तयोगयाज्ञवल्क्यवचनं ज्ञेयम् । महार्णवानुसारेण प्रत्याम्नाया अतिकृच्छ्रे गो द्वयम् । पराकतप्तकृच्छ्रे कृच्छ्रत्रयम् ।

सांतपने सार्धकृच्छ्रम् । महासांतपने कृच्छ्रत्रयम् । पराकेऽपि तथा । यावकव्रतपयोव्रते च पंचकृच्छ्रः गोमूत्रयावके षट् । चांद्रायणे अष्टौ त्रयो वा । गोवधव्रते मासोपवासव्रते च पंचकृच्छ्रा इति । समुद्रगानदीस्नानं विना सर्वेषामपि प्रत्याम्नायप्रमाणं मिताक्षरायां द्रष्टव्यम् । तत्र शक्तस्यामात्रं द्विगुणम् । द्रव्यं चतुर्गुणमित्यादि योज्यम् । निष्कश्च लौकिकशास्त्रयोरेकवाक्यतयाऽष्टगुंजात्मको माषः ४० तदर्धं २० तदर्धं १० मुख्यं सुवर्णम् । तदशक्तौ रजतं ग्राह्यम् । ततो निवेदितं प्रायश्चित्तं भवदनुग्रह इत्यंगीकृत्य दक्षिणापूर्वं प्रणम्य पर्षदं विसृजेत् । अस्मिन्नहनि शक्तेनोपवासः कार्यः इतरेण हविष्याशनम् । ततः कस्यांचिद्रिक्तायां तिथौ शीघ्रकार्ये शिष्टैरंगीकृतपक्षे तद्दिनएव वा कृतमाध्याह्निकः सायाह्ने गंगादौ देशकालौ संकीर्त्य अमुकशर्मणो ममेह-जन्मप्रभृत्यद्य यावत् ज्ञानाज्ञान कामाकाम सकृदसकृत् कृत कायिक वाचिकमानसिक सांसर्गिक स्पृष्टास्पृष्ट भुक्ताभुक्त पीतापीत सकलपातकातिपातकोपपातक लघुपातक संकलीकरण मलिनीकरणापात्रीकरण जातिभ्रंशकर प्रकीर्णपातकानां मध्ये संभावितानां पापानां निरासेनाधानेऽधिकारसिध्यर्थं गृह्याग्निधारणे शरीरशुध्यर्थं पुण्यकर्मण्यधिकारसिध्यर्थं वा अमुकमब्दात्मकं तथा गृह्याग्निविच्छेदजनित प्रत्यवाय परिहारार्थं अमुकप्राजापत्यात्मकं प्रतिवर्षं गोदानं च श्रीपरमेश्वरप्रीत्यर्थं पर्षदुपदिष्टं प्रायश्चित्तम् अमुकप्रत्याम्नायेन सम्यक् प्राच्योदीच्यांगसहितमहमाहचरिष्ये । इति संकल्प्य "यानि कानि च पापानि ब्रह्महत्यासमानि च । केशानाश्रित्य तिष्ठन्ति तस्मात्केशान्वपाम्यहम्" ।। इति मंत्रेण

शिखाकक्षोपस्थवर्जं नखरोमाणि वापयित्वा । प्राङ्मुखो द्वादशांगुल दंतकाष्ठेन - आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च । ब्रह्म प्रज्ञां च मेधां च त्वं नो देहि वनस्पते ।। इति मंत्रेण दंतान् संशोध्य तावत्प्रमाणेन काष्ठान्तरेण जिह्वामुल्लिख्य प्रक्षाल्य काष्ठद्वयं किंचिद्भग्नं विधाय विसृज्याचम्य स्नात्वा भस्मादि स्नानानि कुर्यात् ।। तत्र सर्वत्र प्रायश्चित्तस्थले प्राजापत्यत्रयपरिमितेऽधिके वा प्रायश्चिते वपनं कार्यम् । न तन्न्यूनत्वे । अत्र प्रासंगिकं किंचिदुच्यते । मिताक्षरायां विद्यारण्यकृते सायणीये कर्मविपा–कसारे च । राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः । केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेत् ।। केशानां रक्षणार्थाय द्विगुणं व्रतमाचरेत् । द्विगुणे व्रत आचीर्णे दक्षिणा द्विगुणा भवेत् ।। विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनम् । ऋते महापातकिनो गोहन्तुश्चावकीर्णिनः ।। इति । स्मृत्यर्थसारादिष्वप्येवमेव । द्विगुणं व्रतमित्यत्र यत्र यत्र ब्रह्महत्यादौ द्वादशाब्दं व्रतं तत्रैव वार्षिकं व्रतमित्यादि सर्वत्रापि द्वादशाब्दादि साध्यं कक्षरोमशिखावपन-वर्जमिति विज्ञानेश्वरे । अब्दादिसाध्यं तत्तन्नियमाद्युपेतं प्राय–श्चित्ताचरणमेव व्रतशब्देनोच्यते तस्यैव व्रतत्वाभिधानात् । द्वि - गुणा दक्षिणेत्यत्र पर्षद्दक्षिणाया गोवृषरूपाया द्विगुणा वृद्धिः । अत्रान्यदपि प्रासंगिकम् - यदाकदाचित् क्षौरकर्मणि शिखानाशे प्रायश्चित्तम् । अथ त्रैवर्णिकस्य शिखानाशे काठकगृह्यपरिशिष्टे विधिरुक्तः शिखावर्जं वपनम् प्रमादात्तद्वपने कौशीं शिखां ब्रह्म-ग्रंथियुतां दक्षिणकर्णे निदध्यात् एष विधिः शिखानाश इति । अत्र पुनः संस्कारोऽपि उक्तः संग्रहे - शिखां छिंदंति ये मोहाद्

द्वेषादज्ञानतोऽपि वा । पुनः संस्कारमर्हति त्रयो वर्णा द्विजातयः इत्युक्तं श्राद्धकल्पलतायाम् । तत्र भस्मस्नानै महार्णवे चत्वारः प्रकाराः उक्ताः तत्रैकं पक्षमाश्रित्य कर्तव्यमेव । शरीरशुध्यर्थं प्रायश्चित्तांगभूतं भस्मस्नानमहं करिष्ये इति संकल्प्य, भस्मगृहीत्वा ईशानाय नमः इति शिरसि लिपेत् । तत्पुरुषाय नम इति मुखे। अघोराय नम इति हृदये । वामदेवाय नम इति गुह्ये । सद्योजाताय नम इति पादयोः । ईशानः सर्वविद्यानामित्यादि मंत्रेण शिरः पादपर्यंतं मृदं लिपेत् प्रणवेन सर्वांगेषु। यद्वा-अग्निरिति भस्म, वायुरिति भस्म, जलमिति भस्म, स्थलमिति भस्म, व्योमेतिभस्म, सर्वं ह वा इदं भस्म इतिमंत्रैरेवं भस्मना स्नात्वा । शुद्धोदकेन स्नात्वा गोमयेन स्नायात् । शरीर शुध्यर्थं गोमयस्नानं । ॐ मानस्तोके -, यद्वा गंधद्वारामिति मंत्रेण वा यद्वा अग्रमग्रं चरंतीनामोषधीनां वने वने । तासामृषभपत्नीनां पवित्रं कायशोधनम् । तन्मे रोगांश्च शोकांश्च नुद गोमय सर्वदा ।। इतिमंत्रेण गोमयस्नानं ।। अथ मृत्तिकास्नानं करिष्ये । बळित्थेति मंत्रेण भूमिं प्रार्थ्य, मावोरिषत् इति खनित्वा स्योना पृथिवीति मृदमादाय आयनेस्ते परायण इति दूर्वामादाय गायत्र्याभ्युक्ष्य भूमौ मृदं निधाय । आचम्य देशकालादिस्मृत्वा प्रायश्चित्तांगं मृत्तिकास्नानं करिष्ये । मृदं कुशोदकेनाभ्युक्ष्य ततो मृदं दिक्षु निक्षिपेत् । त्रातारमिंद्रमिति पूर्वस्यां निक्षिपेत् । यमायमधुमत्तममिति दक्षिणस्याम्, तत्त्वायामीति पश्चिमस्याम् वयं सोमेत्युत्तरस्याम्; तत्सूर्यंरोदसीत्युपरिष्टात् । अधः पश्यस्वेत्यधः क्षिपेत् । ततोऽगेषु । सहस्रशीर्षेति शिरसि

अक्षीभ्यांते इति मुखे । ग्रीवाभ्यस्त इति ग्रीवायाम् । आंत्रेभ्यस्त इति हृदये । नाभानाभिन्न इति नाभौ । त्वमिंद्रसजोषस इति बाह्वोः । सोमानं स्वरणमिति कक्षयोः । यःकुक्षिः सोमपातम इति कुक्षौ । बह्वीनां पितेति पृष्ठे । ऊरुभ्यांते इति ऊर्वोः, मेहनाद्वनं करणादिति जान्वोः । एतावानस्येति पादयोः । यस्य विश्वानीति हस्तयोः । अंगादंगादित्यनेन पुरुषसूक्तेन च सर्वां गोद्वर्तनम् । एतावदशक्तौ महार्णवानुसारेण अश्वक्रांत इत्यादिभि रंगोद्वर्तनमात्रम् ॥ ततः अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे । शिरसा धारयिष्यामि रक्षस्व मां पदे पदे ॥ भूमिर्धेनु र्धरणी लोकधारिणी । उद्धृतासि वराहेण कृष्णेन शतबाहुना ॥ मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् । मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमंत्रिता ॥ मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रति ष्ठितम् । मृत्तिके प्रतिष्ठिते सर्वं तन्मे निर्णुद मृत्तिके ॥ त्वया हतेन पापेन गच्छामि परमां गतिम् ॥ इत्यादिभिः सतिलां सदूर्वां मृदं शिरसि निधाय मृत्तिकास्थानं प्रक्षाल्य तीर्थं प्रार्थयेत् । हिरण्य शृंगं वरुणं० । यन्मया भुक्तं० - यन्मे मनसा० । तन्न इन्द्रो वरुणो० । इमं मे गंगे० । इदं तेऽन्याभिरसमानमद्भिर्याः काश्च सिंधुं प्रवहन्ति नद्यः । सर्पो जीर्णामिव त्वचं जहाति पापं सशारस्कोऽभ्युपेत्य ॥ ततः गंगा गंगेति यो ब्रूयात् । सुमित्र्यान आपः समुद्रज्येष्ठा इति चतसृभिः एतोन्विद्रमिति तिसृभिः तरत्स-सन्दीति सूक्तेन पावमानीभिः आपोहिष्ठेति तृचेन मार्जनं कृत्वा इमं मे गंगइत्युदकमालोड्य ऋतं चेत्यघमर्षणं कुर्यात् । ततः प्रवाहाभिमुखः त्रिवारं मज्जेत् । इति मृत्तिकास्नानम् ।

ततः आपोहिष्ठेति तृचेन इदमाप इत्येकया च शुद्धोदकस्नानम्। गोमूत्र माषाण्यष्टौ च गोमयस्य तु षोडश । क्षीरस्य द्वादशः प्रोक्ताः दध्नस्तु दश कीर्तिताः ।। गोमूत्रवद्घृतस्याष्टौ तदर्धं तु कुशोदकम् ।। अथ पंचगव्यस्नानानि । गायत्र्या गोमूत्रेण, गंधद्वारामिति गोमयेन, आप्यायस्वेति क्षीरेण, दधिक्राव्ण इति दध्ना, घृतं मिमिक्ष इति घृतेन, देवस्यत्वेति कुशोदकेन देवस्यत्वेति मंत्रेण अभिषिंचामीति वाक्यशेषः । स्त्रीशूद्राणामेतान्यमंत्रकाणि स्नानानि । समंत्रकं द्विजानां स्यात् स्त्रीशूद्राणाममंत्रकं इति स्मृत्यर्थसारोक्तमदनमहार्णवे । एवं दशविधस्नानानि विधाय । ब्रह्मादयो ये देवास्तां देवांस्तर्पयामि भूर्देवांस्तर्पयामि, भुवो देवांस्तर्पयामि, स्वर्देवां स्तर्पयामि भूर्भुवः स्वर्देवांस्तर्पयामि । निवीती कृष्णद्वैपायनादयो ये ऋषयः तान् ऋषींस्तर्पयामि । भूः षीं—स्तर्प, भुवः ऋषींस्तर्प, स्वः ऋषींस्तर्प, भूर्भुवः स्वः ऋषींस्तर्प । प्राचीनावीती, सोमः पितृमान्यमोंगिरस्वानग्निष्वाताः कव्यवाहनादयो ये पितरः तान् पितॄंस्तर्प, भूः पितॄंस्तर्प, भुवः पितॄंस्तर्प, स्वः पितॄंस्तर्प, भूर्भुवः स्वः पितॄंस्तर्पं इति स्नानांगतर्पणं कृत्वा धौतवाससी परिधाय द्विराचम्य विष्णूद्देशेन त्रिभ्योऽधिकान् युग्मान् ब्राह्मणान् पूजापूर्वकं भोजयेत् । आमान्नं हिरण्यं वा दद्यात् । प्रायश्चित्तांग विष्णुश्राद्धार्थं चतुरधिकान्वा युग्मान् ब्राह्मणान् भोजयिष्ये । तेन पापापहा महाविष्णुः प्रीयतामिति संकल्पः । इदमेव प्रायश्चित्तांग विष्णुश्राद्धमित्यभिधीयते ।। ततः प्रायश्चित्तांगमाद्यगोदानम् । गवामंगेषु तिष्ठन्ति भुवनानि चतुर्दश । यस्मात्तस्माच्छिवं मे स्यादिहलोके परत्र चेति मंत्रेण

गोदानं प्रत्यक्षं निष्क्रयद्वारा वा कुर्यात् । ततोऽग्निस्थापनादि पूर्वकमाज्येन व्याहृतिभिः पापापहमहाविष्णूद्देशेन अष्टाविंशति रष्टोत्तरशतं वाऽऽज्याहुतीर्जुहुयात् । प्रायश्चित्तांगं आज्यहोमं पंचगव्यहोमं च करिष्ये । तदंगमग्निप्रतिष्ठापनं अन्वाधाने चक्षुष्यंते अग्निं वायुं सूर्यं प्रजापतिं पापापहमहाविष्णुं वा अष्टाविंशतिसंख्यं अष्टोत्तरशतसंख्यं वा आज्येन पंचगव्यहोमे पृथिवीं विष्णुं रुद्रं ब्रह्माणं अग्निं सोमं सवितारं प्रजापतिं प्रजापतिं अग्निं स्विष्टकृतं पंचगव्येन अग्निं स्विष्टकृतं हुतशेषेणेत्यादि आज्यसंस्कारकाले पंचगव्यमंत्रैः पंचगव्यं संपाद्याज्येन सह संस्कृत्य बर्हिरास्तरणादि तत्र पंचगव्यमेवं कार्यम् । सुवर्णपात्रे पद्मादिपात्रे वा ताम्रवर्णाया गोमूत्रं त्रिपलं गायत्र्या प्रणवेन वादाय; ततोंऽगुष्ठार्ध परिमितं श्वेताया गोमयं गंधद्वारामित्यादाय, ततः कपिलाया सप्तपलं क्षीरं आप्यायस्वेत्यादाय, ततो नीलायाः सप्तपलमेव दधि दधिक्राव्ण इत्यादाय, ततः कृष्णाया घृतमेकपलं घृतंमिमिक्ष इत्यादाय ततः एकपलं कुशोदकं देवस्यत्वेत्यादाय प्रणवमुच्चार्य हस्तेनालोड्य प्रणवेनैव यज्ञियकाष्ठेन निर्मंथ्य प्रणवेनाभिमंत्र्य ततो व्याहृतिभिरुक्तसंख्यया आज्यं हुत्वा सप्तपत्रैर्हरितैः कुशैर्दशाहुतीर्जुहुयात् पंचगव्यस्य, एभिर्मंत्रैः स्वाहांतैः । अत्र स्रुवस्थाने कुशा इति महार्णवे । मंत्राश्च । ॐ इरावती धेनुमती० पृथिव्याइदं । ॐ इदंविष्णुः० विष्णवइदं । ॐ मानस्तोके० रुद्रायेदं । ॐ ब्रह्मजज्ञानं० ब्रह्मणइदं । ॐ अग्नये स्वाहा अग्नयइदं । ॐ सोमायस्वाहा सोमायेदं । ॐ तत्सवितु० सूर्यायेदं । ॐ स्वाहा प्रजापतयइदं । ॐ भूर्भुवः स्वः स्वाहा प्रजापतय इदं

अग्नये स्विष्टकृते स्वाहा अग्नये स्विष्टकृत इदं । यदस्येति कर्मशेषं समाप्य' व्रतग्रहणं करिष्ये इति द्विजान् पृष्ट्वा तैः कुरुष्वेत्यनुज्ञातः प्रणवेन सर्वं पिबेत् । एतच्च ग्रामाद्बहिः नद्यादेस्तीरे नक्षत्रदर्शने कार्यम् । व्रतं निशामुखे ग्राह्यं बहिस्तारकदर्शने । इति मिताक्षरायां विद्यारण्यकृते सायणीये चोक्तत्वात् । अशक्तौ गोमूत्रादि स्वल्पं ग्राह्यं सर्वस्य पेयत्वात् । तस्मिन् दिने उपवासः शक्तस्य, अन्यस्य हविष्याशनम् । इति पंचगव्यं प्राश्य गृहमागत्य विष्णुं स्मरेत् । मौनी निशामतिवाह्य । शिष्टैरंगीकृतपक्षे तस्मिन्नेव दिने वा प्रक्रांतं प्रधानं प्रायश्चित्तं पूर्वोक्तकल्पानुसारेण प्रत्याम्नायद्वारा कृत्वा उत्तरांगानि कुर्यात् ।। तत्राग्निविच्छेद जनितं पूर्वोक्तप्रायश्चित्तं दम्पती सहकुर्याताम् । न पृथगित्युक्तम् प्रयोगरत्ने पुनःसन्धानप्रकरणे । पुनः पूर्ववदग्निस्थापनादि । तस्मिन्नेव दिने चेत् तस्मिन्नेवाग्नौ पंचगव्यहोमरहितं पूर्ववत् व्याहृतिभिराज्यं हुत्वा पूर्ववत्पुनः प्रायश्चित्तांगं विष्णुश्राद्धं कृत्वा ततः प्रायश्चित्तांगमंत्यगोदानं पूर्ववत्कुर्यात् ।। एतदनंतरं महार्णवस्थशातातपाद्युक्तत्वात् दशदानानि कर्तव्यानि । दशदानानां परिमाणमुक्तं शातातपीये कर्मविपाके । निवर्तनमिता भूमिर्द्रोणत्रयमितास्तिलाः । कर्षमात्रं सुवर्णं स्यादाज्यं चैवाढकं स्मृतम् ।। वाससां त्रितयं दद्याद्गुडं च पलमष्टकम् । निष्कत्रयमितं रौप्यं लवणं सार्धखारिका ।। चतुर्विंशति द्रोण इत्यस्य सार्धखारिमितं धान्यं प्रमाणं परिकीर्तितम् इति । तानितु । गोभूतिल हिरण्याज्यवासोधान्यगुडानि च । रौप्यं लवणमित्याहुर्दश दानान्यनुक्रमात् । इति एतेषां मंत्रास्तु । गावोमेअग्रतः संत्विति गोदाने १ ।

सर्वसस्याश्रया भूमिरिति भूमेः २ । महर्षेर्गोत्रसंभूताः कश्यपस्य तिलाः स्मृताः । तस्मादेषां प्रदानेन मम पापं व्यपोहतु । इति तिलपात्रस्य ३ । हिरण्यगर्भगर्भस्थमिति हिरण्यस्य ४ । कामधेनुषु संभूतं सर्वक्रतुषु संमतं । देवानामाज्यमाहारमतः शांति प्रयच्छ मे । इत्याज्यस्य ५ ॥ शरण्यं सर्वलोकानां लज्जाया रक्षणं परं । सुवेषवस्त्रधारित्वमतः शांति प्रयच्छ मे ॥ इति वस्त्रस्य ६ ॥ सर्वदेवमयं धान्यं विश्वोत्पत्तिकरं महत् । प्राणिनां जीवनोपायमतः — ॥ इति धान्यस्य ७ । यथा देवेषु विश्वात्मा प्रवरश्च जनार्दनः । सामवेदस्तु वेदानां महादेवस्तु योगिनाम् ॥ प्रणवः सर्वमंत्राणां नारीणां पार्वती यथा । तथा रसानां प्रवरः सदैवेक्षुरसो मतः ॥ मम तस्मात्परां लक्ष्मीं ददस्व गुड सर्वदा इति गुडस्य ८ ॥ प्रीतिर्यतः पितॄणां च विष्णुशंकरयोः सदा । शिवनेत्रोद्भव रौप्यमतः शां — ॥ इति रौप्यस्य ९ ॥ यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना । शंभुप्रीतिकरं नित्यमतः— इति लवणस्य १० ॥ सर्वत्र प्रायश्चित्तविषये एतदन्तः साधारणो विधिः । सर्वत्र प्रायश्चित्तविषये कृच्छ्रचांद्रायणादीनि व्रतानि प्रायश्चितार्थमनुष्ठीयन्ते तदा केशादि वपनपूर्वकमेव परिगृहीतव्यानि । यदा त्वभ्युदयार्थं न तदा वपनम् । कृच्छ्रकृद्धर्मकामस्तु महतीं श्रियमाप्नुयात् । यदा गुरुक्रतुफलं प्राप्नोति सुसमाहितः ॥ यस्त्वभ्युदयकामः प्राजापत्यादि कृच्छ्राननुतिष्ठति स महतीं राज्यादिलक्षणां विभूतिमनुभवति । यथा गुरुक्रतूनां राजसूयादीनां कर्ता तत्फलं स्वाराज्यादि लक्षणं महत्फलं लभते इत्युक्तम् मिताक्षरायां प्रायश्चित्ताध्याये । सर्वत्रापि प्रायश्चित्तस्थले एते साधारणधर्मा

स्ते यथा मिताक्षरादिषु विद्यारण्यकृते सायणीये च । गात्राभ्यंगं शिरोऽभ्यंगं तांबूलमनुलेपनम् । व्रतस्थो वर्जयेन्नित्यं यच्चान्य द्व्रतनाशकृत् ।। एकवासार्द्रवासा च नक्ताशी स्थण्डिले शयः । माषान्मसूरान्मुद्गांश्च परान्नं मैथुनं तथा । वर्जयेच्च व्रतोपेतो ह्यकालेषु हि भक्षणम् ।। ग्राह्यपदार्थेषु सायणीये विशेषः । ग्राह्यवस्तून्युपक्रम्य - गव्यस्य पयसोऽलाभे गव्यमेव भवेद्दधि । दध्नोऽभावेतु तक्रं स्यात्तक्राभावेतु यावकमिति । सर्वत्र हविष्योक्तौ हविष्यभूतमन्नमोदनमेव, तस्य संस्कारार्थं गव्यं घृतं पयो दधि वा । अत्राशक्तस्य प्रकारांतरेण हविष्यमाह देवीमहोत्सवे निर्णय सिंधौच । हैमंतिकास्तिला धान्यं मुद्गा यवकलापकाः । सिंधौ-त्वेवं पाठः हैमंतिकं सितास्वन्नं धान्यमुद्गायवास्तिलाः । श्यामाक कंगुनीवाराः वास्तुकं हिलमोचिकाः ।। षाष्टिका द्रोणशाकं च मूलकं केमुकेतरत् । कंदः सैंधवसामुद्रे गव्ये च दधिसर्पिषी ।। पयोऽनुद्धृतसारं च पनसाम्रहरीतकी । पिप्पली जीरकं चैव नागरं चैव तिंत्रिणी ।। कदली लवली धात्री फलान्यगुडमैक्षवम् । अतैलपक्वं मुनयो हविष्याणि प्रचक्षते ।। हैमंतिकं हेमन्तकालोत्पन्ना व्रीहयः । सितास्वन्नं वालुकार्भाजितधान्यम् । कलापकाः वाटाणे । कंगु राळे । वास्तुकं रायचिलवस एव बटुवा । हिलमोचिका रानबसाला । कन्दः सूरणव्यतिरिक्तः । सैंधवसामुद्रलवणे ग्राह्ये सैंधवसामुद्रे प्रत्यक्षे अपि तित्यशः, इति । क्षीरं निर्मंथ्य नवनीतं गृह्णाति तादृशं क्षीरं न हविष्यम् । नागरं शुण्ठी । तिंत्रिणी चिंच । लवली मरीची । गुडव्यतिरिक्ताः शर्कराद्यैक्षव विकाराः । शेषं प्रसिद्धम् । मुद्गानां विहितप्रतिषिद्धत्वाद्विकल्पः । सर्वत्रापि

प्रायश्चित्तविषये उपवासाशक्तावेकविप्रभोजनम् । तावद्धन-धान्यादि दानं वा । द्विगुणादि वृद्धिश्च । गायत्री सहस्त्रजपो वेत्येतावत् स्मृत्यर्थसारोक्तम् । — उपवासाऽसमर्थश्चेदेकं विप्रं तु भोजयेत् । तावद्धनानि वा दद्यात् भुक्तस्य द्विगुणं तथा ॥ सहस्त्रसंमितां देवीं जपेद्वा प्राणसंयमान् । कुर्याद्द्वादश संख्या-कान् यथाशक्त्याऽनुरोधतः ॥ इति कालहेमाद्रौ ॥ द्रव्यदातोप-वासस्य फलमाप्नोत्यसंशयमिति मदनरत्ने देवलः । ब्रह्मचर्यं तथा शौचं सत्यमामिषवर्जनम् । व्रतेष्वेतानि चत्वारि वरिष्ठानीति निश्चयः ॥ इति श्रीनारायणभट्ट कृते गृह्याग्निसागरे प्रायश्चित्त निरूपणम् ॥

॥ अथ पुनः संधानादि प्रयोगः ॥

केवल पुनःसन्धाने तु अग्निविच्छेददिनादारभ्य एतावंतं कालं मम गृह्याग्निविच्छेदजनितप्रत्यवायपरिहारद्वारा एतावत्प्रा-यश्चित्तं अमुकप्रत्याम्नायेन यथाशक्ति करिष्ये । प्रायश्चित्तं कृत्वा होमद्रव्यं स्थालीपाकद्रव्यं च दत्वा पुनःसंधानं कुर्यात् । प्राय-श्चित्तं तु पूर्वोक्तं प्रतिवर्षं प्राजापत्यं गोदानं चेत्यादि ज्ञेयम् । एवं प्रायश्चित्तं कृत्वा विच्छिन्नस्य गृह्याग्नेः पुनःसन्धानं कुर्यात् तदर्थमायतनप्रकारः । तत्र भट्टोजीकृत कुण्डलक्षणग्रंथे शौनकः— अरत्निमात्रं विज्ञेयमग्नेरायतनं शुभम् । श्रौते चौपासने वापि खातयोनिविवर्जितम् ॥ मेखलाद्वितयं कार्यं रेखालग्नं तु बाह्यतः । बाह्या द्व्यंगुलविस्ताराऽभ्यंतरा चतुरंगुला ॥ बाह्या षडंगुलोत्सेधाऽभ्यंतरा द्वादशांगुला ॥ बौधायनेऽप्येतदेव साधं वाक्य

मुक्तम् ।। विस्तारेण तु कर्तव्या समा श्लक्ष्णा दृढा शुभा । कनिष्ठिकाग्रपर्वांतात्कूर्पराद्या त्वरत्निका ।। बद्धमुष्टिस्तु रत्निः स्यात्तत्तत्कर्मसु योजयेत् ।। आहिताग्नेरनाहिताग्नेश्च अग्नेराय-तनं स्थानं स्थंडिलं केवलायां भूमावेव गृहस्येशानदेशे चोत्तरस्यां वा समंतात् चतुरस्रं अरत्निमात्रां रेखां कृत्वा बाह्यतः षडंगुलोच्चां द्व्यंगुलविस्तृतां मेखलां अभ्यंतरे द्वादशांगुलोत्सेधां चतुरंगुल विस्तृतां द्वितीयां मेखलां कुर्यात् ।। अत्र भूमिखननं योनिकरणं च नास्ति । एवं केवलमेखलाद्वयमुक्तं स्थंडिलमग्नेः स्थानम् । इति भट्टोजीदीक्षित कृतग्रन्थोक्तमायतनलक्षणम् ।। अथाश्वलाय नसूत्रे तु । इषुमात्रावरं सर्वतः स्थंडिलमिति । इषुमात्रं सर्वतः आसमंताच्चतुरस्रं स्थंडिलं कुर्यात् । तच्च अवरं अवरंनाम कनिष्ठं होमाधिक्ये अधिकमपि कर्तव्यमिति भावः ।। अधिकं वेषुमात्रं वेति कारिकायां वृत्तावपि । इषोर्मात्रेव मात्रा यस्य स्थंडिलस्य तदिषुमात्रम् । एकस्य मात्रशब्दस्य लोपः । उष्ट्र-मुखवत् । तच्च तदवरं वा इषुमात्रावरं । अतिनिकृष्टमित्यर्थः । सर्वतः सर्वासु दिक्षु चतसृष्वित्यर्थः । चतसृष्वपि दिक्षु इषुप्रमाणं ततोऽधिकं वा चतुरस्रं स्थंडिलं गोमयेनोपलिप्येति । अत्रेषुलक्षणं प्रयोगपारिजाते- इषुर्नामारत्नित्रयं त्रिररत्निरिषुः स्मृतः इत्यभि धानात् । अत्र स्मार्तग्रंथेषु सर्वत्रारत्निः सार्धद्वाविंशत्यंगुल परिमितकूर्पराधः कनिष्ठिकाग्रपर्वांतः । अत्र श्रौतग्रंथमतेतु अरत्निशब्देन कात्यायनादिभिरुक्तः चतुर्विंशत्यंगुलो हस्त एव ग्राह्यः । नतु सार्धद्वाविंशत्यंगुलमितः । श्रुतिसूत्रयोरेकवाक्या र्थत्वात् । तस्य पूर्वादिषु शतहोमादिपरत्वेन सावकाशत्वात्

यथाश्रुतोवार्थः । अत्र रामवाजपेय्यां कात्यायनसूत्रम् - पंचारत्निः पुरुषः पुरुषो दशपदो द्वादशांगुलं पदं प्रक्रमस्त्रिपद इति । चतुर्विंशत्यंगुलिभिर्मिमीत इति चेत्यत्रारत्नेः चतुर्विंश-ग्रंगुलता स्फुटैवोक्ता तेन अरत्नेर्हस्तस्य चतुर्विंशत्यंगुलानि अरत्नित्रयस्यद्विसप्ततिरंगुलानि तेषु चतुर्धाविभाजितेषु एको भागोऽष्टादशांगुलं पूर्वोक्तारत्निपक्षे अरत्नित्रयस्य सार्धसप्तषष्टिरंगुलानि तेषु चतुर्धाविभजितेषु एको भागो यवोनसप्तदशांगुलानि । अष्टादशांगुलं स्मार्ताग्नेः कुंडस्य स्थंडिलस्य वा मध्यमायामसूत्रं सैव करणी । करणीनाम यावन्मितया रज्वा कुंडं क्रियते सा करणी । सा तु शुल्बादौ प्रसिद्धा यद्वा भट्टैः प्रयोगरत्ने स्मार्ताग्नेरायतनं चोक्तं संग्रहे अरत्निमात्र मग्न्यर्थं कार्यमायतनं बुधैः । पिशीलिमात्रमित्येके तदप्यंसांतरं भवेदिति । यद्वा तत्रैव षोडशांगुलमष्टादशांगुलं विंशत्यंगुलं सार्धद्वाविंशत्यंगुलं चतुर्विंशत्यंगुलं वाऽऽयतनं मेखलात्रययुक्त-मुक्तम् । तत्रैतेषां प्रकाराणां मध्मे यथारुचि कर्तव्यं । तत्र चतुरस्त्र प्रकारो वाजपेय्यां – व्यासद्विगुण रज्वंतं पाशौ कृत्वां=कर्षेदिमां । व्यासार्धमाने शंक्वधं सार्धेऽस्मिन् कर्षणाय च । प्राच्यंत शंक्वोस्तत्पाशौ कृत्वावा कर्षकर्षणे । शंक्वके वाक्श्रोणि-रेवमुदग्व्यत्यस्य चांसकौ । सुगमत्वादयमेव प्रकार उक्तः स्मृति-संग्रहे । नित्यहोमेतु कुंडं स्यान्मेखलात्रयसयुतं । भूमेरूर्ध्वं प्रकुर्वीत चतुर्विंशांगुलं शुभम् । मेखला चोन्नता कार्या त्वेकैका चतुरंगुला । द्व्यंगुला विस्तृतैकैका भूमेश्च द्वादशांगुला ।। इति ।।

।। अथाग्न्याधान नक्षत्राणि ।।

अग्न्याधानं कृत्तिकासु रोहिण्यां मृगशिरसि फल्गुनीषु

विशाखयोरुत्तरयो: प्रोष्ठपदयोरित्याश्वलायनसूत्रम् । कृत्तिका- रोहिणी मृगशीर्ष पुनर्वसु पूर्वा उत्तरा हस्त चित्रा स्वाती विशा- खानुराधाश्रवणउत्तराभाद्रपदा: इत्यापस्तंब सूत्रोक्तानि नक्षत्राणि । पुष्यज्येष्ठारेवती एतान्यपि ज्योति: शास्त्रोक्तानि । आश्व- लायनादिसर्वैरुक्तास्वपि कृत्तिकासु न कर्तव्यं । गृहांस्तस्याग्निर्दा- हको भवतीति श्रुतिसूत्रयोर्निषेधश्रवणात् । काश्यामेवं विधानु- ष्ठानदर्शनाच्च । एतेषूक्तनक्षत्रेषु अपूर्वमग्न्याधानं कर्तव्यम् । पुनराधाने तु न नक्षत्रादिनियम इत्युक्तम् । आपस्तंबश्रौतसूत्रां- ङविलायां पुनराधाने अर्धाधाने च न ऋतुपर्वनक्षत्रादिनियम इति । बौधायनीय यज्ञतन्त्रे — एवं सत्यपि विवाहोत्तरं बहुकालमग्नि विच्छेदे जाते सति उक्तनक्षत्रादि शुभं दिनं विचार्यैव प्रथमपुन: संधानं याज्ञिका: कारयन्ति कुर्वंति च । तदनुष्ठानं दृष्ट्वैव उक्तनक्षत्रेषु शुभेऽहनि उक्तप्रायश्चित्तपूर्वकं पुन: संधानं कुर्यादि- त्युक्तम् । तथा पुण्याहवाचनादिकमपि । तत्व तु एतावत् । तथा च कारिका - पुंस:सवन सीमन्त चौलोपनयनेष्विह । विवाहे चानलाधेयप्रभृति श्रौतकर्मणि ।। विच्छिन्नाग्नेरपहृताग्ने: समारूढेषु नष्टारणीकस्य च कालोनावेक्ष्य: । निमित्तानन्तरमेव पुन: संधानं कार्यमित्युक्तं प्रायश्चित्तप्रदीपादौ ।। तत्रादावने- कभार्यश्च यजमानस्तेव पूर्वस्मिन् गृह्याग्नौ द्वितीयादिविवाहस्य विवाहहोमो न कृतस्तदा प्रयोगरत्ने शौनकोक्तमग्निद्वय संसर्ग विधिं कुर्यात् । ततो भट्टैर्लिखितत्वात् पुनराधेयस्थले — समा रूढे समिन्नाशे पुनराधेयमिष्यते । वक्ष्यामि पुनराधेयं जयंत स्वामिनो मतं । अग्न्याधेयिक संभारान् यथासंभवमाहरेत् ।

संभारेष्वाद्दधात्यग्निं श्रोत्रियादि गृहाहृतमितिकारिकायामुक्त-त्वात् समारूढ समिन्नाशे सत्यग्न्यायतने यथालाभं सिकतादि संभारान्निक्षिपेत् । ते च संभाराः - सिकताः पद्मपत्रंच वराहवि-हृता चमृत् । सूदमाखूत्करं चोषं वल्मीक वपशर्कराः ॥ उदुंब-राशनिहृतं पर्णाश्वत्थविकंकताः । शम्यंकुराश्च विज्ञेया आधान-द्रव्यसंज्ञिताः इति । एते बौधायनीयादि श्रोतसूत्रेऽपि प्रसिद्धाः । ततस्तेषु संभारेषु तं गृह्याग्निं प्रतिष्ठापयेत् । अग्न्याधेयिकसंभाराः समारूढसमिन्नाशे न प्राप्ते पुनराधेय एव ग्राह्याः न तु पुनः संधाने । पुनराधेयं पुनः संधानात्कर्मांतरं । यदि पूर्वस्मिन् गृह्याग्नौ द्वितीयादि विवाहस्य विवाह होमः कृतस्तदा तेनैवा-ग्निना द्वितीयादि पत्नी गृह्यकर्मसु सहाधिकारिणीत्युक्तत्वात् । पत्नीभ्यां पत्नीभिर्वाऽन्वारब्धः पुनः संधानमेव कुर्यात् तदा नाग्निद्वय संसर्गविधिः ॥

॥ अथाग्निद्वयसंसर्गविधिः ॥

अत्र प्रासंगिकं किंचिदुच्यते । प्रयोगरत्ने - सदारोऽन्यान्पु-नर्दारानुद्वोढुं कारणांतरात् । यदीच्छेदग्निमान् कुर्वन् क्व होमोऽस्य विधीयते । स्वाग्नावेव भवेद्धोमो लौकिके न कदा-चनेति । अयंचनियमः संभवे ग्रामांतरादौ असंभवेतु लौकिकाग्नौ हुत्वा तयोर्यथाकालं वक्ष्यमाणसंसर्गविधिः कार्य इति । सिंधौ त्रिकाण्डमण्डणेऽपि । आद्यायां विद्यमानायां द्वितीयामुद्वहेद्यदि । तदा वैवाहिकं कर्म कुर्यादावसथेऽग्निमान् ॥ सुदर्शन भाष्येतु । द्वितीयविवाहहोमो लौकिक एव न पूर्वोपासन इत्युक्तम् । इदं

चासंभवे, तत्र शौनकः-अथाग्न्योर्गृह्ययोर्योगः सपत्नीभेद जातयोः। सहाधिकारसिध्यर्थमहं वक्ष्यामि शौनकः । अरोगामुद्वहेत्कन्यां धर्मलोपभयात्स्वयं । कृते तत्र विवाहे च व्रतांते तु परेऽहनि । पृथक् स्थंडिलयोरग्निं समाधाय यथाविधि । तंत्रं कृत्वाज्यभा-गांतमन्वाधानादिकं ततः । जुहुयात्पूर्वपत्न्यग्नौ तयान्वारब्धा आहुतीः । अग्निमीळेपुरोहितं सूक्तेन नवर्चेनतु ।। समिध्येनं समारोप्यायंते योनिरित्यृचा । प्रत्यवरोहेत्यनया कनिष्ठाग्नौ निधाय तं । आज्यभागांत तंत्रादि कृत्वारभ्य तदादितः । सम-न्वारब्धा एताभ्यां पत्नीभ्यां जुहुयाद्घृतं । चतुर्गृहीतमेताभि ऋंग्भिः षड्भिर्यथाक्रमं ।। अग्नावग्निश्चरतीत्यग्निनाग्निः समिध्यते । अस्तीदमितितिसृभिः पाहिनो अग्न एकया । ततः स्विष्टकृदारभ्य होमशेषं समापयेत् । गोयुग्मं दक्षिणादेया श्रोत्रि-यायाहिताग्नये । पत्न्योरेका यदि मृता दग्ध्वा तेनैव तां पुनः । आदधीतान्यया सार्धमाधान विधिना गृही इति । अयमत्र प्रयोगः । द्वितीयादि विवाहान्ते शुभदिने प्राणानायम्य देशकालौ स्मृत्वा मम विवाहद्वयेन जातयोर्गृह्याग्न्योः संसर्गमहं करिष्ये । इति संकल्प्योदक् संस्थयोर्द्वयोः स्थंडिलयोरुपलेपादि पूर्वकं क्रमेण गृह्याग्नी प्रतिष्ठाप्य प्रथमाग्नावन्वादध्यात् । तत्र क्रमः । अस्मिन्नग्निद्वयसंसर्गकर्मणि अन्वाधानमहं करिष्ये । अस्मिन्न-न्वाहितेग्नावित्याद्याज्यभागांतेऽत्रप्रधानं अग्निं नववारमाज्ये-नाग्निस्विष्टकृतमित्याद्याज्यभागांतं कृत्वा आद्यया पत्न्यान्वा-रब्धो नवाज्याहुतीर्जुहुयात् । अग्निमीळ इति नवानां मधुच्छंदा अग्निर्गायत्री । अग्निद्वयसंसर्ग्र प्रधानाज्यहोमे विनियोगः ।

ॐ अग्निमीळे इति नवभिः स्वाहांताभिर्नवाहुतीर्हुत्वा प्रत्याहुति मग्नय इदं नममेत्युक्त्वा स्विष्टकृदादि शेषमुपस्थानांतं समाप्याग्ने त्वं न इति चतसृभिर्वोपस्थाय तमग्निमयंते योनिरिति समिधि समारोप्य द्वितीयाग्नौ प्रत्यवरोहेति तं प्रत्यवरोह्यान्वाधाने पूर्व-वदस्मिन्नग्निद्वयसंसर्गकर्मणीति आज्यभागांते अत्र प्रधानं षड्वार मग्निं चतुर्गृहीतेनाज्येन शेषेण स्विष्टकृतमित्याद्याज्यभागांतं कृत्वा स्रुचि स्रुवेण चतुर्वारं प्रभूतमाज्यं गृहीत्वा पत्नीभ्यामन्वारब्धस्ते-नाज्येनावयवशः षडाहुतीर्जुहुयादेभिर्मंत्रैः ते च । अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः । तस्मै जुहोमि हविषा घृतेन मा देवानां मोमुहद्भागधेयं मो अस्माकं मोमुहद्भागधेयं स्वाहा । अग्नय इदं नममेति त्यागः सर्वत्र । अग्निनाग्निरित्यस्य काण्वो मेधातिथिरग्निर्गायत्री । अग्निद्वयससर्गप्रधानाज्यहोमे विनियोगः। ॐ अग्निनाग्निः समिध्यते - ॥ अस्तीदमधि मंथनमिति तिसृणां गाथिनो विश्वामित्रोऽग्निरनुष्टुप् । अंत्ये द्वे त्रिष्टुभौ । अग्नि-द्वयसंसर्ग -। अस्तीदमधि मंथनं -। अरण्योर्निहितो जातवेदाः- ।ः उत्तानायामवभराचिकित्वान् - । पाहिनो अग्न इत्यस्य प्रगाथोऽ ग्निर्बृहती । विनियोगः पूर्ववत् । पाहिनो अग्न एकया - । गृह्यपरिशिष्टमते - स्रुवेणाष्टावाज्याहुतयः । ताश्च - अग्नि-नाग्निः समिध्यत इत्येकया । त्वं ह्यग्ने अग्निनेत्यस्यांगिरसो विरूपोऽग्निर्गायत्री । अग्निद्वयसंसर्ग० ॐ त्वं ह्यग्ने अग्निना० अस्तीदमधिमंथन० इति तृच उक्ताः । पाहिनो अग्न इति तृचस्य प्रगाथो भर्गोऽग्निर्बृहती अंत्ये सतो बृहत्यौ । अग्निद्वयसंसर्ग० ॐ पाहिनो अग्न एकया० पाहिविश्वस्माद्रक्षसो अराव्णः० आनो

अग्ने वयोवृधं० सर्वत्राग्नय इदं न ममेति त्यागः । एवं हुत्वा स्विष्टकृदादि होमशेषं समाप्य । आयतने अग्निं निधाय यथा-पूर्वं परिचरेत् । अत्रापि विच्छिन्नावग्नी चेत् तदा प्राणानायम्य मम विच्छिन्नस्य प्रथमगृह्याग्नेः पुनः संधानं करिष्ये इति संकल्प्य एवमेव मम विच्छिन्नस्य द्वितीयगृह्याग्नेः पुनःसंधानं करिष्ये इति संकल्प्य तत्तत्कृत प्रायश्चित्तपूर्वकं होमद्रव्य, स्थालीपाकद्रव्य, दान-पूर्वकं तथा तथा ज्येष्ठादिपत्नीसहितः विच्छिन्नगृह्याग्निपुनः संधान विधिनोदक् संस्थयोर्द्वयोः स्थंडिलयोः पृथक् पृथक् अग्निद्वय-मुत्पाद्य अग्निद्वयसंकल्पपूर्वकं प्रथमाग्न्यावन्वाधानादिकमेव कुर्यात् । इत्यग्निद्वयसंसर्गविधिः ॥

॥ अथ विच्छिन्नाग्निपुनः संधानविधिः ॥

तत्र पूर्वमग्निविच्छेदेन लुप्तानां स्वयं प्रातर्होमानां व्रीह्या-द्यन्यतमं होमद्रव्यं तथा च दर्शपूर्णमास स्थालीपाकयोरारंभे सति अग्निविच्छेदेन लुप्तानां दर्शपूर्णमासस्थालीपाकानां संपत्ति पर्याप्तं व्रीहिद्रव्यमाज्यं च येभ्यः केभ्यश्चिद् ब्राह्मणेभ्योऽहं संप्रददे नममेति संकल्प्य अग्निविच्छेदकालगणनया वक्ष्यमाणानां होम-द्रव्याणां मध्ये शक्तितारतम्येन यस्य कस्यापि द्रव्यस्य यथोक्त लक्षणाहुतीः संख्यया गणनां कृत्वा होमद्रव्यं, स्थालीपाकद्रव्यगणनां कृत्वा स्थालीपाकद्रव्यं च विप्रेभ्यो दद्यात् । अत्यंताशक्तौ तिल-द्रव्यस्य स्वल्पत्वात् सुलभत्वाच्च तत्र तिला एव देयाः सर्वथा द्रव्य दानं कार्यमेव। अत्रार्थे मूलभूतानि वचनानि। "यावत्कालमहोमी स्यात्तावद्द्रव्यमशेषतः । तावद्दानं च विप्रेभ्यो यथाहोमस्तथैव

तत्" । इति त्रिकाण्डमण्डणे भारद्वाजगृह्यवचनम् । सर्वत्र यावत्काल होमस्तावद्द्रव्यं दद्यात् । इति स्मृत्यर्थसारे । यावंत्यब्दान्यतीतानि निरग्नेश्च द्विजन्मनः । तावंति कृच्छ्राणि चरेद्धौम्यं दद्यात् द्विजातये इत्युक्तं कात्यायनकारिकायां । अन्यत्र पुनराधानं दानमेव तथैव च । अन्यच्च । चांद्रायणं वा हौम्यस्य दानं वापि समाचरेदितिस्वगृह्यकारिकायां ॥ अनारब्ध दर्शपूर्णमासस्य यजमानस्य न लुप्तदर्शपूर्णमास हौम्यद्रव्यदानमनारब्धत्वात् । अत्रापस्तंबप्रायश्चित्तीय वरदराजग्रंथमते – दर्शपूर्णमासानामनारब्धानामेवातिपत्तौ दैवान्मानुषाद्वाऽपराधादनारंभे पुनरारंभ एव कर्तव्यो नतु प्रायश्चित्तमिति । बौधायनीय प्रायश्चित्तप्रदीपेऽपि अनारब्धानां दर्शपूर्णमासादीनां प्रायश्चित्तं वैकल्पिकमिति द्वैधसूत्रे दर्शितम् । अत्र वैकल्पिक पदोपादानात् प्रायश्चित्तकर्तव्यताऽपि प्राप्यते । केचिद्याज्ञिकास्तथा कारयंति च । प्रायश्चित्ताद्येतदंतमापस्तंबशाखीयादीनामपि समानं । तेष्त्वग्निद्वयसंसर्गहोमे उल्लेखनाग्निप्रतिष्ठादि तंत्रं स्वकीयमेवानुष्ठेयम् एतावान्विशेषः । स तु तदीयगृह्याग्निपद्धतौ वक्ष्यते ॥ ततो देशकालौ संकीर्त्य मम विच्छिन्नस्य गृह्याग्नेः पुनःसंधानं करिष्ये इति संकल्प्य स्थंडिलोपलेपनोल्लेखनाग्निप्रतिष्ठापनादि कृत्वाऽन्वाधानं कुर्यात् । तद्यथा द्वे समिधौ गृहीत्वा देवतापरिग्रहाथ र्मस्मिन्नग्नौ जातवेदसमग्निमिध्मेन प्रजापतिं प्रजापतिं चाघार देवते आज्येन अत्र प्रधानं त्रिरग्निं पवमानं सकृदग्निं प्रजापतिं चाज्येन अर्यमाग्निं वरुणाग्निं पूषाग्निं प्रजापतिं च लाजद्रव्येण चतुर्वारं सूर्यासावित्रीमाज्येन शेषेण स्विष्टकृतमित्यादि परिस्त-

रणादि प्राकृतम् । पात्रासादने विशेषः । प्रोक्षणीं स्रुवं प्रणीतापात्रमाज्यपात्रं लाजशूर्पमिध्मार्बर्हिश्च दधिप्राशनपक्षे दधिचासादयेत् । आज्यसंस्कारादि प्राकृतं । तत्राज्येन सह लाजानामपि पर्यग्निकरणं । आज्योत्पवनासादनयोः कृतयोः लाजानां त्रिः प्रोक्षणं । स्रुवसंमार्जनादि पत्न्यान्वारब्ध इध्माधानाद्याघारांतं प्राकृतं कुर्यात् । न चक्षुषी । अत्र प्रधानं अग्नआयूंषीति तिसृणां शतं वैखानसा ऋषयः अग्निः पवमानो देवता गायत्री छन्दः । विच्छिन्नगृह्याग्नि पुनःसंधानाज्यहोमे विनियोगः । ॐ अग्न - आयूंषि पवसे० अग्निर्ऋषिः ० अग्ने पवस्व स्वपा० । अग्नये पवमानायेदं नममेति त्यागः । त्वमर्यमा वसुश्रुतोऽग्निस्त्रिष्टुप् । पुनः संधान० ॐ त्वमर्यमा भवसि० अग्नय इदं नमम । प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् । पुनः संधान० ॐ प्रजापतेन० प्रजापतय इदं नमम ।। अथ पत्न्याः क्षालितेंऽजलौ पतिराज्येनोपस्तीर्य द्विर्लाजानोप्य पंचावत्तीतु त्रिरोप्य शूर्पस्थानभिघार्य अंजलिस्थानपि सकृदभिघार्य तिष्ठन् तिष्ठंत्याः पत्न्या अंजलिं स्वकराभ्यां धृत्वा । अर्यमणं वरुणं पूषणमिति तिसृणां वामदेवोऽर्यमाग्निर्वरुणाग्निः पूषाग्निरनुष्टुप् गृह्याग्नि पुनःसंधानलाजहोमे विनियोगः । ॐ अर्यमणंनुदेवं० नामुतः स्वाहा इति पठित मंत्रांतेंऽजलिमविच्छिदंती अंगुल्यग्रैरंजलिवामपार्श्वेन वा पत्नी जुहुयात् । एवमग्रेऽपि अर्यमाग्नयइदं । ॐ वरुणं नु देवं० वरुणाग्नय इदं । ॐ पूषणं नु देवं० पूषाग्नयइदं । ततः शूर्पकोणेनावशिष्टान् लाजान् पतिः पत्नी वाभ्यात्मं प्रजापतिं ध्यायन् जुहुयात् प्रजापतयइदं लाजानां स्विष्टकृतं नास्ति शेषाभावत् ।

तत उपविश्याज्यं पतिर्जुहुयात् । आनः प्रजामिति चतसृणां सूर्या सावित्री सूर्यासावित्रीदेवता आद्या जगती द्वितीया त्रिष्टुप् अंत्ये द्वे अनुष्टुभौ । पुनः संधानप्रधानाज्यहोमे विनियोगः । ॐ आनः प्रजां जनयतु० । सूर्यासावित्र्याइदं । एवमग्रेऽपित्यागः । ॐ अघोर चक्षुरप०। ॐ इमांत्वमिन्द्रं०।ॐ सम्राज्ञी श्वशुरेभव० एषु चतुर्ष्वपि मंत्रेषु अस्वाहाकारं पठन् होमो न स्वाहाकारांते सूत्रेप्रत्यृचं ग्रहण स्य । यत्र स्यात् प्रत्यृचं शब्दस्तत्रैवं होम इष्यते ॥ ऋगंते तत्र होतव्यं स्वाहाकारं पठेत्ततः ॥ इति वृत्तावेवं व्याख्यानात् । ततः समंजंत्वित्यस्य सूर्यासावित्री सूर्यासावित्र्यनुष्टुप् । दधि प्राशने आज्यशेषेण हृदयांजने वा विनियोगः । ॐ समंजंतु एतेन स्वयं दधिप्राश्य पत्न्यै प्रयच्छेत् । सा तूष्णीं प्राश्नाति ।

हृदयांजन पक्षेऽपि पत्न्या तूष्णीं हृदयांजनं । अथा ज्येन यदस्य कर्मण इति स्विष्टकृतं हुत्वा इध्मसन्नहन होमादि कर्मशेषं समापयेत् ॥ अत्रकारिका । अन्यत्र पुनराधानं दानमेव तथैवच । तदत्रपुनराधानमित्थं कुर्वंति याज्ञिकाः ॥ उपलेपादिकं कुर्यादाघारांतं विवाहवत् । विवाहाज्याहुतीर्हुत्वा लाजाहोमो भवेदिह ॥ गृहप्रवेशनीयाश्च हुत्वा स्याध्दृद्‌यांजनं । परिणीयादि नास्त्यत्र लाजानावपतिस्वयं ॥ समानतंत्रकं चेह होमद्वयमिदं भवेत्। इति बहुकालमग्निविच्छेद पुनः सधाने त्रयस्त्रिंशद्ब्राह्मणा भोजनीयाः ॥ आवसथ्ये त्रयस्त्रिंशत् श्रौताधाने शतात्परमिति यज्ञपार्श्वोक्तेरावसथ्यतुल्यमिदं ॥ इति विच्छिन्नाग्नेः पुनः संधान प्रयोगः ॥ इतिश्रीमदारडोपनामक नारायणभट्टकृते गृह्या ग्नि सागरे आयतनादि पुनः संधानांतं निरूपणं ॥

प्रायश्चित्त संकल्पस्थले तत्तन्निमित्तोक्त प्रयोगरत्नादिग्रंथांतरा

द्विचार्यं तथा संकल्पं कुर्यादिति प्रागुक्तं । तत्र प्रयोगरत्ने नष्टाग्नि पुनः संधानप्रयोगः ।। अत्रप्रमादादग्निनाशे यजमानः पत्न्या सह स्नानादिना शुचिर्भूत्वा संकल्पयेत् । देशकालौ संकीर्त्य मम प्रमादादग्नित्यागदोष परिहारद्वारा श्रीपरमेश्वर – प्रायश्चित्तं करिष्ये इति संकल्पयेत् ।। तत्र त्रिरात्रमग्नित्यागे (नाशे) प्राणायामशतं विंशतिरात्रे एकदिनोपवासः मासद्वये त्रिरात्रोपवासः । अब्दे प्राजापत्यकृच्छ्रः । एवं त्यागकालानुसारेण प्रायश्चित्तं कुर्यात् । आयतनं गोमयेनोपलिप्योल्लिख्य यथालाभं सिकतादि संभारान् निदध्यात् । ते यथा-सिकताः पद्मपत्रंच वराह विहता च-मृत् । सूदमाखूत्करं चोषवल्मीकवपशर्कराः ।। उदुंबराश्च नि हतं पर्णाश्वत्थविकंकताः । शम्यंकुराश्च विज्ञेया आधानद्रव्य संज्ञिताः । ततः श्रोत्रियागारादाहृतमग्निं विधिवत् प्रतिष्ठाप्याग्नेः प्रायश्चित्तस्थले वक्ष्यमाणमौपासनाग्न्यनुगमन निमित्तं प्रायश्चित्तं । यदुक्तं तत्रकार्यम् । आलस्यादिना बुद्धिपूर्वकमग्नित्यागे तत्तत्कालानुसारेणेदं प्रायश्चित्तं । द्वादशाह पर्यन्तं त्रिरात्रोपवासः । मासपर्यंतं द्वादशरात्रमुपवासः । अब्दपर्यंतं मासं पयोव्रतं । द्विवर्षपर्यंतं चांद्रायणं सोमायनंच । तदूर्ध्वमब्दकृच्छ्ं । धनिनो गोदानं चेति प्रयोगपारिजाते । स्मृत्यर्थसारेतु द्वादशाहातिक्रमेत्र्यहमुपवासः । मासातिक्रमे द्वादशाहमुपवासः । संवत्सरातिक्रमे मासमुपवासः। पयोभक्षणंवा इति विशेषः । एवं कालविलंबे संकल्पपूर्वकं प्रायश्चित्तं कृत्वा पुनः संधानं ।। यत्रतु अग्निविच्छेद निमित्तेन केनचिदग्निविच्छेदः कालविलंबश्च नास्ति तत्राकृत्वैव प्रायश्चित्तं पुनः संधानं कार्यं । तत्र अथ विच्छिन्नस्यगृह्याग्नेः पुनः सन्धान प्रयोग इत्यादि लाजहोमप्र युक्तं पुनः संधानमुक्तं

तदत्रग्राह्यं ।। अथ नास्तिवयाद्विसृष्टस्याग्नेः पुनः संधानं ।

तत्र कर्ता संकल्पपूर्वकं स्त्रिया सहोपोष्य परेद्युः कृत नित्यक्रियः संकल्पपूर्वकं प्रायश्चित्तं कुर्यात् । तद्यथा : द्वादशाह पर्यंतं यथाशक्ति सुवर्णदानं । मासद्वय पर्यंतं कृच्छं । मासचतुष्टय पर्यंतमतिकृच्छ्रम् । षण्मास पर्यंतं पराकः । ततोऽब्द पर्यंतं मासं पयोव्रतं । अब्दे पूर्णे त्रैसासिकव्रतं । ततः प्रतिवर्षं त्रैमासिकावृत्ति रिति । ततःकालगणनया सायं प्रातर्होम दर्शपूर्णमास स्थालीपाक होमद्रव्यदानं ।। ततः शुभेदिनेऽपराण्हे देशकालौ संकीर्त्य नास्ति वयाद्विसृष्टस्याग्नेः पुनः संधानं करिष्ये इतिसंकल्प्य। आयतनोप लेपादियथामिलित संभार निधानांतं कुर्यात् । संभाराश्च पलाशो दुंबराश्वत्थशमीवैकंकतांबुजं । वल्मीकोषर वाराह मूषकोत्खात मृत्तिकाः । शर्कराः सिकताः सूदाशंपाध्वस्त तरुत्वचः ।। यथा लाभं समाकीर्यं पातकाग्निं समुद्धरेत् । ततः इदंत एकं परऊतएकं इतिमंत्रेण भूर्भुवः स्वरिति चाग्निं प्रतिष्ठाप्य समिद्वयमादाय पुनर्देशकालौ संकीर्त्य नास्तिवयाद्विसृष्टाग्नेः पुनः संधा-नांगभूतमन्वाधानं करिष्ये । अस्मिन्नन्वाहितेऽग्नावित्यादि आज्य भागांते प्रधानमग्निमष्टवारं अग्निं पवमानं अग्निं पावकमग्नि शुचिं अग्निं पथिकृतं अग्निं तंतुमंतं चाज्येन यक्ष्ये । अग्निं स्विष्टकृ तमित्यद्याज्यभागांते स्रुवेण स्रुच्याज्यंच चतुर्गृहीत्वा । त्वमग्ने सप्रथा असीत्यात्रेयः सुतंभरोऽग्निर्गायत्री । नास्तिवयाद्विसृष्टाग्नेः पुनः संधानहोमे विनियोगः । ॐत्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः । त्वया यज्ञं वितन्वते स्वाहा । सर्वत्राग्नय इदं । योअग्नि मित्यस्य काण्वो मेधातिथिरग्निर्गायत्री । विनियोगः प्राग्वत् । ॐ

यो अग्निं देववीतये हविष्मां आविवासति । तस्मै पावक मृळय स्वाहा। तंतुं तन्वन्नित्यस्य देवा अग्निर्जगती। ॐ तंतुं तन्वन्रजसो० त्वं नो अग्ने तवेत्यस्य आंगिरसो हिरण्यस्तूपोऽग्निर्जगती । विनि० । ॐ त्वन्नो अग्ने तवदेवपायुभिः० । अग्नय इदं । त्वंनो अग्ने इत्यस्य गौतमोवामदेवोऽग्नी वरुणौ त्रिष्टुप् । विनि० । त्वं न्नो अग्ने वरुणस्य । अग्नीवरुणाभ्यामिदं ।। सत्वन्नइत्यस्य गौतमोवामदेवोऽग्नी वरुणौ त्रिष्टुप् । विनि० ।ॐसत्वंन्नो अग्नेवमो-। अग्नी वरुणाभ्यामिदं । ॐ मनोज्योति र्जुषतामाज्यं विच्छिन्नं यज्ञं समिमं दधातु । या इष्टा उषसो या अनिष्टास्ताः सं तनोमि हविषा घृतेन स्वाहा । मनसे ज्योतिष इदं ।। ॐ पुनस्त्वादित्या रुद्रा वसवः समिधतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेन त्वंतनुवो वर्धयस्व सत्याःसंतु यजमानस्यकामाः स्वाहा ।। आदित्येभ्यो रुद्रेभ्यो वसुभ्यो ब्रह्मभ्य इदं ।। एतैर्मन्त्रैः स्रुचा प्रत्याहुति चतुर्गृहीतेनाज्येन अष्टाहुतीर्हुत्वा । स्रुवेण स्थाल्याज्यमादाय ॐ अग्नये पवमानाय स्वाहा । ॐ अग्नये पावकाय स्वाहा । ॐ अग्नये शुचये स्वाहा । ॐ अग्नये पथिकृते स्वाहा । ॐ अग्नये तंतुमते स्वाहा इति पंचाज्याहुतीर्हुत्वा यथा लिंगं त्यक्त्वा स्विष्टकृदादि होमशेषं समाप्य आहिताग्नये आनडुहं दक्षिणां दद्यादिति ।।

। अथ ग्रथांतरोक्तं प्रायश्चित्तं ।

नास्तिक्याद्वा प्रमादाद्वाऽप्यालस्याद्वा कथंचन । तदा स्मृत्यंतराद्ग्राह्यं प्रायश्चित्तं तु तद्यथा।।अत्रनास्तिक्यादग्नित्यागे श्वाद्रपादः मासद्वयंतु योवह्नित्यजेदेवंसमाचरेत् । नास्तिक्यात् कृच्छ्रमेकंतु होमद्रव्यं ददातिच ।। तथा-योऽग्नि त्यजति नास्तिक्यात् प्राजापत्यं

समाचरेत् । मासद्वये तथा कुर्यादतिकृच्छ्रं चतुष्टयं ।। अतिकृच्छ्र मित्यर्थः । तथाच स एव । चतुष्टयेतु संपूर्णे मासानांतु हुताशनं । त्यक्त्वातिकृच्छ्रं कुर्वीत ततः पापात् प्रमुच्यते ।। षण्मास पर्यंतं पराकः । ततऊर्ध्वमब्दपर्यंतं मासं पयोव्रतं ।। तदाहोशना :- षण्मासं त्यजते वह्निं पराकं च समाचरेत् । ऊर्ध्वं पयोव्रतं कुर्यान्मा समेकं समाहितः ।। वर्षपर्यंतमेवाहुर्मुनयः संशितव्रताः ।। संवत्सरा दूर्ध्वंतु स्कांदे-ऊर्ध्वं संवत्सरादग्निं यस्त्यजेत्स पयोव्रतं । द्वैमासिकं ततः कुर्यात्त्रैमासिकमथापिवा । कालाल्पत्व महत्त्वापेक्षया विकल्पः ।। अथप्रमादादग्नित्यागे स्कंदपुराणे - हुताशनंतु यो विप्रः प्रमादा त्यजतिप्रभो । प्राणायामशतं कुर्यादुपवासस्ततः परं ।। प्राणायाम शतं त्रिरात्रपरित्यागे । अतऊर्ध्वं द्वाविंशतिरात्रिपर्यंतं उपवास इति विज्ञानेश्वरः ।। कूर्मपुराणे-षष्टिरात्रिं त्यजेदग्निं प्रमादाच्छृणुमे प्रभो । उपवासं ततः कुर्यात्प्राजापत्यं ततः परं ।। तत इत्यनेनत्रि रात्रमुच्यते ।। मासद्वयमग्नित्यागे त्रिरात्रमुपवासः । अतऊर्ध्वं संव त्सरपर्यंतमग्नित्यागे प्राजापत्यं अतऊर्ध्वं कालबहुत्वे प्राजापत्यबहुत्वं आलस्यादग्नित्यागे उक्तं कारिकासु यद्यालस्यात्यजेदग्निं द्वाद शाह परं तदा । उपवासत्रयं कुर्यात्पश्चान्मासं तथैवच ।। द्वादशाहमुपवासः । षण्मासातिक्रमे तथा - मासोपवासः कर्तव्यः पयोवा भक्षयेत्तथा । कूष्माण्डहोमः कर्तव्यः क्रमेणोभयमु- च्यते । द्विमासंवा त्रिमासंवा कालाल्पत्वमहत्त्वतः । पयोव्रतमतो र्ध्वंतु बहुकालात्यये सति ।। प्रायश्चित्तबहुत्वं स्यादेवमावत्सर त्रयात् ।। त्रिवर्षे वर्षमेकं तु प्राजापत्यं चरेद्व्रतं । एवमेवाधिकोऽ पि स्यात् कालेनैवाप्यतोधिकं ।। मिताक्षरायामप्येवं शंखेनापि

विशेष उक्तः। अग्न्युत्सादादि संवत्सरं प्राजापत्यं चरेद्गां च दद्यादिति ॥

अथ कृच्छ्रादि लक्षणमुच्यते ॥ मनुः। त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितं। त्र्यहं परंच नाश्नीयात् प्राजापत्यं चरेद्द्विजः। इति। आद्यत्र्यहेषड्विंशति ग्रासः। नक्ते द्वाविंशतिः। अयाचिते चतुर्विंशतिः सर्वेपि ग्रासाः कुक्कुटाण्ड प्रमाणाः। आस्य प्रवेशप्रमाणं वा। आवयोः पक्षयोः शक्त्या विकल्पः। अंत्यत्र्यहे न किंचिदश्नीयादिति विज्ञानेश्वरः। अथातिकृच्छ्रमाह याज्ञवल्क्यः अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्न भोजनः। आद्ये त्र्यह त्रये पाणिपूरणमात्रमन्नं भुंजीत नपूर्ववत् षड्विंशतिग्रासा दिग्राह्याः॥ यत्तुमनुनोक्तं। एकैकं ग्रासमश्नीयात्त्र्यहानित्रीणि पूर्ववत्। त्र्यहं चोपवसेदेदं अतिकृच्छ्रं चरेद्द्विजः इति ॥ तत्पाणि पूरण परिमितादल्पत्वाच्छक्त विषयं ॥ अथ पराकमाह याज्ञवल्क्यः। द्वादशाहोपवासेन पराकः परिकीर्तितः। ऋज्वर्थोयमर्धश्लोकः। एतदाचरणाशक्तौ प्रत्याम्नायो निरूप्यते॥ तदुक्तं कारिकासु। प्राजापत्येतु गामेकामतिकृच्छ्रं तथा द्वयं। पराके गोत्रयं देयं त्रयं चांद्रायणे तथा॥ मासं पयोव्रते सार्धं द्वयं देयं द्विजातये। धेनोरभावे दातव्यं तुल्यं मूल्यं न संशयः॥ तदभावे तु निष्कं स्यात्त दर्धं पाद एववा। विप्रा द्वादश वा भोज्या गायत्र्या वायुतं जपेत्॥ तिलहोम सहस्रं वा प्राजापत्यमिदं स्मृतं। तस्योपवासाः षड्भोज्या उपवासात्मके विधौ॥ पंच गुंजात्मको माषः ते सुवर्णास्तु षोडश। निष्कः सुवर्णाश्चत्वारः पंच वापि प्रकिर्तिताः॥ एवं स्यात्सर्वकृच्छ्रेषु प्रत्याम्नायास्तथा तथा॥ अथाश तविषये प्राजापत्य प्रत्याम्ना

य: स्मृत्यर्थसारे - गोदानेन त्रय: कृच्छ्रा दंडैस्तु दशभिर्भुव: । दश हस्तोदंड तद्दश मानेन भूदानेन त्रय:कृच्छ्रा इत्यर्थ:।अथवा द्विगुणश्चैव प्रत्याम्नायविधि: स्मृत: ।। अथवा त्रयस्थाने षड्भवतीत्यर्थ: । रुद्रैकादशनी कृच्छ्रो द्वादशांशो निवर्तनात् । दशहस्तेन दंडेन त्रिंश द्दंडान्निवर्तनं ।। तस्य द्वादशांश भूमिदानेन कृच्छ्र इत्यर्थ: । रुद्रैकादशनीत्यादिकं काश्यामेकस्मिन् स्मृत्यर्थसार पुस्तके दृष्टं स्थितं पुस्तकांतरेतु नदृश्यते तत्वंतु तदीश्वरो वेत्ति । योजनं सिंधुगा तीरे घृतहोम शतद्वयं । उदवासो वा शुष्क केशस्य द्वादशस्नान मित्यर्थ: । अत एव पंचतीर्थयात्रया प्राजापत्यद्वयं शिष्टा मन्यंते । संहिता पारायणं वा प्राणायाम शतद्वयं वा शक्त्या कुर्यात्। शक्त्या द्विगुण वृद्धिश्च गायत्र्या: सहस्रजपो वा द्वादश प्राणायामा वाऽ शक्त्या कुर्यात् । मासोपवास स्थाने धेनुद्विजभोजनादि शक्त्य पेक्षया द्वित्रि चतु: पंच षड्गुणं वर्धयेत् । उपवासस्थाने एक विप्र भोजनं तावद्धनधान्य वस्त्रादि दानं वा । मासोपवासस्थाने पञ्चदश प्राजापत्या: । चांद्रायणेऽष्टौ । अतिकृच्छ्रे त्रय: । इदं सर्वं प्राय: स्मृत्यर्थसारेणोक्तम् ।।

अथ होमारंभ: ।। तत्र विवाह होमोत्तरं सायमेवारंभ: । पुन: संधानोत्तरं तु सायमेव होमारंभ: । केषांचिद्याज्ञिकानां मते सायं, केषांचिन्मते होमकालमध्ये चेत्प्रातरपि । अत्रार्थे कांचित्कारिकां पठंति । आधाने पुनराधाने सायं होममुपक्रमेत् । स्थालीपाकं पौर्णमास्यामारभेत विचक्षण: । इति । एवमेवं केचि त्पठंति । अहश्चेत्प्रातराधानं हूयते प्रातराहुती: । सायाहुतीतु सायाह्ने आहुतीनां चतुष्टयमिति । श्रौतग्रंथमते द्वितीय कारिका

प्रामाणिकी । अत्र बौधायनप्रायश्चित्त प्रदीपादि श्रौतग्रंथेषु तु यदैव पुनराधानं तदैव होमारंभः । तत्रानुष्ठानमप्येवं । अत्र मूलं विच्छिन्नाग्नेरपहृताग्नेः समारूढेषु नष्टारणीकस्यच कालो नावे क्ष्यः । निमित्तानंतरमेव कामकानां गोपितृयज्ञवर्ज्यं संकल्प्य ऋत्विग्वरणाद्यविकृतमग्न्याधेयं कर्तव्यं । सर्वत्र प्रायश्चित्ताधाना नंतरं अतिपन्नान् सायमग्निहोत्रहोमान् सर्वान् पक्षहोम विधा नेन समस्यहुत्वा तदानीमेव संवेदादिना व्यवधानं कृत्वा । पुनर्वि हृत्य सर्वान् प्रातर्होमान् समस्य जुहुयात् । अतिपन्नहोमात्पूर्वं मनस्वतीहोमं तंतुमतीष्टिं कृत्वाऽतिपन्नाग्निहोत्रहोमान् कृत्वा कालेऽग्निहोत्रं जुहुयात् । बहुपर्वातिक्रमप्रायश्चित्तार्थं मन्वारंभणीयां कृत्वाऽतिपन्नयागार्थं पथिकृद्वैश्वानरौपासनं समानतंत्रेण प्रतीष्टिं वा सर्वार्थं सकृद्वा कृत्वाऽनंतरमतिपन्नं दर्शं वा पौर्णमासं वा कुर्यात् । इत्युक्तं बौधायनप्रायश्चित्तप्रदीपे । आपस्तंबादि ग्रंथेष्वप्येवमेव । नैवानुष्ठानं मीमांसकमते । मुख्यहोमकालेऽग्नरसत्वात् । स्मार्ते पुनः संधानोत्तरं स्मार्तहोमा रंभस्य द्विविधमनुष्ठानं काश्यां दृष्टमस्ति । युक्तस्तु बहुसंमतः सायमेव होमारंभः ॥

अथ प्रादुष्करणकालः । प्रादुष्करणमग्नेः प्रज्वलनं । तत्तु प्रादुष्करणहोम कालौ व्याख्यातौ इति सूत्रवृत्तौ । गार्हपत्यं प्रज्वा ल्येत्यनेनोक्तं । कात्यायनः- सूर्येतु शैलमप्राप्ते षट्त्रिंशद्भिरथांगु लैः । प्रादुष्करणमग्नीनां प्रातर्भासामदर्शने ॥ तत्प्रादुष्करण कालस्य कालात्यये समस्तव्याहृतिभिरेकाहुतिः कार्या प्रायश्चित्त विशेषानुपदेशात् ॥

अथ होमकालः । अस्तमिते होमः । एवं प्रातः सूर्योदयं

व्युषित उदिते वेत्यादि सूत्रद्वयादस्तमयानंतरं उदयानंतरं च होमप्रयोगपर्याप्तो मुख्यः कालः । प्रदोषांतो होमकालः । संगवांतः प्रात इत्याश्वलायन सूत्रं । प्रदोषांतो नवनाडिकः । संगवस्तु पंचधा विभक्तस्याह्नो द्वितीयो भागस्तदंतः प्रातरित्यर्थः ।। स्मृत्यर्थसारेऽपि । प्रातर्होमः संगवांतः प्रातस्त्वनुदितेऽथवा । सायमस्तमिते होमकालस्तु नवनाडिकः । आश्वलायनः । सम्यङ् निम्लोचति रवौ सायंच जुहुयुस्तदा । अथ प्रातर्हुनेन्नित्यमुदितेऽर्के यथाविधि । इति । कात्यायनोऽपि- यावत्सम्यङ् न भाव्यंते नभस्यृक्षाणि सर्वतः । लोहितत्वं च नापैति तावत्सायं तु हूयते । इति । मनुरपि- रेखामात्रस्तु दृश्येत रश्मिभिस्तु समाहितः । उदितं तं विजानीयात्तत्र होमं प्रकल्पयेत् ।। अत्र प्रदोषांतो होमकालः । संगवांतः प्रातस्तमतिनीय चतुर्गृहीतमाज्यं जुहुयात् । इति सूत्रान्मुख्यकालातिक्रमे समस्तव्याहृतिभिरेकाऽऽज्याहुतिः प्रायश्चित्तपूर्वकं गौणकाले होमं कुर्यात् । प्रायश्चित्त विशेषस्तु यत्र नोक्तो भवेद्यदि । होतव्याऽऽज्याहुतिस्तत्र भूर्भुवः स्वरितीरितमिति कारिकोक्तेः ।। बौधायनमते सायंहोमस्य गौणकालातिक्रमे सायंदोषावस्तर्नमः स्वाहेति स्रुवाहुतिं हुत्वाऽतिक्रांतमग्निहोत्रं हुत्वाऽनंतरं कालेऽग्निहोत्रं जुहुयात् ।। प्रातर्होमस्य गौणकालात्यये प्रातर्दोषावस्तर्नमः स्वाहेत्यादि पूर्ववत् इत्युक्तं दीपे सूत्रे च ।। अत्र यद्यपि स्वसूत्रे प्रायश्चित्तमुक्तमस्ति तथापि तत् स्मार्तसूत्रेण प्राप्नोति तत्रैव विशेषाम्नानात् ।। गौणकालस्तु स्मृत्यर्थसारे-आसायं कर्मणां प्रातराप्रातः सायकर्मणां । आहुतिं नातिपद्येत पार्वणं पार्वणांतरादिति ।।

पार्वणं पार्वणांतरादित्यनेन स्थालीपाकस्यापि गौणकाल उक्तः ॥ अथ होमकार्तारः ॥ स्वयं पत्न्यपि वा पुत्रः कुमार्यंतेवासी वेति सूत्रं । आश्वलायनः । पत्नी कुमारी पुत्रो वा शिष्यो वापि यथाक्रमं ॥ पूर्वपूर्वस्य त्वभावे विदध्यादुत्तरोत्तर इति ॥ स्मृत्यर्थसारे- होमे मुख्यो यजमानः पत्नी पुत्रस्तु कन्यका । ऋत्विक् शिष्यो गुरुर्भ्राता भागिनेयः सुतापतिः ॥ एतैरेव हुतं यत्तु तद्धुतं स्वयमेव तु ॥ हूयमानं तदन्येन फलं मध्यं प्रपद्यत इति ॥ आप्तस्तंबः- अहरहर्यजमानः स्वयमग्निहोत्रं जुहुयात् । पर्वणि वा । ब्रह्मचारी जुहुयाद्ब्रह्मणा । परिकीर्तितो भवति इति । दक्षः- ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः । एतैरपि हुतं यत्तु तद्धुतं स्वयमेवहीति । विटपति जामाता । एतैश्च यजमानानुज्ञया पत्न्यनुज्ञया वा होतव्यं ॥ तदुक्तं चंद्रिकायां- माधवे कूर्मपुराणे -ऋत्विक् पुत्रोऽथ वा पत्नी शिष्यो वापि सहोदरः । प्राप्यानुज्ञां विशेषेण जुहुयाद्वा यथाविधीति । पर्वणि तु सायं होमः स्वयमेव कार्यो नान्येन । स्वयं पर्वणि जुहुयादिति सूत्रात् । पर्वण्यपि यजमानाऽसन्निधौ तदनुज्ञयाऽन्यो जुहुयान्नतु सर्वथा लोपो नित्यत्वात् । अनेन दंपत्योः सन्निधाने अन्यतरसन्निधाने वा होमः कार्यः । उभयोरप्यसमक्षं हुतमहुतमेव । उभयोरप्यसमक्षं तु हुतमप्यहुतं भवेत् इति कात्यायनोक्तत्वात् । अति व्यग्रतायां तु तदनुज्ञयाऽन्यः कुर्यात् । असन्निधौ तु पत्न्याः स्यादध्वर्युस्तदनुज्ञया । उन्मादे प्रसवे चर्तौ कुर्वीतानुज्ञया विनेति मदनपारिजाते स्मृतौ । स्मृत्यर्थसारेऽप्येवं । पत्नीकुमार्योस्त्वहोमकमग्निपरिचरणमन्ये तु मन्यते इति । पत्नीकुमार्योस्त्वहोमक

इति कारिकायामुक्तत्वात् । स्त्रीणां मन्त्रानधिकारोक्तेः परिचरणमेव कर्तव्यं नान्यत् अन्येतु मन्यते इति ॥ यदा स्वयं पत्न्यपि वा पुत्रः कुमार्यंतेवासी वेत्यविशेषश्रवणेन पत्नीयोक्त्र सन्नहनवत् स्त्रीणां यावद्वचनं मंत्राधिकारात् पत्नीकुमारी पुत्रो वेत्याश्वलायन स्मृतिवाक्यादात्मनोऽसंभवे पत्नीपुत्रादय इति गृह्यकारिकाया मुक्तत्वात् । चन्द्रिकायां कामं गृह्येऽग्नौ पत्नी जुहुयात् सायंप्रातर्होमाविति गोभिलवचनात् स्मृत्यर्थसारोक्तत्वाच्च । पत्नीकुमार्योरपि समंत्रक प्रधान होमः । पाणिग्रहणादि गृह्यं परिचरेदित्येतत् खण्डवृत्तावप्येवमेव । स्मृत्यर्थसारे तु । स च होमः परिसमूहनपर्युक्षणरहितस्ताभ्यां कार्यं इत्युक्तं । तत्प्रायेणापस्तंब विषयमिति भाति । तेषां परिसमूहने अदितेऽनुमन्यस्वेत्याम्नानात् । अत्र प्रासंगिकं किंचिदुच्यते । आपस्तम्बानां तु पत्नीकुमारीकर्तृको होमो न भवत्येव । तेषां गृह्य सूत्रादावनुक्तत्वात् । न स्त्री जुहुयान्नानुपतिष्ठेत् इत्युक्तत्वाच्च सर्वशाखाप्रत्ययमेकं कर्मेति न्यायेन सूत्रांतरोक्तत्वात् । चंद्रिकायां कामं गृह्याग्नौ जुहुयात्सायं प्रातर्होमाविति गोभिलोक्तेः स्मृत्यर्थसाराच्च । सर्वसाधारणत्वात् विकल्पेन आश्वलायनशाखीयानां न स्त्री जहुयादिति निषेधः स्वसूत्रादौ होमविधानात् । अन्यदपि किंचिदुच्यते । तच्च विवाहहोमोत्तरकालीन सायंकाले भद्राव्यतिपातादि संभवे कृतेऽकृते वा गृहप्रवेशनीयहोमे प्रारंभणीयः । यद्यह्नि विवाह होमस्तदा तत्सायंकाले होमारंभः । रात्रौ विवाहहोमे उत्तरेद्युः सायं होमारंभः इत्युक्तं प्रयोगरत्ने । विवाहदिने सायंकाले यदि नवनाड्यो नातीताः तदा तदैव होमारंभः अन्यथा

परेद्युः सायमित्युक्तं सुदर्शनभाष्ये । जयंतमते तु प्रादुष्करणकालात्पूर्वं चेद्विवाहहोमस्तदा तत्सायं होमारंभोऽन्यथा परेद्युः सायमिति । निर्णयसिंधौ शौनकः- यस्मिन्नह्नि विवाहः स्यात्सायमारभ्य तस्य तु । परिचर्यां विवाहाग्नेः विदधीत स्वयं द्विजः ॥ यदि रात्रौ विवाहाग्निरुत्पन्नः स्यात्तथा सति । उपक्रमोत्तरस्याह्नः सायं परिचरेदमुमिति । संग्रहे आपस्तंबः- उद्वाहोद्वासनात्पूर्वमनले शांतिमागते । पुनर्लाजांतरं कर्म कृत्वा शेषं समापयेदिति । अत्रोक्तप्रकारे होमारंभे प्राप्ते स च केनचिन्निमित्तेन होमानारंभश्चेत्तदा प्रायश्चित्त प्रदीपोक्तप्रकारेण परेद्युः सायंकाले सप्तहोतारं मनस्वतीं च हुत्वा होमारंभं कुर्यात् । सप्तहोतारं प्रायश्चित्तंतु प्रायश्चित्त प्रकरणे वक्ष्यते । इतिप्रासंगिकं ॥ अथ होमद्रव्याणि ॥ प्रयोग रत्ने गृह्यपरिशिष्टे - पयोदधि सर्पिर्यवागूरोदनं तंडुलाः । सोमस्तैलमापो व्रीहयो यवास्तिला इति हौम्यानि । तंडुला नीवारा श्यामाकयावनालानां व्रीहिशालियव गोधूम प्रियंगवः स्वरूपेणापि हौम्याः, तिलाः स्वरूपेणैव । स्मृत्यर्थसारेतु- शालिश्यामाक नीवारा व्रीहिगोधूम यावकाः ॥ एतेषां तंडुला हौम्या यावनालाः स्वरूपतः ॥ प्रियंगवः शालयश्च गोधूमा व्रीहयो यवाः । स्वरूपेणापि हौम्याः स्युः स्वरूपेणैव ते तिलाः ॥ इति ॥

अथ होमप्रयोगः ॥ स्मृतिचंद्रिकायां अंगिराः- यो दद्यात्कांचनं मेरुं पृथिवीं च ससागरां ॥ तत्सायं प्रातर्होमस्य तुल्यं भवति वा नवा इति ॥ वायुपुराणे- दर्शं च पूर्णमासं च

ये यजंति द्विजातयः । न तेषां पुनरावृत्तिः ब्रह्मलोकात्कदाच-नेति ।। मनुः- वेदोदितं स्वकं कर्म नित्यं कुर्यादतंद्रितः । तद्धि कुर्वन् यथाशक्ति प्राप्नोति परमां गतिमिति ।। एतत् स्मार्तस्यापि प्रदर्शनार्थं । अत एव विष्णुः- श्रौतं स्मार्तं च यत्किंचिद्विधानं सर्वमादरात् । गृहे निवसता कार्यमन्यथा दोषमृच्छति ।। स्मार्तं गृह्याग्नौ कार्यं । तथा च याज्ञवल्क्यः- कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृहीति ।। गार्ग्यः- कृतदारो न तिष्ठेत क्षणमप्य-ग्निना विना । तिष्ठेत चेद्द्विजो व्रात्यस्तथा च पतितो भवेत् ।। व्यासः- यो गृहीतविवाहाग्निर्गृहस्थ इति मन्यते । अन्नं तस्य न भोक्तव्यं वृथा पाको हि स स्मृतः ।। स्यात्त्र्यग्निरथवैकाग्नि र्नाग्निहीनः कथंचन ।। गुप्तमग्न्यंबु नीत्वाथ होमं कुर्याद्यथा विधीति ।। स्मृत्यर्थसारः । स च यथा - यजमानः कृतसंध्यावंदनः पूर्वं प्रादुष्कृतस्याग्नेः पश्चिमत उपविश्य द्विराचम्य प्राणानायम्य देशकालौ निर्दिश्य अग्निरूपी परमेश्वरप्रीत्यर्थं सायं प्रातरौपासनहोमो करिष्ये । तत्रेदानीं सायमौपासनहोमं करिष्ये इति सङ्कल्प्य । अग्नौ चत्वारिश्शृगेति मंत्रेण यज्ञपुरुषमूर्तिं ध्यात्वा सोदकेन पाणिना समन्तात् प्रदक्षिणं पुनः पुनरुदकमादाय त्रिः परिमृज्योक्तवत् परिस्तीर्य त्रिः पर्युक्ष्य प्रागुक्तद्वादशद्रव्येषु प्रक्षालितार्द्रसित तंडुलादि पात्रमग्नेरुत्तरतो निधाय ज्वलता-दर्भेणावज्वल्य प्रोक्ष्य तेनैव त्रिः पर्यग्निकृत्वा तदुल्मुकंनिरस्याप उपस्पृश्य अग्नेः पश्चिमत आस्तीर्णकुशेषु समिधासह हवि-र्निधाय । यद्वा स्मृत्यर्थसारोक्तत्वात् त्रिः प्रोक्षणेनैव निधाय । विश्वानिन इति तिसृणां आत्रेयो वसुश्रुतोऽग्निस्त्रिष्टुप् । द्वाभ्यामर्चनेऽत्ययोरुपस्थाने विनियोगः । ॐ विश्वानिनो दुर्गहा

जातवेदः ३ इति पूर्वाभ्यामृग्भ्यां अष्टदिक्षु प्रतिपादं गंधा दिनाऽग्निमभ्यर्च्य तृतीयया बद्धांजलिर्नमस्कृत्य दक्षिणं जान्वा च्य समिधं तूष्णीमग्नौ प्रक्षिप्याप उपस्पृश्य । समिधि प्रदीप्तायां विधूमज्वालांगारेऽग्नौ शतसंख्याकान् प्रस्थस्य चतुःषष्टितमभागमितान्वा तंडुलान् दक्षिणहस्तेनादाय सव्यं पाणिं हृदि निधाय अंगुल्युत्तरपार्श्वेन देवतीर्थेन कायेन सौम्येन वेतीति स्मृत्यर्थसारोक्तेः समिन्मूलतो द्व्यंगुलप्रदेशे द्रवं हविः स्रुवेणैव पाणिना कठिनं हविरिति कारिकायामुक्तत्वात् स्मृत्यर्थसारोक्तत्वाच्च । द्रवद्रव्यं स्रुवेण कठिनं पाणिना अंगुल्यग्रे देवतीर्थं स्वस्यांगुष्ठांगुल्योर्मूलं कायं मध्येंगुष्ठांगुल्योः पित्र्यं मूले त्वंगुष्ठस्य ब्राह्मं इत्यमरः ।। ॐ अग्नये स्वाहेतिहुत्वा । अग्नय इदं नममेति त्यक्त्वा । पूर्वाहुतेर्भूयसीमाहुतिं प्रजापति पदं चतुर्थ्यंतं मनसा ध्यायन् वृत्तिकृदुक्ते उपांशुस्वाहेत्युक्त्वा प्रागुदगुत्तरतो वाऽसंसृष्टां हुत्वा । प्रजापतय इदं नममेति त्यक्त्वा पूर्ववदुपविश्य परिस्तरणं विसृज्य परिसमूहनपर्युक्षणे कृत्वोपस्थानं कुर्यात् । तत्र मंत्राः ।। अग्न आयूंषीति तिसृणां शतं वैखानसा ऋषयः । अग्निः पवमानो देवता गायत्री छंदः आग्न्युपस्थाने विनियोगः । ॐ अग्न आयूंषि पवस- । अग्नेत्वं न इति चतसृणां गौपायना लौपायना वा बधुः सबंधुः श्रुतबंधुर्विप्रबंधुश्चैकैकर्चा ऋषयः अग्निर्देवता द्विपदा विराट् छंदः । अग्न्युपस्थाने विनियोगः । ॐ अग्ने त्वं नो- । प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्, प्रजापत्युपस्थाने विनियोगः। ॐ प्रजापते नत्वत्- । तंतुं तन्वन् विश्वेदेवा अग्निर्जगती । अग्न्युपस्थाने विनि । ॐ तंतुं तन्वन्- । हिरण्यगर्भ इत्यस्य प्राजा

पत्यो हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् । प्रजापत्युपस्थाने । हिरण्य गर्भः समवर्तताग्रे- । एतैर्मंत्रैर्वायव्यदेशे प्रह्वः कृतांजलिरग्नि मीक्षमाण उपस्थाय पुनरुपविश्य न्यूनातिरिक्तत्वा च्छद्रार्थं विष्णु स्मरणं कृत्वा नेन होमेन भगवान् परमेश्वरः प्रीयतामित्युक्त्वा सर्वत्र होमाद्यग्निकर्म कृत्वा कर्मांतेऽग्न्युदक शेषं शुचिदेशे त्यजेत्तेनान्यत्कर्म न कुर्यान्नाग्न्युदकशेषेण कर्मादिकं कुर्याद्यदि कुर्याद्भूमौ जलं स्रावयित्वा तत्रांबपात्रं स्थापयित्वा चोद्धृत्य कर्माणि कुर्यादित्याचमनप्रकरणे स्मृत्यर्थसारोक्तत्वात् । अग्निं संरक्षेत्, द्विराचामेत् । एवं प्रातरुदयात्पूर्वं प्रादुष्करणं कृत्वा होमकाले पूर्ववत पूर्वांगानि कृत्वा ॐ सूर्याय स्वाहेति सायं द्रव्येणैव प्रथमाहुतं हुत्वा सायंकालीन द्वितीयाहुतिवत् द्वितीया हुतिं हुत्वा परिसमूहनादि कृत्वा उपस्थानं कुर्यात् । तत्र मंत्राः । सूर्यो नो दिवस्पान्वित्यस्य सौर्यश्चक्षुः सूर्यो गायत्री । सूर्योपस्थाने विनि । ॐ सूर्यो नो दिवस्पातु- । चित्रं देवाना मित्यस्य कुत्सः सूर्यस्त्रिष्टुप् । सूर्योपस्थाने । ॐ चित्रं देवानां । उदुत्यमित्यस्य काण्वः प्रस्कण्वः सूर्यो गायत्री । सूर्यो । ॐ उदुत्यं जात- । नमो मित्रस्येत्यस्य सौर्योभितपाः सूर्यो जगती । सूर्योप- । ॐ नमो मित्र य- । एतैश्चतुर्भिः सूर्यं । प्रजापतेनत्वत् । हिरण्यगर्भः । इतिद्वाभ्यां प्रजापतिं चोपस्थायाचामेदिति प्रात र्होमविधिः ॥ अत्राचारात् पूजात्वेन पुण्यातिशयाच्च अग्नेर्धूप दीपनैवेद्यप्रदक्षिणाः कार्याः । एतावत् प्रयोगरत्नोक्तं ॥ अत्र यस्य पुनः श्रौताग्निः स्मार्ताग्निश्चोभौ स्तस्तस्यानुष्ठाने विशेषमाह। स्मृतिचंद्रिकायां भरद्वाजः । होमं वैतानिकं कृत्वा स्मार्तं कुर्याद्विचक्षणः । स्मृतीनां वेदमूलत्वात् स्मार्तं केचित्पुरा

विदुः ॥ शातातपोऽपि । श्रौतं यत्नात् स्वयं कुर्यादन्योऽपि स्मार्तमाचरेत् । अशक्तौ श्रौतमप्यन्यः कुर्यादाचारमानतः । इति ॥ अथा यत्र राजसेवादिना एतावंतं होमं कर्तुमशक्तः सन्नास्तिकश्चेत् यजमानस्तेन सूत्रवृत्तिकारोक्त एव होमः कार्यो न तु स्मृत्युक्तमुपस्थानादि । बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म प्रचोदितं । तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥ इत्युक्तत्वात् ॥ तस्य प्रयोगः ॥ सायमौपासनहोमं करिष्ये । वह्निं परिसमूह्य परिस्तीर्य पर्युक्ष्य होमद्रव्यं संस्कृत्य पुष्पाद्यै रायतनमलकृत्य । अग्नये स्वाहा । अग्नय इद नमम । प्रजापतये ध्यायन् स्वाहेत्युक्त्वा जुहुयात् । प्रजापतये इदं । परिस्तरणादि विस्रस्य परिसमुह्य पर्युक्ष्य ॥ प्रातस्तु प्रातरौपासनहोमं करिष्ये । सूर्याय स्वाहेति विशेषोऽन्यत्समानं ॥ स्वयं होमादौ फल चन्द्रिकायां श्रुतिः । अन्यैः शतं हुताद्धोमादेकः शिष्यहुतो वरं । शिष्यैः शतहुताद्धोमादेकः पुत्रहुतो वरं ॥ पुत्रैः शतहुताद्धोमादेकिकोऽध्यात्मना वरं इति ॥ अत्र होमे पूर्वं यानि द्रव्याण्युक्तानि तत्र पक्वद्रव्याणामधिश्रयणं, अपक्वानां नाधिश्रयणं । अत्र कात्यायनपरिभाषा सूत्रं । अनधिश्रयणं स्मृतिसामर्थ्याभ्यामिति । एतस्मिन् सूत्रे अयमर्थः स्पष्ट एव । स्मृतिवाक्यं सामर्थ्यं नाम पयोयवागू सर्पिरोदनमेतानि पक्वानि । एतेषा मधिश्रयणसद्भावात्तदर्थमंगारपृथक्करणमपि, कारिकायां । पयः प्रभृतिषु त्वेकं संस्कुर्यादग्निहोत्रवत् इत्युक्तत्वात् । संस्कारो वृत्तौ स्मृत्यर्थसारे चाप्युक्तः । स च गृह्ये संस्कारो मंत्रवर्जित इति ॥ स्मृत्यर्थसार - दधि तंडुलसोम तैलव्रीहि यव तिलादीन्य पक्वानि दधिव्रीह्यादीनामपक्वानां श्रपणाभावान्नाधिश्रयणं ।

तदभावात्तदर्थागारपृथक्करणमपि नास्तीत्युक्तं । श्रौताग्नि-होत्र होमस्थले तत्र तेषां द्रव्याणां पर्यग्निकरणं प्रोक्षणं च द्वयमेव कुर्यात् । स्मार्तेऽग्निहोत्रेऽपीदं समानमेव ।। एतस्य मूलमपि शौनके दृष्टमस्तीति मम प्रतिभाति । ग्रंथालाभान्न लिखितं । येन द्रव्येण सायं होमस्तेनैव प्रातर्होमः कार्यः । कर्तृनियमोऽप्येवं ।। प्रतिनिधिस्तु एकप्रयोग पर्यवसाय्येवेत्युक्तं वृत्तिकृता । नष्टायां ज्वलयेद्येन सायं होमः कृतः पुरा । पयसा-ऽन्येनवा प्रातस्तेनैवेत्याह वृत्तिकृत् ।। इति कारिकायामप्युक्तम् । हौम्यग्रहणस्वरूपं प्रायश्चित्तप्रदीपे । अग्निहोत्रहोमे पयसा नित्यहोमः । पयोऽभावे व्रीहिभिर्यवैर्वा तयोरभावे श्यामाकादि भिरारण्यैस्तेषामभावे तैलं दधिपयः सोमोयवागूरोदनं घृतं । तंडुला मांसमापश्च दश द्रव्याण्यनुक्रमात् ।। इत्येषामन्यतमेन जुहुयात् । दध्नोऽधिश्रयणं नास्ति । आज्यतैलयोः परिषिंचन-स्थाने दर्भाग्रद्वयं निक्षिपेत् । ओदनपक्षे सिद्धमोदनमानीय जुहुया-त् ।। यवागूमंत्रैरेव श्रपयेत् । तंडुलानां च नाधिश्रयणं सेचनं व्रीह्यादीनां चेति । एतन्मूलभूतमापस्तंबाग्निहोत्र सूत्रं माण्ड-विलाच । तथा संग्रहे अंगुल्यग्रैर्न होतव्यमकृत्वांगुलिभेदनं । अंगु-ल्युत्तरपार्श्वेन होतव्यमिति तु स्मृतिरिति । दानकमलाकरे छंदोगपरिशिष्टे- पाण्याहुतिर्द्वादश पर्वपूरिका रसादिना चेत् स्रुवपर्वपूरिका । दैवेन तीर्थेन च हूयते हविः स्वंगारिणि स्वर्चिषि तच्च पावके ।। सिद्धौदनग्रहणज्ञापकं सूत्रतोऽपि लभ्यते । तच्चै-ताभ्यो गृहसिद्धान्नेन हुत्वेत्युत्सर्जनसूत्रवृत्तौ । गृहपक्वं समीपेऽग्ने-र्निधायाज्यमधिश्रयेदिति कारिकायां दृष्टमस्ति । नात्र लौकिका-ग्नौ पक्वस्य श्रौताग्नौ स्मार्ताग्निहोमशंका विशेष दर्शनादष्टका

श्राद्धं तत्पूर्वेद्युः श्राद्धेऽपूपद्रव्यपक्षे वृत्तिकारिकयोर्गृहसिद्धा उपादेया अपूपं जुहुयादिति सिद्धापूपग्रहणदर्शनाच्च । माधवे बृहस्पतिः- प्रस्थधान्यं चतुःषष्टिराहुतेः परिकीर्तितं । तिलानां तु तदर्धं स्यात्तदर्धं स्याद् घृतस्य तु । व्रीहीणां च यवानां च शतमाहुतिरिष्यते इति माधवीये बौधायनवचनं । तथा स्मृत्यर्थसारे- प्रस्थस्य चतुःषष्टिभागपरिमितमेकमवदानं तंडुलानां शतद्वयमपि उत्तरां भूयसीमिति सूत्रात् । ज्यायः स्विष्टकृदिति स्मृत्यर्थसारवचनाच्च बाधितं चत् प्रधानाहुतेराहुति परिमाणस्य चरितार्थत्वान्न दोषः । उत्तराहुतिर्याऽधिका गृह्यते सेदमंग तत्र भूयसीमिति वचनादत्राहुतिप्रमाणबाधः । उत्तराहुतेरंगत्वविधानं तु कात्यायनब्राह्मणेऽग्निहोत्रविषये स्पष्टं । सा या पूर्वाहुतिः साऽग्निहोत्रस्य देवता तस्मात्तस्यै जुहोत्यथ योत्तरस्विष्टकृद्भ्राजनमेव तस्मात्तामुत्तरार्धे जुहोतीति अनेनोत्तराहुतेरंगत्वमवगंतव्यं । अत एवोत्तराहुतेः पूर्वमग्निनाशे हिरण्य उत्तरां जुहुयादित सूत्रात्तदर्थं मग्न्युत्पत्तिर्नास्ति । प्राधान्यं चोत्तराहुतेरिति श्रौतवृत्तिः । तेनोतराहुतेः पूर्वं द्रव्यनाशे द्रव्यं सपाद्य तां जुहुयात् । सोत्तराहुतिः पूर्वाहुति संसृष्टा चेदापस्तंबोक्तं यत्र वेत्थेति मंत्रेण समिदाधानं प्रायश्चित्त। तत्रापस्तंबसूत्रं । यदि चोत्तरया पूर्वामभिजुहुयात् यत्र वेत्थ वनस्पते ऋ १ गामयेति वानस्पत्ययर्चा समिधमाधायेति । यद्वानुक्तत्वात् व्याहृतिभिरेकाज्याहुतिः । अनेन तत्तत्सूत्रेण च सर्व प्रधानाहुतीनां स्विष्टकृदाद्यंगाहुतिभिः संसर्गो न कार्य इति सिद्धं ॥

अथ पत्नीकुमारी कर्तृको होमः ॥ सायमौपासनहोमं करिष्ये । परिसमूह्य परिस्तीर्य पर्युक्ष्य होमद्रव्यं संस्कृत्य । अग्नये स्वाहा ।

अग्नय इदं । प्रजापतये स्वाहा । प्रजापतय इदं । परिस्तरणादि विसृज्य परिसमुह्य पर्युक्ष्य । प्रातस्तु प्रातरौपासनहोमं करिष्ये । परिसमूहनादि सर्वं सायंवत् । सूर्याय स्वाहा । सूर्यायेदं । प्रजापतये स्वाहा । प्रजापतय इदं । परिसमूहनादीनि कुर्यात् । इति पत्नीकुमारी कर्तृको होमः ।। अथापत्काले कर्तव्यो होम द्रव्यसमस्य प्रयोगः । देशकालौ संकीर्त्य श्रीपरमेश्वर प्रीत्यर्थं सायं प्रातरौपासनहोमौ समस्य करिष्ये इति संकल्प्य पूर्ववत् सायंकालीनाहुतिद्वयं हुत्वा पर्युक्षणादिकं कृत्वा किंचित्कालं स्थित्वा निमील्य वा पुनः पर्युक्षणादि समित्प्रक्षेपांतं कृत्वा श्वः कर्तव्य प्रातराहुति द्वयमपकृष्य हुत्वोपस्थानं कुर्यात् । एकैव चेत्समित् तदा सायं होमादावेव । उपस्थाने मंत्राः । हविष्पांतमिति पञ्चर्चस्य वर्गस्य आंगिरसो मूर्धन्वान् वामदेवो वा सूर्यवैश्वानरौ त्रिष्टुप् । प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् । उपस्थाने विनि । हविष्पांत मजरं स्वर्विदि ५ प्रजापते न त्वत् १ अन्यत्सर्वं समानं । पर्युक्षणाद्यंगजातं सकृत्कुर्यात् । तत्राश्वलायन स्मृतिः - सायंप्रातस्तनौ होमावुभौ सायं समस्य तु । सायंकालस्य मुख्यत्वादग्निहोत्रमिति श्रुतिः ।। समस्यं सायमारभ्य जुहुयात्सायमाहुती । परिषिच्याहुती प्रातर्हुत्वानु परिषेचयेत् । हविष्पांतं द्विदैवत्यमिति सूर्याग्नि दैवतम् । समस्ये पंचभिर्ऋग्भिः प्रजापते न नित्यश इति ।। अथात्र गृह्यपरिशिष्टे सायं प्रातर्होमौ सायं वा समस्येन्नतु प्रातः सायंहोमाविति । स्मृतिचंद्रिकायां मरीचिः । प्रवासी वाऽग्निहोत्रीयस्त्रिपंचाहश्च सप्त वा । दातव्यो होम एकाहे सायं प्रातः पृथक् पृथक् ।। तथा चात्रैव त्रिकांडे- अथापरः

समस्यस्य प्रकारः प्रतिपाद्यते । सायंप्रातस्तनौ होमावुभौ सायं समस्यतु ।। आपन्नो जुहुयात्तत्र समिदेकाऽथवा द्वयं ।। सायं होमस्य मुख्यत्वात्तदीयं तंत्रमिष्यते । चतस्र आहुतीः कुर्यात्तत्र द्वे सायमाहुती । द्वे प्रातराहुती सायं होमे चेका समिद्यदि। समित्कृत्वा द्वितीया चेत्सा भवेत् प्रातराहुतौ । त्रिः साय होम वन्मृज्यात्त्रिः प्रातर्होमवत् स्रुचं ।। उपस्थानं सकृत्कार्यं शेषं प्रकृतिरिष्यते । इति । स्मृत्यर्थसारेऽप्येवं । अत्र त्रिः सायं होमवन्मृज्यादिति वचनं द्रवद्रव्य पक्षे स्रुक् स्रुव संमार्गस्यावृत्ति परं ।।

अथामयादिगुर्वापदि पक्षहोमः ।

तत्र देशकालौ संकीर्त्य आमयाद्यापत्तौ अद्यावधि चतुर्दशी सायमवधिकान् सायमौपासनहोमानपकृष्यैकतंत्रेण करिष्ये इति संकल्प्य । पक्षादौ पक्षहोमः स्यात्समस्यो मध्यतो भवेत् । सायंप्रातः पृथक्कुर्यादेकस्मिन् वा निमित्ततः । इत्युक्तत्वात् प्रतिपदि सायंकाले समित्प्रक्षेपांतं पूर्वजातं कृत्वा आहुति प्रमाणेन तंडुलान् पात्रद्वये प्रतिपात्रं चतुर्दशवारं गृहीत्वा तिथि ह्रासवृद्धिभ्यां गणनया न्यूनाधिकं वा गृहीत्वा होमकाले प्रथम पात्रस्थान् अग्नये स्वाहेति सर्वान् जुहुयात् । ततः प्रजापत्यय गृहीतान् सर्वान् प्रजापतिपदं चतुर्थ्यंतं स्मरन् हुत्वोपस्थाना द्यंगजातं सकृत्कुर्यात् । एवं द्वितीयायां प्रातराद्यावधि आगामि पर्व प्रातरवधिकान् प्रातरौपासनहोमान् आकृष्यैकतंत्रेण करिष्ये इत्यादि सर्वं सायं होमवत् । विशेषस्तु प्रथमपात्रस्थान् सूर्याय स्वाहेति जुहुयात् । सायंकालवत् द्वितीयाहुतिं च हुत्वा उपस्थानाद्यंगजातं सकृत्कुर्यात् ।। इति पक्षहोमः ।।

अथ शेषहोमः ।। यदा कदाचिन्मध्ये आमयाद्यापत्तौ तस्मिन्न हनि सायंकाले अद्यावधि चतुर्दशी सायमवधिकान् सायं शेष होमानाकृष्यैकतंत्रेण होष्यामीति संकल्प्य इत्यादि पक्षहोम वत् । पात्रद्वये शेषतिथिगणनया तत्संख्यास्तंडुलान् प्रतिपात्रं गृहीत्वा पक्षहोमवत् सर्वं कुर्यात् । तथापरेद्युः प्रातः काले अद्यावधि प्रातरागामि पर्वावधिकान् प्रातः शेषहोमानाकृष्येत्यादि सर्वं सायंशेषहोमवत् । आपत्स्वपि पूर्वं पार्वणेष्टयोर्न प्रतीकर्षः इत्युक्तं प्रायश्चित्तप्रदीपे । अनेक स्थालीपाकापकर्षो न कार्यो मृत्युशंकां विना । अत्र पक्षहोम शेषहोमयोर्मूलं स्मृत्यर्थसार त्रिकांड मंडनयोः । आमयाद्यार्तमानापद्गतो वाध्वगतोऽपि वा । राष्ट्रभंगे धनाभावे गुरुगेहे वसन्नपि । अन्येष्वेवं प्रकारेषु निमितेष्वागतेषु च । समानमग्निहोत्राणां यथासंभवमाचरेत् ।। अग्निहोत्राणामित्यत्राग्निहोत्रहोमतुल्यः स्मार्ताग्नि होमः । य आहिताग्नेर्धर्मः स्यात्स औपासनिकस्य च इत्युक्तेः । अनातुरोऽप्रवासी च निश्चिंतोनिरुपद्रवः । पक्षहोमं तु यः कुर्यात्स चरेत्पतितव्रतं ।। आलस्येन लोभेनाश्रद्धया वा पक्षहोमान्न समस्येत् । अनापदि पक्षहोमे तंतुमतीष्टिः प्रायश्चित्तमित्युक्तं प्रदीपे । अग्नये तंतुमते त्वा जुष्टमिति स्थालीपाकः । निमित्तानामिहैतेषां निर्दिश्यैकं यदुच्यते । तत्सर्वेषु निमित्तेषु जानीयात्प्रतिपादितं । पक्षहोमानशेषान्वा शेषहोमानथापि वा ।। समस्य जुहुयात्तत्र प्रयोगोऽयं निरूप्यते । अशेषान् पक्षादि पक्षांतावधिकान् शेषान् यत्किंचिदधिकान् तावदग्रिकान् । प्रतिपद्युन्नयेत्सायमापद्यन्यत्र वा दिने । यावत्योपवसथ्याहात् प्राग्दिनानि भवंति हि ।। तावंति प्रतिगृह्णीयात्

चतुरुन्नयनानि तु ॥ पात्रांतर सहायायां नित्यायां प्रकृतौ स्रुचि । स्थूलं स्रुगंतरं वापि कृत्वा तत्र समुन्नयेत् । एका समि सकृद्धोमः सकृदेव च मार्जनं । उपस्थानं सकृत्कार्यं शेषं प्रकृतिरिष्यते । एवमेवोत्तरत्रापि प्रातर्होमान् समस्यतु । जुहोत्यौपवसथ्याहे प्रात र्होमावधीन् सकृत् । समारोपविधानेन समारोपयतेऽनलान् । य धार्यंतेऽथ वा धार्यान् धारयत्येव पूर्ववत् । एवं प्रतिपदं ऽन्यत्र यत्रापदुपजायते । तथैवोपवसथ्यात् प्राक् यत्र ह्यापद्विनश्यति । तृतीयायां चतुर्थ्यां वा पंचम्यामितरत्र वा । तदादीनां तदन्तानां होमानां स्यात्समस्यतु । आपदेवावधिर्होमः समासस्याभ्युपेयते । तस्मात्कदाचिदारभ्य यावतस्तावतोऽपि वा । आपत्काल समान् होमान् समस्येदेकपक्षजान् । अएतव द्विरात्राय त्रिरात्रादधि काय च । समस्य जुहुयाद्धोमानित्येव पठ्यते कठैः ॥ प्रवासिनो ऽग्निहोत्रस्य पंचाहं सप्त वा पुनः । सायं प्रातः पृथग्घोम एक स्मिन्नहनीति च । एवमेकत्र पक्षे ये होमास्तेषामशेषतः । न्यू-नानां वा समानः स्यान्न पक्षांतरवर्तिभिः ॥ स्मृत्यर्थसारेऽप्येवं । चंद्रिकायां मरीचिः । शरीरापद्भवेद्यत्र भयाद्यार्तिः प्रजायते । तथाऽन्यास्वपि चापत्सु पक्षहोमो विधीयते । आपस्तंबेऽपि । यायावरा हवै पुरा ऋषय आसन् । तेऽध्वन्यश्राम्यन् । तेऽर्धमा सायाग्निहोत्रं जुहुयुरिति । समस्यपक्षे शेषहोमः । पक्षहोमेषु सर्वत्रापि पर्वणि सायंहोमः पृथगेव । तथा च प्रतिपदि प्रात-र्होमः पृथगेव । तदुक्तं तत्रैव । सर्वथौपवसथ्याहे सायं होमः पृथ-ग्भवेत् ॥ तथैव यजनीयाहे प्रातर्होमो भवेत् पृथक् ॥ स्मृत्यर्थ सारेऽप्येवं ॥ अत्यंतापदादिना पर्वणि सायं होमः पृथक्कर्तुं नशक्यश्चेत् तदा पूर्वैः सह समासः । तदुक्तं तत्रैव । पर्वोपवास

शून्यं चेत्प्राप्तं केनापि हेतुना । तदा तत्सायं होमोपि पूर्वैः सह समस्यते ।। उपवासशून्यं नामाऽन्वाधान शून्यं । एवं पर्वोपवासशून्यमिति । एतद्यदा केनचिन्निमित्तेन भाविपर्वण्यन्वाधानं न भविष्यतीति ज्ञातं तदा तत्सायं होमस्य पूर्वैः सह समासः। अत्र पर्वांते पृथग्घोमः । पक्षादौ च पृथग्घोम इत्युक्तेऽपि मैत्रायणीय परिशिष्टे पृथग्घोम इत्युक्तं तच्चैवं । ऋषयो हस्म प्रमायुका आसन् । तेऽग्निहोत्रेणातपंस्ते समस्य होमानपश्यंस्तथा द्विरात्राय षड्रात्रायार्धमासाय मासायाऽग्निहोत्रमजुहवुस्तस्माद्यायावर आमयाद्यार्ता वा अर्धमासायाग्निहोत्रं जुहुवुरिति । पूर्वं पर्वावधिरेव पक्षहोम इत्युक्त तावच्चदापन्नगच्छेत् तदा पक्षांतरेऽपि पक्षहोमः कार्यः । तदेवोक्तं त्रिकांडमंडने । तावता नापगच्छेच्चेदापत्पक्षांतरेऽपि च । पुनस्तत्रापि कर्तव्यः समासः पृथगेवहि । स्मृत्यर्थसारेऽप्येवं । पक्षांतरस्थानां होमानां पूर्वपक्षगैर्होमैर्न समासः । तदुक्तं तत्रैव । न तु पक्षांतरस्थानां समासश्चोद्यते मिथः । एवमापद्गते पक्षे पक्षे चैवं समाचरेत् । पक्षहोमविषये तृतीयः पक्षहोमो न कर्तव्यः । तदुक्तं तत्रैव । तृतीयेऽनंतरे पक्षे समासं न समाचरेत् । कठैः पक्षद्वयं चैव पक्षहोमो नियम्यते । पक्षत्रये पक्षहोमे कृतेऽग्निनाशः।हु तेषु पक्षहोमेषु पक्षत्रयमनंतर। कर्तव्यं पुनराधेयं इति त्रिकांडचामुक्तत्वा त् । पक्षद्वये पक्षहोमे कृतेऽपि तावतापन्नापगच्छेच्चेत्तदा तृतीयपक्षे क्लेशेनापि दिनेदिने पृथग्घोमान्निर्वर्त्य पक्षांतरे पुनर्यथेच्छं पक्षहोमादिकमाचरेत् । तदुक्तं तत्रैव । तावतापन्न गच्छेच्चेत् आपत्पक्षे तृतीयके । कृच्छ्रेणापि निवर्त्येत तत्र होमं दिने दिने । पक्षांतरे पुनः कामं पक्षहोमादिकं चरेत् ।। स्मृत्यर्थसारेऽप्येवं ।। एवं कृतेऽप्यापन्नापगच्छे

च्चेत् तदा यावज्जीवमविच्छिन्नान् पक्षहोमान् कुर्यात् । न तत्र पक्षगणनावधिः । तदुक्तं तत्रैव । आपच्चेदनुवर्तेत दीर्घकालं कथंचन । यावज्जीवमविच्छिन्नान् पक्षहोमान् समाचरेत् । आपदेवावधिस्तत्र न पक्षगणनावधिः । स्मृत्यर्थसारेऽप्येवं । येन केनचिदापदादि निमित्तेन पक्षहोमादौ कृते सति तत्रांतराले आपच्चेदागच्छति तदा कालप्राप्ताः पुनर्होमाः कर्तव्याः । तदुक्तं तत्रैव । दीर्घकालापदं मत्वा पक्षहोमे कृते सति । तत्रांतराले यद्यागत कदाचिदागच्छति । काले काले पुनर्होमान् जुहुयात् प्रागघुतानपि ।। कठेऽप्येवं विदुः केचिन्नेच्छंत्यत्र पुनर्हुतं । इति स्मृत्यर्थसारेऽप्येवं । स्मृतिचंद्रिकायामाह मरीचिः । पक्षहोम मथो दत्वा गत्वाऽकस्मान्निवर्तितः । होमं पुनः प्रकुर्वीत भवेच्चेन्न स दोषभाक् । स दोषभागिति श्रवणादत्रापि विकल्पः प्रतीयते । अत्र सर्वत्रापि यदेव सायं द्रव्यं तदेव प्रातर्द्रव्यमिति प्रागुक्त मनुसधेयं । यावन्तोऽत्र समासास्ते सर्वे सायमुपक्रमाः । प्रातः कालापवर्गाश्च न तु प्रातरुपक्रमाः ।। स्मृत्यर्थसारेऽप्येवं अत्यंतापत्तौ वंनै नियम इत्याह । प्रातर्होमादिका यद्वा प्रातश्चेदापदागता । स्मृत्यर्थसारेऽप्येवं । अत्यंतापत्तौ पुनर्विशेषमाह । तथा पूर्वापराह्णादौ निमित्ते च समस्यति । पूर्वाह्णे प्रातर्होमाः समस्य कर्तव्याः । अपराह्णे सायङ्कालात्प्रागेव सायंहोमान् कुर्यादित्यर्थः । यदि सायंकालप्रतीक्षण कर्तुमशक्यं पक्षहोमस्थले एकस्मिन्वा निमित्तत इति यदुक्तं तदेतादृशापद्विषयं । पक्षहोमाद्येतदंतविषयेषु प्रायश्चितसूत्रमपि मूलमस्ति ।। मृत्युशंकायां विशेषमाह । पूर्वपक्षेतु रात्रौ चेन्मृतिशंकाऽग्निहोत्रिणः । सायं हुत्वा तथैवाथ जुहुयात्प्रातराहुतीः । स्मृत्यर्थसारेऽप्येवं । पूर्व

पक्षे शुक्लपक्षे रात्रिहोमं कृत्वा प्रातर्होमं कुर्यात् । नतु सकल-
पक्ष।नित्यर्थः । कृष्णपक्षेऽह्नर्मरणे प्रातराहुतिमारभ्य रात्रिमरणे
सायमाहुतिमारभ्य पक्षहोमवत् । मरणदिनादि दर्शदिन पर्यंतं
दिनसंख्यया चतुरश्चतुर आहुतीर्जुहुयात् । दर्शस्थालीपाकं
च कुर्यादित्याह । यदि त्वपरपक्षे स्यान्मृतिशंकाऽग्निहोत्रिणः ।
तावच्छिष्टाश्च पक्षेऽस्मिन् जुहुयात्सकलाहुतीः ।। स्मृत्यर्थसारेऽ
प्येव । दर्शेष्टिं च ततः कुर्यात् । अग्निहोत्रदर्शेष्टि शब्दौ अनाहि
ताग्नेरोपासनहोम स्थालीपाक साधारणाविति तांत्रिकाः । य
अहिताग्नेर्धर्मः स्यात्स औपासनिकस्य च इति प्रकरणांते श्रवणा
दिति भावः ।। न तु सकलाहुतीः । किंतु प्रातराहुतिद्वयं समाप्य
तत. सायमाहुतिद्वय समाप्य पुनस्तथैव कर्तव्यं । अथवा सर्वाः
प्रतराहुतीः सम्पाद्य ततः सायमाहुतीरित्येकं । मतद्वये सति
द्वितीयमिति ब्रूमः ।। तदुक्तं कारिकायां । कृष्णपक्षे प्रमीयेत
यद्यह्नि प्रातराहुतीः । शेषास्तु जुहुयाद्दर्शपर्यंताः पक्षहोमवत् ।।
तदानीमेव जहुयात्सायं कालाहुतीरपि ।। सायं म्रियेत चेत्साय
माहुतीर्जुहुयादपि ।। तदानीमेव जुहुयात् प्रातः कालाहुतीरपि ।।
सकृद्गृहीतमत्रेष्टं भिन्नतन्त्रं तु होमयोः । दर्शे चापि प्रकुर्वीत
स्थालीपाके तथैव हि । होमदर्शौ च कर्तव्यौ पुनर्यदि न जीवति।
भिन्नतत्रं सायंहोम तंत्रं समाप्य प्रातर्होमतंत्रं स्वतंत्रमित्यर्थः ।
एवं विपर्यये इष्टिर्यदि न संभवेत् । देवतानां प्रधानानामेकैकस्यै
पृथक् पृथक् । पुरोऽनुवाक्ययायाज्याभ्यां चतुरश्च घृताहुतीः ।
जुहुयादेवमन्यत्र सर्वत्र यदि हूयते।पुरोनुवाक्येत्यादि श्रौताभिप्रायं।
प्रकृतेतु नाममंत्रा एव ग्राह्याः । अयमाशयः । सर्वेष्टितंत्रकर
णासंभवे आज्यसंस्कारादिकं कृत्वा एकैकस्यै प्रधान देवतायै

चतुर्गृहीताज्याहुतीर्जुहुयात् । तावतैवेष्टिः कृता भवति । एतात्‌पर्यन्तं मृत्युशंकायां कार्यं । जीवत एव एष विधिरुक्तः । मृत्युशंकां विना सर्वत्रापि पूर्वं पार्वणस्थालीपाकयोर्न प्रतिकर्ष । प्रायश्चित्तप्रदीपे । आपत्स्वपि पूर्वपार्वणेष्टयोर्न प्रतिकर्ष इत्युक्तत्वात् । मृत्युशंकावद्वचनाभावाच्च । एतदंतं सर्वं त्रिकाण्डमंडनानुसारेणोक्तं ॥

अथ तस्मिन्मृते पुत्रादेर्विशेषमाह । आहिताग्निः कदाचित् स्यात्कृष्णपक्षे मृतो यदि । तदा शेषाहुतीः सर्वा जुहोतीत्याश्वलायनः ॥ अन्ये तदैव दर्शेष्टिं कुर्युः कृष्णे मृतस्य तु । शुक्लपक्षे निशि प्रेतस्येच्छंति प्रातराहुतीः । य आहिताग्नेर्धर्मः स्यात्स औपासनिकस्य तु ॥ इति । शाठ्यायनकर्मच्छिद्रे । ब्राह्मणमंत्रेषु अन्ये पुत्रादयो मरणानंतरं पूर्वोक्तां कृतिं कुर्युः । इत्यर्थः इत्युक्तं स्मृत्यर्थसारे ॥७॥

अथाशौचे होमविधिः ॥

तत्र जननशावाशौचयोः ऋत्विगादिना सायं प्रातर्होमौ कारयेत् । स्वयं च द्रव्यत्यागं कुर्यात् । ऋत्विगाद्यन्याभावे तु आशौचपातात्पूर्वं शेषहोमविधिना होमान् कृत्वा वक्ष्यमाणेनाग्निसमारोपप्रकारेणाग्निं समारोपयेत् । नात्र सर्वत्रौपवसथ्याहे सायंहोमः पृथग्भवेदित्यादि नियमः । अनन्यगतिकत्वात् । अथवाऽऽशौचपातात्पूर्वं स्मार्ताग्निरात्मनोऽन्येषामभावे सूतकादिषु समारोप्य तदंतेतु विहृत्य जुहुयात् स्वयमिति निर्णयसिंधौ आश्वलायन वचनात् । शेषहोमाद्यकृत्वापि वक्ष्यमाणेनाग्निसमारोपप्रकारेणाग्निसमारोपणं कृत्वा सूतक निवृत्तौ स्नात्वा कृतनित्यक्रियोऽग्निं प्रतिष्ठाप्य प्राणानायम्य देशकालौ संकीर्त्य मम

नित्यहोमातिक्रम जन्य दोषपरिहारार्थं प्रायश्चित्तपूर्वकमतिक्रांत होमान् करिष्ये इति संकल्प्य परिसमूहनादि कृत्वाऽग्नेः पश्चिमतः सपवित्रे पात्रे आज्यमासिच्य अंगारानायतनादुत्तरतो बहिः कृत्वा तेष्वाज्यपात्रं निधाय तृणेनावज्वल्य दर्भाग्रद्वयं क्षिप्त्वा तेनैव त्रिः पर्यग्निकृत्वोल्मुकं निरस्याप उपस्पृश्य कांन्निवोदगुद्वास्य अंगारानतिसृज्य । सवितुष्ट्वेति मंत्रेण सकृत् द्विस्तूष्णीमेवं त्रिरुत्पूय पवित्रे प्रोक्ष्याग्नौ प्रहृत्याज्यं पश्चिमतो दर्भेष्वासाद्य स्रुवं सम्मृज्य स्रुवेण स्रुचि चतुर्गृहीत्वा । ॐ मनोज्योतिर्जुषतामाज्यं मे विच्छिन्नं यज्ञँ समिमं दधातु । या इष्टा उषसो या अनिष्टास्ताः संतनोमि हविषा घृतेन स्वाहा ।। मनसे ज्योतिष इदं नममेति त्यजेत् । आ द्वादशदिनादेवं प्रायश्चित्तं तदूर्ध्वं चेदग्निनाशः ।। तदेवोक्तं कारिकायां । नित्यहोमे त्वतिक्रांते संस्कृत्याज्यं च पूर्ववत् । चतुः कृत्वा गृहीत्वाज्यं मनस्वत्या जुहोत्यथ । आ द्वादशदिनादेवमूर्ध्वं विच्छिद्यतेऽनलः इति । सर्वेषां जातानां होमलोपानां एकैव मनोज्योतिरिति चतुर्गृहीताहुतिरग्निहोत्रहोमे चेति विशेषात् । क्वचिन् प्रतिहोमो वा । कारिकायामन्याद्वादशदिनादित्युक्तत्वाच्च । ततोऽतीतहोमार्थं च पूर्ववत्तंडुलान् संस्कृत्य नित्यहोमवन् परिसमूहनादि समित्प्रक्षेपांतं तंत्रपूर्वकमतीत कालादारभ्य क्रमेण द्वे द्वे आहुती हुत्वा तत्कालहोमं च कृत्वाऽग्निं सूर्यं प्रजापतिं चोपस्थाय परिसमूहनाद्यंगजातं सकृत्कुर्यात् । प्रयोगरत्ने अतीतहोमान कुर्यादित्युक्तं यत्तत्र पक्षद्वयं । तदेव कारिकायां- प्रायश्चित्ते कृते पश्चादतीतमपि कर्म वै । कार्यमित्येक आचार्या नेच्छंत्यन्ये विपश्चित इत्युक्तत्वात् अग्निहोत्रहोमे च प्रतिहोममेके एतत्

सूत्रवृत्तौ एकस्मिन् पक्षेऽतीतहोमानपि कुर्यादित्युक्तत्वाच्च विकल्पः ।। इत्याशौचे होमविधिः ।।

प्रसंगाज्जननशावाशौचयोः पिंडपितृयज्ञं स्थालीपाकादिकं श्रवणाकर्माश्वयुजीकर्म च वक्ष्यमाण प्रमाणसद्भावात् ऋत्विगादिना कारयेत् ।। आग्रयणं न कार्यं कालांतरसत्वात् । प्रत्यवरोहणं । आश्वलायनोऽपि । स्मार्ताग्निः सूतके शावे स्वयं न जुहुयादद्विजः । निर्णयसिन्धौ- सूतके समनुप्राप्ते स्मार्तकर्म कथं भवेत् । पिंडयज्ञं चरुं होममसगोत्रेण कारयेत् ।। इति ।। चरुः स्थालीपाकः श्रवणाकर्मादिश्चेति विज्ञानेश्वरः ।। प्रारब्धं तु सपिंडेनापि कार्यं । न च तत्कर्म कुर्वाणः सनाभ्योऽप्यशुचिर्भवेत् इति मनूक्तेः । त्रिरात्राद्युत्तरं पिंडदान निरग्नेरपि त्रिभिः पिंडैः पिंडपितृयज्ञः कार्य एव । पिंडयज्ञे च सोमे च सापिंड्यां दद्युरेव ते । ते पिंडाः । अत्र पितृयज्ञः स्मार्तो ग्राह्यः । श्रौतेनैव स्मार्तं सिद्धेः । पार्वणश्राद्धं तु सांकल्पिकं ।। न तत्र पिंडदानं । तन्निषेधोक्तेः । अत्रैतद्विषय धार्ढ्यार्थं ग्रंथांतरोक्तं सिद्धमेव संगृह्यते । तत्र विज्ञानेश्वर प्रायश्चित्ताध्यायेऽशुचित्वेन सकलश्रौतस्मार्त कर्माधिकार निवृत्तौ प्रसक्तायां केषु चिदभ्यनुज्ञानार्थमाह । वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदनात् । वितानोऽग्नीनां विस्तारः तत्र भवा वैतानाः । त्रेताग्निसाध्याऽग्निहोत्र दर्शपूर्णमासाद्याः क्रिया उच्यंते । वैतानोपासना वैदिकक्रियार्थाः । कथं वैदिकत्वमितिचेच्छ्रुतिचोदनात् । तथा हि । यावज्जीवमग्निहोत्रं जुहुयादित्यादिभिः श्रुतिभिरग्निहोत्रादीनां चोदना स्पष्ट एव । तथा- अहरहः स्वाहा कुर्यादन्नाभावे केनचिदाकाष्ठादिति श्रुत्यौपासनहोमोऽपि चेष्यते । अत्र च श्रौतत्वं विशेषेणोपादानात्

स्मार्तक्रियाणां दानादीनामनुष्ठानं न गम्यते । अत एव वैयाघ्रपादेनोक्तं । स्मार्तकर्म परित्यागो राहोरन्यत्र सूतके । श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयात् । इति । श्रौतानां च कार्यत्वाभिधानं नित्यनैमितिकाभिप्रायेण ।। तथाह पैठीनसिः । नित्यानि निवर्तेरन् वैतानवर्जं शालाग्नौ चैक इति । नित्यानि निवर्तेरन्नित्यविशेषेण आवश्यकानां नित्यनैमित्तिकानां निवृत्तौ प्रसक्तायां वैतानवर्जमिति अग्नित्रयसाध्याऽवश्यकानां पर्युदासः । शालाग्नौ चैक इति । गृह्याग्नौ भवानामप्यावश्यकानां पाक्षिक पर्युदास उक्तः । अतस्तेष्वाशौचं नास्त्येव । काम्यानां पुनः शौचाभावादननुष्ठानं । मनुनाप्यनेनैवाभिप्रायेणोक्तं । प्रत्यूहेन्नाग्निषु क्रिया इति । अग्निषु क्रिया न प्रत्यूहेदित्यग्निसाध्यानां पंचयज्ञादीनां निवृत्तिः । अतएव संवर्तः । होमं तत्र प्रकुर्वीत शुष्कान्नेन फलेन वा । पंचयज्ञविधानं च न कुर्यान्मृत्यु जन्मनोः । इति । वैश्वदेवस्य अग्निसाध्यत्वेऽपि वचनान्निवृत्तिः । विप्रो दशाहमासीत वैश्वदेवादिवर्जितः इति तेनैवोक्तत्वात् । सूतके कर्मणां त्यागः सन्ध्यादीनां विधीयत इति । यद्यपि संध्या निवृत्तिः श्रूयते तथाप्यंजलि प्रक्षेपादिकं कार्यं । सूतके सावित्र्या चांजलिं प्रक्षिप्य प्रदक्षिणं कृत्वा सूर्यं संध्यायां ध्यायन्नमस्कुर्यादिति पैठीनसिस्मरणात् । यद्यपि वैतानोपासनाः कार्या इति सामान्येनोक्तं तथाप्यन्येनैव कारयितव्यमन्येन तानि कुर्युरिति पैठीनसिस्मरणात् । बृहस्पतिनाप्युक्तं । सूतके मृतके चैव अशक्तौ श्राद्धभोजने । प्रवासादि निमित्तेषु हावयेन्नतु हापयेत् । इति । तथा स्मार्तत्वे पिंडयज्ञ श्रवणाकर्माश्वयुज्यादिकश्च नित्यहोमः कार्य एव । सूतकेतु समुत्पन्ने स्मार्तकर्म कथं भवेत् । पिंडयज्ञं

चरुं होममसगोत्रेण कारयेदिति जातूकर्ण्यश्रवणात् । यद्यपि सांगे कर्मण्यन्यकर्तृत्वं तथापि स्वद्रव्यत्यागात्मकं प्रधानं स्वयं कुर्यात् । तस्यानन्यनिष्पाद्यत्वात् । अतएवोक्तं श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयादिति । यः पुन दानं प्रतिग्रहे होमः स्वाध्यायश्च निवर्तत इति होमप्रतिषेधः स काम्याभिप्रायो वैश्वदेवाभिप्रायो वा व्यवस्थापनीयः । तथा सूतकान्नभोजनमपि न कर्तव्यं । उभयत्र दशाहानि कुलस्यान्नं न भुंजीत इतियम स्मरणात् । उभयत्र जननमरणयोर्दशाहानीत्याशौचकालोप लक्षणं । कुलस्य सूतकयुक्तस्य सम्बंध्यन्नं असकुल्यैर्नभोक्तव्यं । सकुल्यानां पुनर्नदोषः । सूतकेतु कुलस्यान्नमदोषं मनुरब्रवीत् । इति तेनैवोक्तत्वात् । अयं च निषेधो दातृभोक्त्रोरन्यतरेण जनन मरणे ज्ञाते द्रष्टव्यः । उभाभ्यामपरिज्ञाते सूतकं नैव दोषकृत् । एकेनापि परिज्ञाते भोक्तुर्दोषमुपावहेदिति षट्त्रिंशन्मते दर्शित मिति मिताक्षरायां । अथ स्मृत्यर्थसारे आचाराध्याये पक्षहोमा- दिनिर्णयन्ति । सन्ध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत् । न त्यजेत्सूतके वापि त्यजन् गच्छेदधो द्विजः । कुर्यात्पञ्च महा यज्ञान् नित्यशः सूतकं विना ॥ नित्यं नैमित्तकं चान्यत् स्वकर्मा- पि न हापयेत् ॥ स्वकर्महानौ पतनमब्देनैव त्वनापदि ॥ स्वकर्म हानौ नास्तिक्यान्मासेन पतनं स्मृतं ॥ द्वादशाब्दव्रतेनैव तस्य शु- द्धिस्तु नान्यथा ॥ तन्निरीक्ष्यार्कमीक्षेत स्पर्शे स्नायात्सचैलकं ॥ तेन सम्भाषणं हास्यं कुर्वन्नब्देन तत्समः ॥ तदन्नभुक्तौ सद्यस्तु सहशय्यासनेषु च ॥ इति होमविधिः ॥ तत्रैव प्रमादमरणविष- यांते आशौचप्रकरणे जननाशौचे मृताशौचे च त्रेताग्निसाध्याग्नि होत्रदर्शपूर्णमासाद्याः नित्यनैमित्तिकाः क्रियाः कार्याः ॥ औपा

सनाग्निसाध्याश्च सायंप्रातर्होम पार्वण स्थालीपाकाद्याः नित्य नैमित्तिकाश्च श्रुतिचोदितत्वात् कार्या एव असम्भवे हावयेत्॥ सर्वथा न हापयेत् । तत् स्मार्तत्वेऽपि पिंडपितृयज्ञश्रवणाकर्मा श्वयुजीकर्मादिकमसगोत्रेण कारयेत् । न हापयेत् । ब्रह्मचर्यादिव्रतिनां ते श्राद्धकर्मणि पितॄणां निमन्त्रितानां भोक्तॄणां यत्किंचिन्नियमस्थानामप्रतिषिद्धग्राहि नित्यदाॠणामेतेषां यावदुपाधिस्तावदाशौचं नास्त्येव । ऋत्विगादीनां स्नानमस्ति । यजमानस्तु स्नात्वाचम्य उद्देशत्यागं कुर्यात् । सर्वं काम्यं च वर्ज्यमेव । स्मार्तत्वेऽपि सन्ध्यायां गायत्र्यांजलिदानं कार्यं मार्जनं कार्यं न वा । यद्वा प्राणान्नियम्य शक्त्या मनसा मन्त्रमुच्चारयन् मार्जनादिकं कृत्वा वाचा गायत्रीमुच्चार्यांजलिं दद्यात् । दानप्रतिग्रह पञ्चमहायज्ञ नित्यश्राद्ध स्वाध्यायादीनां स्मार्तानां त्याग एव । नित्यस्नान शौचाचमन भोजन नियमानस्पृश्यस्पर्शस्नानं च कुर्यादेव ॥ सूतकान्नभोजन स्वकुल्यानां कार्यं । असकुल्यानां दोषः । दातृभोक्त्रोरन्यतरेण सूतके ज्ञातेऽपि न भोक्तव्यं उभाभ्यामपरिज्ञाते न दोषः ॥ निर्णयसिंधौ तु- कर्मंत आशौचस्थले अपवादान्तरमाहयाज्ञवल्क्यः । वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदनात् । तत्र त्यागमात्रेण स्नानोत्तरं स्वयं कर्तव्यं । सूतके मृतके चैव अशक्तौ श्राद्धभोजने । प्रवासादि निमित्तेषु हावयेन्न तु हापयेत् । इति बृहस्पत्युक्तेः । नित्यानि निवर्तेरन् वैतानवर्ज्यं शालाग्नौ चैकेऽन्य एतानि कुर्युरिति पैठीनसिस्मृतेश्चेति विज्ञानेश्वरः । एकग्रहणं पूजार्थं । तेन स्मार्तं कार्यमेवेति हारलतायां । दाक्षिणात्यास्तु विकल्पमाहुः । अपरार्कादि निबन्धास्तु श्रौतं स्वयं कार्यं स्मार्ते तु त्यागातिरिक्तान्यन्यस्यैव

कर्तृकत्वं । त्यागमात्रस्तु स्वयं ।। कर्म वैतानिकं कार्यं स्नानोप स्पर्शनात् स्वयं । जन्महान्योर्विना तस्य कर्मत्यागो न विद्यत इति हारीतोक्तेः । शालाग्नौ केवलं होमः कार्य एवान्यगोत्रजैरिति जाबालोक्तेश्चेत्याहुः । अपरार्केऽप्येवं । याज्ञिका अप्येवं । सूतके तु समुत्पन्ने स्मार्तकर्म कथं भवेत् । पिण्डयज्ञं चरुं होममसगोत्रेण कारयेत् । इति जातूकर्ण्योक्तेश्च । चरुः स्मार्तस्थालीपाकः । श्रवणाकर्मादिश्चेति विज्ञानेश्वरः । प्रारब्धे तु सपिंडेनापि कार्यं । न च तत्कर्म कुर्वाणः सनाभ्योऽप्यशुचिर्भवेत् । इति मनूक्तेः । छन्दोगपरिशिष्टेऽपि । होमः श्रौते तु कर्तव्यः शुष्कान्नेन फलेन वा । अकृतं हावयेत् स्मार्ते तदभावे कृताकृतं । अकृतं व्रीह्यादि । कृताकृतं तण्डुलादि । स्मार्तहोमादौ तु विकल्पो ज्ञेयः । शाला ग्नौ चैक इति प्रागुक्तेः । यदा करणं तदा अन्यद्वारा । अत्रेदं तत्वं । येषां बह्वृचादीनां द्वादशरात्रमहोमेऽपि नाग्निर्विच्छेद- स्तैर्नकार्यं तैत्तिरीयाद्यैः कार्यं । त्रिरात्रमहूयमानोऽग्नि र्लौकिकः सम्पद्यत इति सुदर्शनभाष्यवचनात् । समारूढे त्वग्नौ तेनापि न कार्यं किन्तु पुनराधानमेव । समारोपप्रत्यवरोहयोः आशौचाप वादाभावादकर्तृकत्वाच्च । अन्यथा पुनराधानमपि स्यात् । यत्वाश्वलायनः । तौवापि सूतके शावे पर्वणीष्टिं महापदि । पुष्पवत्यां च भार्यायां न कुर्यात्तां कदाचन ।। स्मार्ताग्निः सूतके शावे स्वयं न जुहुयाद्द्विजः । श्रौताग्निस्तु सकृद्धुत्वा समा प्तिं वा सकृद्धुनेत् इति । तदपि समारूढपरं । तदाह सएव । स्मार्ताग्निरात्मनोऽप्येषामभावे सूतकादिषु । समारोप्य तदन्ते तु विहृत्य जुहुयात् स्वयं ।। इति ।। तथा मनुः । प्रत्यूहेन्नाग्निषु क्रिया इति । वैश्वदेवस्य त्वग्निसाध्यत्वेऽपि निवृत्तिः । विप्रो

दशाहमासीत वैश्वदेवविवर्जितः इति संवर्तोक्तेः। यद्यपि। पंचय ज्ञविधानंतु न कुर्यान्मृत्युजन्मनोरिति तेनैवोक्तेः पूर्वनिषेधो व्यर्थ स्तथाप्यापस्तंबादीनां वैश्वदेवस्य पंचयज्ञभिन्नत्वात् पृथक् निषेधः । हृदत्तस्त्वाह आशौचेऽपि बह्वृचैर्वैश्वदेवः कार्यः 'तस्य द्वावनध्यायौ यदात्माशुचिर्यद्देश इति । ब्रह्मयज्ञस्यैवाशौचे विशिष्य निषेधात् । सन्ध्यादीनामप्यपवादमाह अपरार्के पुलस्त्यः। संध्यामि ष्टिं चरुं होमं यावज्जीवं समाचरेत्। न त्यजेत्सूतकेवापि त्यजन्गच्छेद धो द्विजः ।। सूतके मृतके चैव संध्याकर्म न संत्यजेत्। मनसोच्चा रयेन्मंत्रान् प्राणायाममृते द्विजः ।। यत्तु-सूतके कर्मणां त्यागः संध्यादीनां विधीयते ।। यच्च विष्णुपुराणे- सर्वकालमुपासीत् सं ध्ययोः पार्थिवेष्यते । अन्यत्र सूतकारसौस्य इति तत्पूर्णसंध्यापरं। अर्घ्यांता मानसी संध्या कुशवारि विवर्जिता । इति शुद्धदीपे च्यव नोक्तेः । पैठीनसिस्तु अर्घ्यमंत्रोच्चारणमाह-सूतके सावित्र्यांजलिं प्रक्षिप्य सूर्यं ध्यायन्नमस्कुर्यात्। भरद्वाजोऽपि-सूतके मृतके कुर्यात् प्राणायाममंत्रकं ।। तथामार्जनमंत्रास्तु मनसोच्चार्य मार्जयेत् । गा यत्रीं सम्यगुच्चार्य सूर्यायार्घ्यं निवेदयेत् ।। मार्जनं तु नवाकार्यमुप स्थानं नचैवहि ।। ग्रहणे श्राद्धादावपि आशौचापवादमाह व्याघ्र पादः । स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके इति लिंगेऽपि । सूत के मृतके चैव न दोषो राहुदर्शने। तावदेव भवेच्छुद्धिर्यावन्मु क्तिर्नदृश्यते इति। श्राद्धभोजनादौ ऋत्विगाद्यभावे गायत्र्यादशकृ त्वोऽपः पीत्वा संध्याहोमादिकं कुर्यात् पुराणेष्वनुक्तविशेषेषु गा यत्र्यादशकृत्वोऽपः पीत्वा शुध्यति ।। ततः संध्योपासनहोमं यथोचि तं कुर्यादिति स्मृत्यर्थ सारोक्तेः । दशकृत्वः पिबेदापो गायत्र्याश्रा द्धभुग्द्विजः। ततः संध्यामुपासीत शुध्येत तदनंतरमिति । अनुवतश्रा

द्धप्रायश्चित्तविषयमिति मिताक्षरायां। माधवेऽप्येवं ।तच्च संध्या होमयोः प्रतिषेधस्त्वकृत प्रायश्चित्तस्य, कृते तु प्रायश्चित्ते कुर्यात्। अत एव विष्णुपुराणे - दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुक् द्विजः। ततः संध्यामुपासीत जपेच्च जुहुयादपीति ।।

अथ सभार्यस्य प्रवासे प्रसक्ते आशौचादि निमित्ते वा अग्निसमारोप विधिः ।। कालहोमानंतरं । अयंते योनिरित्यस्य गाधीपुत्रो विश्वामित्रोऽग्निरनुष्टुप् । अग्निसमारोपणे विनियोगः। अयंते योनिर्ऋत्वियो यतो जातो अरोचथाः ।तं जानन्नग्न आसीदाथानोवर्धया गिरः ।। इत्यरणीद्वयं समारोपयेत् ।। अथवा अनेनैवाश्वत्थ समिधि समारोपयेत्। हिरण्यकेशीस्मार्तसूत्रे उदुंबरादि समित्स्वपि समारोप उक्तोऽस्ति। अलाभे सोप्यंगीकर्तव्यः । यद्वा । यातेअग्नेयज्ञिया तनूरतयेह्यारोहात्मात्मान मच्छावसूनि कृण्वन्नस्मेनर्या पुरूणि। यज्ञो भूत्वा यज्ञमासीद स्वां योनिंजातवेदो भुव आजायमानः सक्षय एहि। इतिमंत्रेणपाणीप्रताप्यात्मनि समारोपयेत् ।। त्रिविधोऽपिसमारोपो यजमानकर्तृकः। तत्रापि आत्मसमारोपस्तु नियमेनयजमानकर्तृकः। नैवान्यकर्तृकः। तत्र प्रादुष्करणकालेरणी समारोपे प्रत्यवरोहेत्यनेन अरणी निर्मथ्य स्थंडिलेऽग्निं प्रतिष्ठापयेत्। अश्वत्थसमित्समारोपपक्षे श्रोत्रियागारादग्निमाहृत्य संस्कृते स्थंडिलेऽग्निं प्रतिष्ठाप्य प्रत्यवरोहेति मंत्रेण तां समिधं निदध्यात्। समित्समारोपपक्षे यावत्यो ग्राममर्यादा नद्यश्च सीमा अतिक्रान्तौ नदीश्च संतरन्तौ दंपती समिधमन्वारभेयातां ।। अशक्तावन्यतरेण वान्वारंभः । अन्वारंभाभावेऽग्निनाशः । अजस्रहरणे समारोप्य समारोप्यहरणे च यजमानः पत्नीवाऽन्वारभेयातां। तदभावेऽग्नयोलौकिका भवंति। तदाग्न्याधेयंप्रायश्चित्तमिति प्रायश्चित्तप्रदीपे

उक्तत्वात् । अरणीसमारोपतुल्यः समिदारोपः ।। जोष्ठाऽन्वारभते वन्हि बहुभार्यस्य नेतरेति संग्रहोक्तं । नान्वारंभआत्मसमारोपे । एतन्मूलं त्रिकांड्यां । आत्मसमारोपपक्षे सर्वदाऽस्पृश्यस्पर्शनं जलेन स्नानं स्त्रीगमनं चाकुर्वन् मूत्रपुरीषोत्सर्गे शौचमकृत्वा चिरकालमतिष्ठंश्च भवेत् होमकाले . आत्मसमारूढमग्निमुच्छ्वास रूपेण प्रत्यवरोहेति मंत्रेण लौकिकाग्नौ निदध्यात् । एवं यथाविध्यग्निं प्रतिष्ठाप्य कालद्वये एककाले वा पूर्ववज्जुहुयात् । इदं समारोपणं द्वादशरात्रमेवकुर्यात् । तदूर्ध्वं नसमारोपणं । मूलं शौनकेन । अरण्यात्मसमित्स्वेनगृह्याग्नेस्तुयथाविधि । अग्नौप्रज्वलितेगृह्ये प्रतपेदरणीद्वयं । अश्वत्थसमिधं वापि अयंते योनिरित्यृचा । याते अग्नेर्यज्ञियेति पाणी वा युगपत्तपेत् । आपद्येवं समारोप्य ततः प्रत्यवरोहयेत् । एतेनानुक्रमेणाग्निसमारोपविधिःक्रमात् । एषां त्रयाणां पक्षाणां पूर्व. पूर्व.प्रशस्यत इति । यज्ञपार्श्वेपि ऋत्विभ्यश्च पुरादृष्टमापत्कालेषु सर्वदा । अरण्योश्च समारोप्य श्रुतिदृष्टेन कर्मणेति । चकारात् समिध्यपि, अत्राश्वत्थसमिदेवेतिनियमः । अरण्यश्वत्थयोनित्वादश्वत्थसमित्रं वापि इत्युक्तत्वात् अलाभे औदुंबरादि समित्स्वपि सूत्रांतरोक्तेस्तत्रैव हिरण्यकेशीयस्मार्तसूत्रे यदि प्रायाद्वचाख्यातं । आत्मन्यरण्योर्वा समारोपणं समिधिवा समारोपयेदरणीकल्पेनखादिरः पालाश औदुंबरोऽश्वत्थोऽत्रैकतरस्मिन् यत्रवा वस्येतस्मिन् श्रोत्रियागारादग्निमाहृत्याजुहुवान उद्बुध्यस्वेतिद्वाभ्यां यस्यां समारूढस्तामादधातीति । आत्मसमारोपे प्रयोगरत्ने नियमा उक्ताः । तेषां मूलं बौधायनीयप्रायश्चित्तप्रदीपे गृह्यकारिकायां च । कृत्वापाणिसमारोपं नियमांश्च निबोधत । जले निमज्य न स्नायान्नोपेयाच्च स्त्रियं तथा ।। कृत्वा मूत्रपुरीषेतु चिरं

नासीत चाशुचिरिति कारिका । एवमात्मनि समारूढेषु न खादेन्न पिबेन्नोपरिशय्यायां शयीताप्सु न निमज्जेन्न मैथुनं व्रजे दित्येदनापद्विषयं। आपदि मज्जन मैथुने निषिद्धे । नियमाति-क्रमे मनस्वतीमंत्रजप: प्रायश्चित्तं । आत्मनि समारूढेष्वग्निषु नाप्सु निमज्जेन्न मैथुनं व्रजेत् । अमेध्यशूद्रादिस्पर्शे आन्न यच रणे चाग्नयो विनश्यंतीतीदमप्युक्तं दीपे । अतस्तां नखादेदि त्यादि वैकल्पिके नियमातिक्रमे उक्तो मनस्वतीजप: । त्रिकांड मंडनेऽपि । आत्मारूढेषु मज्जेद्वा वदेद्वा पतितादिभि अथवा योषितं गच्छेदनृतौ काममोहित: । वदत्येषु निमित्तेषु केचिद ग्निविनाशनमिति । बौधायनसूत्रेऽपि आत्मनि समारूढेष्वग्निषु न खादेन्न पिबेन्नोपरिशय्यां शयीत नाप्सु निमज्जेन्न मैथुनं व्रजेत् कामंखादेत्कामं पिबेत् कामं वोपरिशय्यायां शयीत नत्वेवाप्सु निमज्जेन्न मैथुनं व्रजेदिति । आत्मनि समारूढेषु आव्रत्यं चरेदरणीविनाशस्ततो दोषो भवेदग्न्याधेयमरणीविनाशे नाग्नि विनाश उक्त: । उत्तरसूत्रे नियमापरिपालन अग्निनाशनाद्द-र्शपूर्णमासयोरनुष्ठानात् । अत्रकिंचित्त्रुटितमस्ति-पत्नीं विना प्रवासेतु नैव कुर्यादुपासनमित्युक्ति: । पत्नीं विना प्रवासे सर्वग्रंथेषु प्रवासोपस्थानस्य विधानात्तदा-अग्निहोत्रं च नित्येष्टि: पितृ यज्ञत्रयं तथा । कर्तव्यं प्रोषिते पत्यौ नान्यत् स्वामिक्रियान्वित मिति त्रिकांड्यामुक्ते: । य आहिताग्नेर्धर्म: स्यात्स औपासनिकस्य त्वित्यादि सर्वेषामुच्छेदे तृतीयप्रभृतीनां पर्वणामतिपातने पुन राधेयमिति कारिकायामुक्तत्वाच्च सर्वं वृथाचेष्टवत् । समि त्समारोपादि विषयेऽपि दर्शपौर्णमासयोरनुष्ठानाल्लौकिकमिति दिक् । अत्र पक्षहोमादिषु सर्वत्रापि कृते समारोपे अवरोपोत्तर

मनस्वतीहोमः प्रायश्चित्तमित्युक्तं प्रायश्चित्त प्रदीपे । तत्रैवाग्निषु समारूढेषु अनुध्दरण प्रायश्चित्तं नेष्यत इत्युक्तेः नप्रादुष्करणस्योध्दरणतुल्यत्वात् समारोपमात्रे पक्षहोमे च प्रादुष्करणाकरणनिमित्तं प्रायश्चित्तं नास्ति । अथ पुरुषस्यैव प्रवासकाले कर्तव्यं । प्रवासस्तु साग्निकेन द्रव्यार्जनादि दृष्टकार्यार्थमेव केवलेन पुरुषेण कार्यः । नतु तीर्थयात्रकार्यार्थी । तदुक्तं त्रिकाण्ड्याम् । धनान्यर्जयितुं युक्तः प्रवासो ह्यग्निहोत्रिणः । धनेन संभवेदिज्या तीर्थाद्यर्थं नतु व्रजेत् । ब्रह्मा विष्णुः शिवः सूर्यो गोविप्राः पितृदेवताः । अग्निहोत्रगृहे सन्ति व्रततीर्थतपांसि चेति ॥ तत्र प्रवत्स्यन् अग्नीन् प्रज्वाल्याचम्याभय वोऽभयं मेऽस्तु । इत्युपस्थाय ग्रामांतरं प्रवासं गच्छेदागत्य पूर्ववदभयमित्युपस्थाय । गृहामाबिभीतो पव स्वस्त्सैवो स्मासु च प्रजायध्वं माचवो गोपतीरिषदिति स्वगृहं निरीक्ष्य गृहानहं सुमनसः प्रपद्ये वीरघ्नो वीरवतः सुवीरान् । इरां वहन्तो गृहमुक्षमाणाग्तेष्वहं सुमनाः संविशानीति गृहं प्रविश्य शिवं शग्मं शंयोः शयोरिति त्रिरनुवीक्ष्य ततो ज्येष्ठपुत्र शिर उभाभ्यां पाणिभ्यां परिगृह्य अंगादंगात्संभवसीति मूर्धानं त्रिराजिघ्रेत् । प्रतिपुत्रेऽपि प्रोष्यागते भवति । आगतमप्यप्रियं प्रवासागतं प्रति तद्दिने न निवेदयेयुः । कारिकानुसारेणेदं लिखितं अथ सूत्रमपि । गृहानीक्षेताप्यनाहिताग्निरिति । अनुपस्थिताग्निश्चेत्प्रवासं गच्छेत्सदा । इहैव संतत्र त्यन्तत्वाग्ने हृदा वाचा मनसा वा बिभर्मि । तिरोमा सन्तं माप्रहासीः ज्योतिषा त्वा वैश्वानरेणोपतिष्ठेदिति । यत्र स्मरेत्तत्रैवोपतिष्ठेत । प्रत्यागमनादि पूर्ववत् । इत्युक्तमाश्वलायनसूत्रं । आण्डविलायां संग्रहे न कुर्युरग्न्युपस्थानं प्रवसंत्योऽपि योषितः । त्यागं न प्रोषिताः कुर्यु-

रक्षंत्येव सधर्मकं ॥ आगतोपस्थितं चापि स्त्रीणां नेच्छन्ति सूरयः ॥ इति ॥ प्रोषिते पत्यौ कर्तव्यता ॥ तत्र सायं प्रातरौपासन होमौ दर्शपूर्णमास स्थालीपाकपिण्डपितृयज्ञश्च पत्न्या ऋत्विगादिना कारयितव्यः । होमं तु स्वयमेव कुर्यादित्युक्तं प्रागेव । अत्र त्रिकाण्ड मण्डनः । कुर्यादवसरप्राप्त मृत्विक्पत्नी समन्वितः । पत्न्यां रजस्वलायां वा प्रसूतायामथापि वा ॥ सर्वमेव नियुक्तः सन् कुर्यादृत्विग्यथोचितं ॥ अग्निहोत्रं च नित्येष्टिः पितृयज्ञ इति त्रयं । कर्तव्यं प्रोषिते पत्यौ नान्यत् स्वामिक्रियान्वितमिति । प्रवसत्याहिताग्नौ तु यद्याग्रयणमागतम् । अग्निहोत्री व्रीहिस्तंबमिति पक्षं समाश्रयेत् । इत्येतस्यार्थः अग्निहोत्री गां व्रीहिश्यामाक यवानामन्यतमेन आशयित्वा तस्याः पयसा सायंप्रातरग्निहोत्रं जुहुयात् सोऽयमाग्रयणेऽनुकल्पः प्रोषिते पत्यौ कार्यः श्रौते एवं । स्मार्ते तु अग्निहोत्रीमिति पक्षो न भवति किन्तु स्थालीपाक एव । आग्रयणस्थालीपाक सूत्रकृतो वचनात् । स त्वाग्रयणस्थालीपाकः स्वाम्यागमनपर्यन्तमुत्कृष्टव्यः । पितृयज्ञत्रयमिति श्रवणात् । अन्यं नित्यमपि श्रवणाकर्मादिकं न कर्तव्यमिति । येतु नैमित्तिकाः प्रायश्चित्त चरवस्तेषु पूर्णाहुतिः कार्या । यास्तु प्रायश्चित्तेष्टयस्तासु पूर्णाहुतिः कर्तव्येति प्रायश्चित्तप्रदीपे उक्तत्वात् ॥ प्रायश्चित्तेष्टि संप्राप्तौ कुर्यात्पूर्णाहुतिं बुधः। इति त्रिकाण्डमण्डनेऽप्युक्तत्वाच्च प्रोषिते यजमाने त्र्यहेऽहनि पत्नी रजस्वला चेत् तदा पञ्चमेऽह्नि यागः । संकल्पोत्तरकाले चेत्तामवरुध्य कार्या इत्युक्तमापदेव्यां भाव्यां च । प्रवसन्यजमानः पूर्वोक्तविधिनाग्निमुपस्थाय प्रवसेत् । असत् स्त्र्युपाधी प्रवसतीति योयं प्रोषितस्त्रीनिषेधः तत्र मूढशूद्रस्त्रीविषयः । शुद्धास्त्री

प्रोषिते यजमाने पत्नी पुत्रो वा बहिर्नाग्निं नयेत् । राष्ट्रविभ्रमादि प्रवासनिमित्तोपपत्तौ तु पत्नी अग्निना सह प्रवसेत् । तत्र क्रमः । अध्वर्युः पक्षविधानेन औपासनहोमान् समस्यहुत्वाग्निकाष्ठेन सहोपकरणं पात्रादिकं सर्वमारोप्य दक्षिणमनड्वाहं युंक्त्वाज्यं संस्कृत्य तावन्मात्रोपयोगिन्या पर्णमय्या स्रुचा चतुर्गृहीतमाज्यं वक्ष्यमाणमन्त्राभ्यामेकामेवाज्याहुतिमग्नौ जुहोति । ॐ वास्तोष्पते प्रतिजानीह्यस्मान्-।ॐ वास्तोष्पते शग्मया--"वास्तोष्पतय इदं नममेति त्यागः । स्रुचमग्नौ प्रक्षिप्य सव्यमनाड्वाहं युंक्त्वा अयंत इत्यृचा अश्वत्थसमिध्यग्निं समा-रोप्य शकटे निधाय पत्न्यपि शकटमारुह्याग्निना सहाभिलषितं देशं गत्वा विहारं कल्पयित्वा प्रत्यवरोहेत्यवरोप्य आज्यं संस्कृत्य मनस्वत्या चतुर्गृहीतमाज्यं हुत्वा तन्तुमतीष्टिं कुर्यादित्युक्तत्वाच्चाग्नये तन्तुमते स्थालीपाकं कुर्यादित्युक्तत्वाच्च। अत्र शरावं दक्षिणा । एक भोजनपर्याप्तमन्नं शरावं । प्रवसन् यजमान इत्याद्येतदन्तं प्रायश्चित्तप्रदीपाद्यनुसारेण लिखितं । अत्रापसूत्रमप्येवं । त्रिकाण्डयां तु - अग्निनाशकान्युपक्रम्य - तत्र नाशः परेत्वाहुः भयाद्यानेन दुष्यति । किन्तु साग्निर्विना भर्त्रा गत्वा संस्कृत सर्पिषा । हावयेच्चतुरात्तेन प्राप्ते देशे मनस्वतीं । सायं प्रातस्तनौ होमावेवं स्याद्गमनेऽन्वहं ॥ वास्तोष्पतीय होमाढ्या भवत्यत्राप्यशेषत इति ॥ प्रोषिते पत्यावेकापि न प्रवसेदित्युक्तं प्रायश्चित्तप्रदीपे । त्रिकाण्डीमतेतु - भार्यायां प्रोषितायां चेदुदेत्यर्कोऽस्तमेति वा । तत्र स्यात्पुनराधेयमन्ये त्वाहुरिहाऽन्यथा ॥ ज्येष्ठा चेदग्निसंयुक्ता गच्छत्यन्या यथारुचि । यजमानेन सहिता यद्वा ता एव केवलाः ॥

स्वाम्यसंनिधौ पुनःसंधानं जयंतोक्तं पुनराधेयं च न कर्तव्यं ॥ अग्न्याधिः पुनराधिर्वा नोभयं स्वाम्यसन्निधौ । इति त्रिकाण्डचा मुक्तत्वात् । अहिताग्नौ प्रवासस्थे तत्पत्नी गृहे दर्शं ऋत्विगादिना कारयेत् । अमावाम्यादि नियतं प्रोषिते धर्मचारिणी पत्यौ तु कारयेन्नित्यं अन्येनाप्यृत्विगादिना ॥ इति लघुहारितोक्तेरिति पृथ्वीचन्द्रोदयः । आदिरदमाब्दिकादि सर्वं पार्वणपरमिति शूलपाणिरिति निर्णयसिन्धुः । श्राध्ददीपिकायां तु । राजकार्य नियुक्तस्य बंधनं गृहवर्तिनः । व्यसनेषु च सर्वेषु श्राध्दं विप्रेण कारयेत् ॥ इति संग्रहे ॥ पराग्निपक्वं नाश्नीयाद्गुड गोरसमंतरा । आहिताग्नेरयं धर्मो याज्ञिकानां तु सम्मतः ॥ इक्षुक्षीरविकाराश्च भ्राष्ट्राभ्राष्ट्र यवा अपि । पराग्निपक्वं न ज्ञेयं प्रवासे चाग्निहोत्रिणः ॥ यदन्नं वारिहीनं च पक्वं केवलपावके । तदन्नं फलवत् ग्राह्यमन्नदोषो न विद्यते ॥ इदंतत्प्रायेण कात्यायनपरम् । तेषां स्वाग्निपक्वस्य भोजननियमात् प्रवासादौ तथा अनुष्ठानदर्शनाच्च ॥

अथापत्नीकोपासनप्रयोगः । ततः पूर्वमृतायै पत्न्यै दाहायार्धाग्नि दत्वा शिष्टाग्नौ पूर्ववच्चरेत् । सायं प्रातर्होमै कुर्यात् इष्टिस्तु कार्या नवेत्युक्तं प्रयोगरत्ने एतन्मूलम् ॥ अथ मलमासे होमादि निर्णयः । गृह्यपरिशिष्टे- अवषट्कारहोमांञ्च पर्व चाग्रयणं तथा । मलमासे तु कर्तव्यं काम्या इष्टीश्च वर्जयेत् । अवषट्कारतो होमा अग्निहोत्रौपासनवैश्वदेवाद्याः पर्व दर्शपूर्णमासौ आग्रयणं स्थालीपाकञ्च । आग्रयणकर्तव्यतातु पुरातनधान्याभावेन त्वनापदि वचनांतरैर्निषेधात् । एतत्सर्वं प्रासंगिकम् इदानीं प्रकृतमनुसरामः ॥ इत्यारडोपनामक नारायणभट्टकृते गृह्याग्नि

सागरे होमविषयनिरूपणम् ।।

" अथ स्थालीपाकारम्भः "

स च विवाहोत्तरं गृहप्रवेशनं यहोमानंतरमागामिन्यां पौर्णमास्या मेवारंभणीय इति नियमो वृत्तिकारकारिकाभ्यां साधितः । नतु दर्शे । निर्णयसिन्धौ तु यद्यारंभे मलमासपौषमास शुक्रास्तादि भवन्ति तथाप्यारंभः कार्यः । यानि तु -उपरागोऽधिमासश्च यदि प्रथमपर्वणि । तथा मलिम्लुचे पौषे नान्वारंभणमिष्यते ।। गुरु भार्गवयोर्मौढ्ये चन्द्रसूर्यग्रहे तथा । इति संग्रहवचनानि तानि आलस्यादिना अतिक्रान्तेष्टि प्रारम्भविषयाणि । नामकर्म च दर्शेष्टि यथाकालं समाचरेत् । अतिपाते सति तयोः प्रशस्ते मासि पुण्यभे । इत्यपरार्के गर्गवचनादिति प्रयोगपारिजाते उक्तं चैतत् प्रयोगरत्ने भट्टैः । कालादर्शे तु । नामकर्म च दर्शे -ष्टिमिति पाठः । याज्ञिकास्तु आधानानंतरं पौर्णमासी चेन्मलमासगा । तस्यामारंभणीयादीन् न कुर्वीत कदाचन । इति त्रिकाण्डमण्डनवचनाच्छुद्धकाल एव विभ्रष्टेष्टि कृत्वाऽऽरंभं कुर्यादित्याहुः । कालादर्शे स्मृतिसंग्रहेऽपि । आरम्भं दर्शपूर्णेष्टयोरग्निहोत्रस्य चादिमम् । प्रतिष्ठा पंच कर्माद्याः मलमासे विवर्जयेत् एतदंतं सिन्धूक्तम् । प्राप्तस्य पार्वणः स्थालीपाक इति श्रौतग्रन्थमतम् । अत्रापि होमवद्विवदन्ते । यथाचारं कार्यम् । पौर्णमासस्थालीपाकस्य द्व्यहकालत्वं । सद्यस्कालत्वं वा । दर्शस्य द्व्यहकालत्वनियमः । अत्राप्यत्यं तापदि सद्यस्कालत्वं । तत्र विवाहोत्तरं दर्शपूर्णमास स्थाली पाकयोरनुष्ठानं न कृतमनंतरमग्निविच्छेद बहुकालोत्तरं पुनः संधानं यदा क्रियते तदा दर्शपूर्णमास स्थालीपाकयोरारंभकाले

स्वाम्यसंनिधौ पुन.संधानं जयंतोक्तं पुनराधेयं च न कर्तव्यं ॥ अग्न्याधिः पुनराधिर्वा नोभयं स्वाम्यसन्निधौ । इति त्रिकाण्डचा मुक्तत्वात् । अहिताग्नौ प्रवासस्थे तत्पत्नी गृहे दर्शं ऋत्विगादिना कारयेत् । अमावास्यादि नियतं प्रोषिते धर्मचारिणी पत्यौ तु कारयेन्नित्यं अन्येनाप्यृत्विगादिना ॥ इति लघुहारितोक्तेरिति पृथ्वीचन्द्रोदयः । आदिशब्दमाब्दिकादि सर्वं पार्वणपरमिति शूलपाणिरिति निर्णयसिन्धुः । श्राध्ददीपिकायां तु । राजकार्य नियुक्तस्य बंधनं गृहवर्तिनः । व्यसनेषु च सर्वेषु श्राध्दं विप्रेण कारयेत् ॥ इति संग्रहे ॥ पराग्निपक्वं नाश्नीयाद्गुड गोरसमंतरा । आहिताग्नेरयं धर्मो याज्ञिकानां तु सम्मतः ॥ इक्षुक्षीरविकाराश्च भ्राष्ट्राभ्राष्ट्र यवा अपि । पराग्निपक्वं न ज्ञेयं प्रवासे चाग्निहोत्रिणः ॥ यदन्नं वारिहीनं च पक्वं केवलपावके । तदन्नं फलवत् ग्राह्यमन्नदोषो न विद्यते ॥ इदंतत्प्रायेण कात्यायनपरम् । तेषां स्वाग्निपक्वस्य भोजननियमात् प्रवासादौ तथा अनुष्ठानदर्शनाच्च ॥

अथापत्नीकोपासनप्रयोगः । ततः पूर्वमृतायै पत्न्यै दाहायाधाग्निं दत्वा शिष्टाग्नौ पूर्ववच्चरेत् । सायं प्रातर्होमै कुर्यात् इष्टिस्तु कार्या नवेत्युक्तं प्रयोगरत्ने एतन्मूलम् ॥ अथ मलमासे होमादि निर्णयः । गृह्यपरिशिष्टे- अवषट्कारहोमांश्च पर्व चाग्रयणं तथा । मलमासे तु कर्तव्यं काम्या इष्टीश्च वर्जयेत् । अवषट्कारतो होमा अग्निहोत्रौपासनवैश्वदेवाद्याः पर्व दर्शपूर्णमासौ आग्रयणं स्थालीपाकश्च । आग्रयणकर्तव्यतातु पुरातनधान्याभावेन त्वनापदि वचनांतरैर्निषेधात् । एतत्सर्वं प्रासंगिकम् इदानीं प्रकृतमनुसरामः ॥ इत्यारडोपनामक नारायणभट्टकृते गृह्याग्नि

सागरे होमविषयनिरूपणम् ।।

"अथ स्थालीपाकारम्भः"

स च विवाहोत्तरं गृहप्रवेशनं यहोमानंतरमागामिन्यां पौर्णमास्या मेवारंभणीय इति नियमो वृत्तिकारकारिकाभ्यां साधितः । नतु दर्शे । निर्णयसिन्धौ तु यद्यारंभे मलमासपौषमास शुक्रास्तादि भवन्ति तथाप्यारंभः कार्यः । यानि तु -उपरागोऽधिमासश्च यदि प्रथमपर्वणि । तथा मलिम्लुचे पौषे नान्वारंभणमिष्यते ।। गुरु भार्गवयोर्मौढ्ये चन्द्रसूर्यग्रहे तथा । इति संग्रहवचनानि तानि आलस्यादिना अतिक्रान्तेष्टि प्रारम्भविषयाणि । नामकर्म च दर्शेष्टि यथाकालं समाचरेत् । अतिपाते सति तयोः प्रशस्ते मासि पुण्यभे । इत्यपरार्के गर्गवचनादिति प्रयोगपारिजाते उक्तं चैतत् प्रयोगरत्ने भट्टैः । कालादर्शे तु । नामकर्म च दर्शे -ष्टिमिति पाठः । याज्ञिकास्तु आधानानंतरं पौर्णमासी चेन्मलमासगा । तस्यामारंभणीयादीन् न कुर्वीत कदाचन । इति त्रिकाण्डमण्डनवचनाच्छुद्धकाल एव विभ्रष्टेष्टि कृत्वाऽऽरंभं कुर्यादित्याहुः । कालादर्शे स्मृतिसंग्रहेऽपि । आरम्भं दर्शपूर्णेष्टयोरग्निहोत्रस्य चादिमम् । प्रतिष्ठा पंच कर्माद्याः मलमासे विवर्जयेत् एतदंतं सिन्धूक्तम् । प्राप्तस्य पार्वणः स्थालीपाक इति श्रौतग्रन्थमतम् । अत्रापि होमवद्विवदन्ते । यथाचारं कार्यम् । पौर्णमासस्थालीपाकस्य द्व्यहकालत्वं । सद्यस्कालत्वं वा । दर्शस्य द्व्यहकालत्वनियमः । अत्राप्यत्यं तापदि सद्यस्कालत्वं । तत्र विवाहोत्तरं दर्शपूर्णमास स्थाली पाकयोरनुष्ठानं न कृतमनंतरमग्निविच्छेद बहुकालोत्तरं पुनः संधानं यदा क्रियते तदा दर्शपूर्णमास स्थालीपाकयोरारंभकाले

रजोदोषप्रसक्तिः । यदा वा दशवार्षिकयादि वधूलाभे विवाह कालेऽपि रजोदोष प्रसक्तिः तत्र विशेषः । प्रायश्चित्तप्रदीपे - अर्धो वा एतस्य यज्ञस्य हीयते इत्यादि पत्न्यामनालंभुकायां एतस्य यजमानस्यार्धं हीयते उभाभ्यां सह कर्तव्यत्वात् । व्रतेऽहनि पत्न्यनालंभुका भवतीति व्रत्येऽहनीति कर्म लक्ष्यते। व्रताहे कर्मणि संकल्पादिना प्रक्रांते नालंभुकायां रजस्वला-यामपरुध्य जपेत् । अपरोधनं नाम ऋतुव्यापारोदासीन करणं। सर्वेणैव यज्ञेन यजेत सांगेन पत्न्या कर्तव्यमपि स्वयमेव करोति । तामिष्टोपहूये न तां शुद्धां चतुर्थेऽहनि कर्मार्थमुप-हूये तां समूहमस्मीति । ऋतुकाल उपगमनं मन्त्रो वा। अग्न्यन्वाधानप्रभृति अपरुध्यैव यजेतेति । सङ्कल्पादूर्ध्वं कर्मा-रंभात्पूर्वमनालंभुकायाम् तां पत्नीं विहायैव अग्न्याधानादि कर्म कुर्यात् । दर्शपूर्णमासयोः प्रथमप्रयोगे संकल्पात्पूर्वं मनालम्भु-कायां विरम्य कालान्तरेषु कुर्यात् । संकल्पादूर्ध्वं कर्मारंभात्पूर्वं मनालंभुकायां अन्वाधानप्रभृत्यवरुध्यैव समापयेत् । द्वितीयादि प्रयोगेषु संकल्पात्पूर्वमनालम्भुकायां संकल्पप्रभृत्यपरुध्यैव कुर्यात्। एवं विकृतीष्टिष्वपि । आग्रयणे चातुर्मास्येषु पशुबन्धे च भवति ।। अन्येत्वाहुः । प्रथमप्रयोगे संकल्पादूर्ध्वमन्वाधानात्पूर्वं मनालंभुकायां निरस्य कालान्तरे कुर्यात् । अन्वाधानादूर्ध्वं चेदपरुध्य समापयेत् । द्वितीयादि प्रयोगे संकल्पात्पूर्वमनालम्भु-कायां विरम्य कालान्तरे कुर्यात् । संकल्पादूर्ध्वमनालंभुकाया अग्न्यन्वाधानप्रभृत्यपरुध्य समापयेत् । एवं विकृतीष्टि पशुचातु-र्मास्येष्वपि इति ।। शतद्वयीभाष्योक्तमपि लिख्यते । व्रत्यमहर्नाम व्रतोपायन तद्विसर्गयोर्मध्य उच्यते । केचिद् व्रताहंमहर्व्रत्य-

मिति । तेषां मते दर्शपूर्णमासादीनां कर्मणां कालपर्वादिव्रत्य मह: । एष पक्षोऽनुष्ठीयते वृध्दैः । केचित्संकल्पादारभ्येति वर्णयन्ति । तस्मिन् व्रत्येहनि यदि पत्नी रजस्वला स्यात्तदा पत्नीकर्मवर्ज्यं दर्शपूर्णमासादि कर्तव्यम् ।। एवं दर्शपूर्णमास तद्विकारेष्टि पशुचातुर्मास्येषु अग्न्यन्वाधानादूर्ध्वं रजस्वलाया मपरुध्यैव याग: कर्तव्य: । कर्मारम्भात्पूर्वंचेत्कालान्तरे याग: कर्तव्य: । पत्न्यामनालंभुकायां बहुपत्नीकस्यानालंभुकाया: कर्मा ण्यन्यतमया कारयेत् । अन्यस्यामविद्यमानायामनालंभुकाया: कर्म तत्पुत्रो ब्रह्मचारी गृहस्थो वा कुर्यात् । तन्मंत्रान् यजमान: स्वायतन आसीनो जपेत् । प्रोषिते यजमाने तन्मंत्रान् पुत्रो जपेत् । प्रैषे पत्नीं सन्नह्येत् । पदद्वयलोप: सन्नहनकाले योक्त्रं वेदे: पश्चादुदगग्रं स्तृणीयात् । पत्न्यवेक्षणाभावात्तेजोसीति गार्हपत्य आज्याधिश्रयणं नास्ति । योक्त्रविमोचनकाले मंत्रेण योक्त्रमा ददीत । अन्यत्सर्वं पुत्र: कुर्यात् । संकल्पात्प्रागपि याग: कार्य इत्यंङ्विलामतम् प्रोषिते तूक्तं प्रागेव । पत्न्यां प्रसूतायां स्त्री प्रसवे मासपर्यंतं पुत्रप्रसवे विंशतिरात्रपर्यंतं कर्मानर्हतया तत्कर्म पुत्र: कुर्यात् । रोगादिना कर्मण्यसमर्थायामप्येवमेव कुर्यादित्येत दंतं दीपोक्तम् ।।

।। अथेष्टिकालनिर्णय: ।।

पर्वप्रतिपदो: सन्धिरर्वागावर्तनाद्यदि । तस्मिन्नहनि यष्टव्यं पुर्वेद्युस्तदुपक्रम: ।। आवर्तने यदा संधि: पर्वप्रतिपदोर्भवेत् । तदहर्यागमिष्येत परतश्चेत्परेऽहनि ।। आवर्तनात्पर: संधि: यदि तस्मिन्नुपक्रम: । परेद्युरिष्टिरित्येव पर्वद्वय विनिश्चय: ।। संधि र्यद्यपराह्ले स्याद्यागं प्रात: परेऽहनि । कुर्वाण: प्रतिपद्भागे चतुर्थेपि

न दुष्यति ।। माधवोऽपि-पर्वप्रतिपदोः संधिर्मध्यान्हेवा ततः पुरा। अन्वाधानं पूर्वदिने यागः संधिदिने भवेत् ।। ऊर्ध्वं मध्याह्नतः संधावन्वाधानं हि तद्दिने । इष्टिं परदिने कुर्यादन्या वाजसनेयिनः ।। यस्तु वाजसनेयी स्यात्तस्य सन्धिदिनात्पुरा । न क्वाप्यन्वाहितिः किंतु तदा संधिदिने हि सा ।। सा अन्वाहितिः। संधिश्चेत्संगवादूर्ध्वं प्राक्पर्यावर्तनाद्रवेः । सा पौर्णमासी विज्ञेया सद्यस्कालविधौ तिथिः ।। वृद्धिः प्रतिपदो यास्ति तदर्धं पर्वणि क्षिपेत् । क्षयस्यार्धं तथा क्षिप्त्वा संधिर्निश्चीयतां सदा ।। पर्वणो यश्चतुर्थांशः आद्याः प्रतिपदस्त्रयः ।। इष्टिकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः ।। प्रतिपद्यप्रविष्टायां यदि चेष्टिः समाप्यते । पुनः प्रणीय कृत्स्नेष्टिः कर्तव्या यागवित्तमैः।। स्थालीपाकेतु नायं नियम इत्युक्तम् मदनपारिजातकारेण स्वीयनिबंधे सप्तमस्तबके । परं तु याज्ञिकानां संमतं न तत्र तादृश वाक्यालाभात् । आवर्तनात्तु पूर्वाह्ले त्वपराह्ले ततः परं । मध्याह्नस्तु तयोः संधिर्यदावर्तनमुच्यते । अत्राह्नो द्विधाभाग इत्युक्तं स्मृत्यर्थसारे । मदनपारिजाते कात्यायनः । आवर्तनात्प्राक् यदि पर्वसंधिः कृत्वा तु तस्मिन् प्रकृतिं विकृत्याः। तदैव यागः परतो यदि स्यात् तस्मिन्विकृत्याः प्रकृते परेद्युः।। माधवोऽपि । इष्ट्याादि विकृतीः सर्वा पर्वण्येवेति निश्चयः। खण्डपर्वणि तु । तत्राग्रयणं पौर्णमासात्पूर्वं दर्शानंतरमिति विवेकः ।। अत्र संमतं निर्णयसिंधौ । दर्शेष्ट्याः परं पौर्णमासेष्ट्याश्च प्राग्भवति । इति हेमाद्र्यादयः । दर्शेष्ट्याः परमुक्तमाग्रयणं प्राक् पौर्णमासाच्च तदिति दीपिकोक्तेश्च । अत्र स्मृत्यर्थसारे -पर्वणि तु संपूर्णे पर्वण्यन्वाधानं प्रतिपदि यागः । सखण्डे

पर्वणि तु विशेष उच्यते । पूर्णमासी न्यूनचंद्राऽनुमतिः । पूर्णचंद्रा राकेति द्विविधा । अमावास्या दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूरिति द्विधा। राकाऽनुमत्याविति पौर्णमास्यौ रात्रौच दृष्टेंदुवशाद्भवेताम् । कुहूः सिनीवाल्यपि नष्टचंद्रे स्मृता सितावासितपंचदश्यौ। प्रधानकर्मतिथेरुत्तरतिथौ वृद्धिह्रासयोरर्धं पूर्वतिथौ प्रक्षिप्य कालो विज्ञेयः। सूर्यस्यावर्तनात्पूर्वमावर्तनेवा पर्वप्रतिपत्संधौ सति तस्मिन्नहनि यागः । आवर्तनादूर्ध्वं सन्धौ परेऽहनि यागः । पर्वणो यश्चतुर्थांशः प्रतिपदि तु आद्यास्त्रयोंशाः यागकालः। प्रातःकालयागी । अपराह्णसंधौ परेऽह्नीति प्रतिपदश्चतुर्थांशोऽपि यागकालः । न पूर्वाह्णसंधौ प्रतिपच्चतुर्थांशो यागकालः । अत्राह्नो द्विधाविभागः पूर्वोक्तपर्वद्वयेऽपि समानम् । पौर्णमास्यां विशेषो वक्ष्यते । आवर्तनात्पूर्वसंधौ सद्यस्कालेन वा आवर्तनात्पूर्वं संगवादूर्ध्वं पर्वसंधौतु सद्यस्काल एव । सा पौर्णमासी यजनीयदिने पर्वणि वा सद्यस्कालेति केचिदाहुः । प्रकृतौ सद्यस्कालत्वं कदाचिदपि नास्ति विकृताविव तदिति केचित् । किंच पौर्णमास्यामयं विशेषः। अहःस्वत्यंतदीर्घेषु तिथिह्रासे सति उदयसमीपे पर्व चतुर्थांशाभावेऽपि पूर्वाह्ण पर्वसधिश्च न भवति । तत्रैव पूर्वाह्णसन्धिदिने यागबाधो नान्यत्र तत्र परेऽहनि यागः । अमावास्यायां तु अपराह्णादिपर्वसंधौ सति परेऽहनि दृष्टचंद्रेऽपि यागः । पूर्वाह्णे संधौ सति प्रत्यक्षचंद्रदर्शनाहे यागे भूर्भुवः स्वः स्वाहेत्याज्याहुतिं हुत्वा विप्राय दण्डं दत्त्वा प्रायश्चित्तं प्राच्यां चन्द्रदृष्टो तदहर्यागः । तैत्तिरीययागोऽभ्युदितेष्टि मनस्वत्याज्याहुतिर्वा प्रतीच्यां चंद्रदृष्टौ अन्वाधाने सति परेऽहनि इष्टि

समाप्यान्यत्र हविष्केष्टिः कार्या। तत्राग्निः पथिकृदष्टाकपालः। इन्द्रो वृत्रहा एकादश कपालः। अग्निर्वैश्वानरोऽष्टाकपालः। सशरं धनुर्दक्षिणा। एषा वाजसनयोक्ता इष्टिः प्रकृतिरेव वा पुनः कार्या। मनस्वत्याज्याहुतिर्वा। व्याहृत्याज्याहुतिर्वा। दिनद्वये प्रातर्यागकाले सत्यपि पूर्वाह्णगमंविदिन एव प्रातर्यागः। सर्वथा संधिरेव यागोत्कर्षापकर्ष प्रयोजकः। तिथिवृद्धिह्रासौ न प्रयोजकौ। सप्तदशोतिथिरन्वाधाने निषिध्यते। न यागे विकृतौ। प्राच्यां चन्द्रदर्शने पिंडपितृयज्ञकालः। इति सागरोक्तः पर्वनिर्णयः। दर्शपूर्णमासयोः श्राद्धतिथिषु च वृद्धि ह्रास स्वीकारो नान्यत्रेति सारे खण्डतिथौ निर्णयस्थले॥

अथ पात्रलक्षणम्॥ बौधायन मते। हस्त्योष्ठ हंसमुख वायसपुच्छानामन्यतमाकाराः सेचनवन्यः। प्रादेशारत्निबाहूनामन्यतमायामास्त्वक्स्थानाः सेचनवत्यो वृक्षमूला दण्डाग्रा आसेचना आयामार्धं दण्डा अवशिष्टायामार्धे यथाशोभं त्रिचतुः पञ्चाष्टांगुल बिलयुक्ता अवशिष्टाग्रा दर्वी ध्रुवा प्रोक्षणी च। बहुमात्रेषु तु प्रादेशमध्ये बिलाग्रैः संपाद्यावशिष्टो दण्डः कार्यः। स्रुवस्त्वरत्निमात्रोंगुष्ठपर्वमात्र वृत्त बिलः। धृष्टिमेक्षणे अरत्नि मात्रे चतुरंगुलविस्तृतसमाग्रे। अत्र धृष्टिर्भस्मापसारिणी। मेक्षणं पितृयज्ञादौ होमार्थं उलूखलं प्रादेशारत्नि द्व्यरत्नि अन्यतमायामंदीर्घं तदर्धविस्तारं तदायामस्त्रिगुणो मुसलः। स्फ्यश्च खड्गाकारः चतुरंगुलविस्तृतोऽरत्निमात्रः। चमसः प्रादेशमात्र चतुरंगुल दण्डः। अष्टांगुल चतुरस्रबिलः। दर्वी पालाशी ध्रुवा वैकंकती। प्रोक्षणी वैकंकती स्रुगाकृतिः। स्फ्यस्रुवमुसलानि खादिराणि। चमसः पालाशः न्यग्रोध औदुंबरो वा। एतेषां मूलभूतवचनानि बौधायनीय

श्रौतकल्पसारे त्रिकाड्यां च ज्ञेयानि । नात्र लिखितानि ग्रंथविस्तारभीतेः । बौधायनीय स्मार्तग्रंथमते तु हस्त्योष्ठचो हंसमुख्यश्च तथा वायसपुच्छकाः । त्रिप्रकाराः स्रुचोज्ञेयास्त्रित्वं चासां विकल्पिकम । जुहूप्रभृदध्रुवादीनामेकाकारः स्मृतो बुधैः । आयामो बाहुमात्रः स्यादथवाऽरत्निमात्रकः । प्रादेशेन मितो वापि मताद्बौधायनादपि ।। द्वेधापि धारितस्थापि त्वचेवासेचनास्पदम् । काष्ठाग्रेपि हि तज्ज्ञेयमिति बौधायनोऽब्रवीत् । बिलमष्टांगुलं कार्यं हस्त्योष्ठचा श्रौतविज्जनैः । काकपुच्छचा हंसमुख्या बिलं पचांगुलं स्मृतम ।। चतुरंगुलं त्र्यंगुलं च वैकल्पिकमिहेरितम् । आयामार्धमितो दण्डः प्रादेशारत्नि मात्रके । दण्डस्यैव मिता वृध्दिः बाहुमात्रे मनीषिणः ।। यथाशोभि मितां प्राहुराचार्यास्तु बिलादिषु । स्रुवस्यारत्नि मात्रत्वाद्बिलं त्वंगुष्ठपर्वकम् । धृष्टिश्च मेक्षणं तद्वदग्रं वेदांगुलं भवेत् । द्वादशांगुलमायामं तदर्धेन तु विस्तृतम् । उलूखलं बुधैः प्रोक्तं त्रिगुणं मुसलं भवेत् । अरत्निद्वयविस्तारमरत्न्यायाम मात्रकम् । इति वैकल्पिकं ज्ञेयमुलूखलं बुधैः स्मृतम् । प्रादेशमात्रं वा शूर्पं तृणमयं कुर्यात् । खादिरः स्फ्यः खड्गाकारो द्वादशांगुलः षोडशांगुलो हस्तमात्रोऽरत्निमात्रो वा बाहुमात्रो वा । उलूखलं पालाशं द्वादशांगुलोच्चं कुर्यात् । मुसलं खादिरं द्वादशांगुलं कुर्यात् । खादिरः स्रुवो द्वादशांगुलः षोडशांगुलो हस्तमात्रो वा ऽरत्निमात्रो वा बाहुमात्रो वा । खादिरा ध्रुवा द्वादशांगुला षोडशांगुला हस्तमात्रारत्निमात्रबाहुमात्रा वा । मेक्षणं कस्यचित् काष्ठस्य । पालाशं चमसं द्वादशांगुलं तन्मध्येऽष्टांगुलं बिलं चतुरंगुलो दण्डोऽश्वत्थस्य वा कुर्यात् । प्रोक्षणी वैकंकती स्रुगाकृतिः कार्या ।

उक्तानां वृक्षाणामसंभवे यस्य कस्यापि यज्ञियवृक्षस्य पात्राणि कार्याणि। पात्रेषूक्तकाष्ठाद्यभावे वक्ष्यमाणेऽमवृक्षेषु कपित्थादीन् वर्जयित्वा वृक्षमात्रं ग्राह्यमित्युक्तं भाष्यम्। इति पात्रलक्षणम्। स्थालीपाकादि प्रकृत वैकृतहोमानां स्थालीपाक प्रकृतित्वात्। परिभाषादिकं किंचित् प्रासंगिक मत्रैवोच्यते॥

। अथाग्निमुख प्रयोगादि परिभाषा ।

तत्र तत्कर्म कर्ता प्राङ्मुख उपविश्य वक्ष्यमाणेषु कर्मसु वक्ष्यमाण भागे पत्नीमुपवेश्य आचम्य प्राणानायम्य। प्राणायामं तथा कृत्वा कालज्ञानं यथाविधीति। मदन पारिजाते तथा-मासपक्ष तिथीनां च निमित्तानां च सर्वशः। उल्लेखनमकुर्वाणो न कर्मफलभाग् भवेत्॥ इति गौडग्रन्थस्य प्रयोगदीपिकास्थ पद्मवाक्यात्॥ संकल्पं च यथा कुर्यात् स्नान दान व्रतादिकम्॥ अन्यथा पुण्यकर्माणि निष्फलानि भवन्ति चेति पारिजाते मार्कंडेयवचनात्। अमुककर्मकरिष्ये। तदंग स्थंडिलाद्यग्नि प्रतिष्ठापनादि करिष्ये इति संकल्प्य। शुद्धदेशे किंचिदुच्छ्रितं समीकृतं सर्वतोवरमिषुमात्रं अरत्निमात्रमधिकं वोक्तलक्षणं कुण्डं स्थंडिलं वा कृत्वा गोमयेनोपलिप्य याज्ञियेन शकलेन वह्नि स्थापनदेशस्य पश्चात् प्रादेशमात्रामुदक् संस्थां रेखामुल्लिख्य तस्या दक्षिणोत्तरयोः प्रागायते उदक्संस्थे पूर्वरेखया असंसृष्टे द्वे लेखे तयोर्मध्ये तिस्र उदक् संस्था पूर्वया असंहताः। एवं षड्लेखा उल्लिख्य शकलं निधाय स्थंडिलमद्भिरभ्युक्ष्य॥ शकलं निरस्याप उपस्पृश्य एह्यग्ने जुष्टोदमूना इत्येताभ्यां ऋग्भ्यां व्याहृतिभिश्च लेखास्वग्निं प्रतिष्ठाप्य होष्यन्नित्युक्ते एतदंतं कुर्यात्। आज्यद्रव्यके होमे आज्यपरिग्रहश्चेत्तस्य

कृताकृतं परिस्तरणम्। अनादिष्टाज्यहोमेषु येषु कर्मसु सूत्रकृदाज्यपदं नोच्चारयति तत्र परिस्तरणं नित्यम्। सर्वेषु पाकयज्ञेषु आज्यभागौ कृताकृतौ ब्रह्मापि तथा। अथ धन्वंतरिमखे यज्ञशूले च नित्यो ब्रह्मा सूत्रकृत्क्वचिन्मंत्रेण क्वचिन्नाम्ना होमे शूलेच यत्रोभयमपि नोक्तं तत्र नाम्नैव होमः तत्रोदाहरणं प्राजापत्यस्य स्थालीपाकस्य हुत्वेत्यत्र प्रजापतये स्वाहेत्यनेन नाम्नैव होमः। सूत्रे चौलकर्मोपनयन गोदान विवाहा इत्यत्र तेषां पुरस्तात् चतस्त्र आज्याहुतीर्जुहुयात्। अग्नआयूंषि पवस इति तिसृभिः प्रजापते न त्वदेतान्यन्य इति चेत्येकः पक्षो व्याहृतिभिर्वेत्यन्यः समुच्चयमेके इत्यत्रोभयोः समुच्चय इत्यपरे नके कांचनेत्यत्र केषांचिन्मते काम्याहुतिं न कुर्यादिति चार्थोऽयम्। यदा चौलादौ नेके कांचनपक्ष आश्रितस्तदाऽनादिष्ट होमत्वादग्निरिंद्रः प्रजापतिर्विश्वे देवाः ब्रह्मेत्यनादेशे होतव्याः। अनेके पाकयज्ञा एकस्मिन् काले एव कर्तृत्वे स्युश्चेत्तदा समानतन्त्रकास्तंत्रं नामान्वाधानादि चक्षुष्यंतं स्विष्टकृदादि समाप्ति पर्यंतं च तंत्रैकमेव नात्र तंत्रावृत्ति स्तत्रोदाहरणं पर्वणि व्रतलोपे अग्नये व्रतपतये स्थालीपाकः तत्र व्रातपति स्थालीपाक पार्वणस्थालीपाकयो रेककालत्वात् समानतंत्रता। तथा यदा पर्वणि राकादौ पुत्रकामनोत्पद्यते तदा. काम्यपार्वणयोरेककालत्वात् समानतंत्रता। यदा चाश्वयुज्यामाग्रयणाश्वयुजी कर्मणि क्रियते तदापि तथा। अथ पात्रासादन माज्याधिश्रयणकं स्रुवादि संमार्ग इध्मरज्जुप्रहरण मेतच्चतुष्टयमैच्छिकत्वात् कृताकृतम्। पूर्णपात्रमाज्यस्योत्पवन मेतद्द्वयं नित्यत्वेन भवेत्। अथ स्थालीपाकं जुहुयाद्दधि सवतूञ्जुहोत्येवं रूपद्रव्यादेशाभावे। आनः प्रजां जनयतु

प्रजापतिरिति चतसृभिः प्रत्यृचं हुत्वेत्येतादृशस्थले आज्य द्रव्यं येषां केषांचिदन्येषां हविषामप्यसंभवे सर्वत्राज्यमुपादेयं. भारद्वाजमुनेर्मतात् । स्मृत्यर्थसारे नत्वेतत् काम्ये प्रतनिधिर्नास्ति इत्युक्तत्वात् । अथ होमसाधनेऽनुक्ते स्रुवेण होमः । अथ जपानुमन्त्रणे मन्त्र उपस्थानाभिमन्त्रणं इत्येतानि षट् गृह्य कर्माणि उपांशु भवन्ति उपांशुत्वस्येदं लक्षणं करणवदशब्द मनः प्रयोग उपांशु इत्यथ जपादीनां षण्णां लक्षणानि वृत्तौ । जप उच्चारणं विद्यात् ऋत्वर्थमपि तद्भवेत् । अर्थतः कार्य लाभश्चेदर्थ एव क्रतौ भवेत् । मन्त्रमुच्चारयन्नेवं मन्त्रार्थ मनुसंस्मरेत् । अंगिनं तन्मना भूत्वा स्यादेतदनुमन्त्रणम् । एतदेवाभिमन्त्रस्य लक्षणान्वेक्षणादिकम । अद्भिः सस्पर्शनात्रि -क्यात्तदेवाप्यायनं स्मृतम् । उपस्थानं तदेव स्यात्प्रणति स्थान संयुतम् । बाह्यं कार्यं तदेतेषु मंत्रकाले क्रियेत तत् । कर्मणः कारणात्ते स्युः विहितार्थ प्रकाशनात् । मन्त्रेण कृत्वा कर्मान्ते क्रियते कर्म येषु तु । इदं कार्यमन्नेति न क्वचिद्दृश्यते विधिः । लिंगादेवेदमर्थत्वं येषां ते मंत्र संज्ञिताः ॥

अथ जपादीनामुदाहरणानि। शिरः परिगृह्य जपत्यंगादंगादिति जपस्य ॥ शंनो देवीरभिष्टय इत्यनुमंत्र्येत्यनुमंत्रणस्य । कस्य ब्रह्मचार्यसीति केवलमंत्रस्य । मयि मेधां- हरस्वी भूयासमित्युप स्थायेत्युपस्थानस्य । ऋतमग्रे प्रथमं जज्ञ ऋते इति पिण्डा नभिमंत्र्येत्यभिमंत्रणस्य । चरोः श्रप्यमाणे तापादुत्सिक्ते- उत्सिक्तचरुमाज्येनाप्यायंयत्याप्यायस्वसमेतु ते इत्याप्यायनस्य। आनः प्रजां जनयतु प्रजापतिरिति चतसृभिः प्रत्यृचं हुत्वेति कर्मकरणमंत्रस्य सर्वत्रानुमंत्रणाभिमंत्रणोपस्थानवर्ज।

मंत्रांते कर्म कर्तव्यं मंत्रस्य करणत्वात् । सर्वत्रानुमन्त्रणाभ मंत्रणोपस्थानेषु मंत्रोच्चारणं समकालमेव क्रिया भवेत् वृत्तःवुक्तत्वात् । गृह्यकर्मणि कर्मावृत्तौ मंत्रस्याप्यावृत्तिरिति । अथानः प्रजां जनयतु प्रजापतिरिति चतसृभिः प्रत्यृचमित्येवं रूपे सूत्रे यत्र प्रत्यृचग्रहणं तत्र ऋगंते स्वाहाकारं पठन् होमः । यत्र स्यात् प्रत्यृचं शब्दः तत्रैवं होम इष्यते । ऋगंते तत्र होतव्यं स्वाहाकारं पठेनतः । इत्युक्तत्वादाचार्यः समन्वारब्धे जुहुयात् । सदसस्पतिमद्भुतमिति सावित्र्या द्वितीयमित्याग्रेतादृशेषु स्थलेषु मंत्रोक्तदैवतेषु तूष्णीमेव निर्वपणं तूष्णीमेव प्रोक्षणं सहैवान्नं श्रपयेदत्र नास्ति व्युद्धरणं। एवमादिष्टमंत्रहोमेषु सार्वथैचिछके । आज्याधिश्रयणाकरणे आज्यस्य केवलोत्पवनमात्रे दधिसक्तु लाजादि द्रव्यांतरस्य त्रिः प्रोक्षणम् । पाकयज्ञेषु आज्यभागौ कृताकृतावित्युक्तेऽपि तेषां पुरस्ताच्चतस्र आज्याहुतीर्जुहुयादिति सूत्रात् चौलोपन -यनानुप्रवचनीयेत्यादिष्टाज्यभागकेषु कर्मस्वाज्यभागौ नित्यौ। दिङ्नियमो जपहोमादि कर्मसु यत्र नोक्तः तत्र तिस्रो दिशः शस्ता ऐंद्री सौम्यापराजिता । यत्रासीन ऊर्ध्वं प्रह्वोवेति नियमो नोक्तः तत्रासीनेनैव कर्तव्यमंतर्जानुकरोऽनादेशे स्वयं कर्ता प्राक्कूलसाधनानां प्राक्संस्थत्वं च । कर्मणामुक्ते काले शुभं कर्म यज्ञोपवीती प्रदक्षिणांगारं कुर्यात् । पुरस्तादु- दग्वोपक्रमवर्गं चौलकर्मोपनयन गोदान प्रथमविवाहाः चत्वारि वेदव्रतानि समावर्तनमेतानि लौकिकाग्नौ कुर्यात् । उपाकर्मोत्सर्जने वा । यः सर्वाधान्याहिताग्निर्गृह्योक्तानि अष्टकादीनि कर्माणि लौकिकाग्नौ कुर्यात्तत्रैवमनुष्ठानमाज्य भागोत्तरम् । पुनस्त्वादित्या रुद्रा वसवः समिंधतां पुनर्ब्रह्माणो

दसुनीथयज्ञैः ।। घृतेन त्वं तनुवो वर्धयस्व सत्याः संतु यजमानस्य कामाः स्वाहेति हुत्वा प्रधानहोमं कुर्यात् । अथ यद्यग्न्याधेये सर्वमौपासनमभिव्रजेयुः । पुनस्त्वेत्येतया स्रुवाहुतिं हुत्वा लौकिकाग्नौ गृह्याणि कर्माणि प्रयुंजीतेति बौधायन प्रायश्चित्त सूत्रे उक्तत्वात् । अर्धाधानी त्वौपासने गृह्यं कुर्यात् - गृह्यमौपासने कुर्यात् सर्वाधानी तु लौकिके । कार्यं स्मार्तं लौकिके च श्रौतं वैतानिकाग्निषु । इतिस्मृत्यर्थसारे उक्तत्वात् । अत्र जातनाम निष्क्रमणान्नप्राशन चौलानि कुमार्या अपि तूष्णीं । अथेध्मवत्सु कर्मसु अन्वाधानोत्तरमिध्मा बर्हिषोः सन्नहनं होमे सर्वत्रोभयतः परिसमूहन पर्युक्षणे च। अथानुक्तमन्यतो ग्राह्यमिति वचनात् रौद्रराक्षस नैर्ऋत पैतृक छेदन निरसनात्माभिमर्शनानि कृत्वा उपस्पृशेत् । इत्यापस्तंब सूत्रोक्तम् । अविज्ञातस्वरे मंत्रे एकश्रुत्या ब्रूयादित्यलं बहुना । पूर्वं एह्यग्ने जुष्टो दमूनाः इत्येताभ्यामग्निप्रतिष्ठोक्ता तत्र पारिजाते गृह्यपरिशिष्टे स्थंडिलेऽग्नि व्याहृति भिरभ्यात्मं प्रतिष्ठापयति । अत्र व्याहृतिभिरुपलक्षणम् । एह्यग्ने जुष्टो दमूना इत्येतयोः हरदत्तेन मन्त्रभाष्ये तयोर्मंत्रयो रग्निप्रतिष्ठापनपरत्वेन व्याख्यातत्वात् । सर्वत्रापि व्याहृति भिरग्निप्रतिष्ठा कार्या भूर्भुवःस्वरोमिति प्रतिष्ठेति हिरण्य केशीय सूत्रे उक्तत्वात् ।। समिधः-स्मृत्यर्थसारे- पालाश-खादिराश्वत्थ शम्युदुंबरजा समित् । अपामार्गार्कदूर्वाश्च कुशा-श्चेत्यपरे विदुः ।। हेमाद्रौ ब्राह्मे - शमी पालाश न्यग्रोध प्लक्षवैकंकतोद्भवाः । अश्वत्थोदुंबरौ बिल्वश्चंदनः सरलस्त-था ।। शालश्च देवदारुश्च खादिरश्चेति याज्ञियाः । अन्येऽपि विशेषाः पारिजाते - समित् पवित्रं वेदश्च त्रयः प्रादेशसंमिताः।

इध्मस्तद्द्विगुणः कार्यस्त्रिगुणः परिधिः स्मृतः । स्मार्ते प्रादेश इध्मो वा द्विगुणः परिधिः स्मृतः ॥ स्मृत्यर्थसारेऽप्येवम् । स्मार्ते परिध्यनुष्ठानं आपस्तंबीयानां स्पष्टमेव । न सपर्गा समित्कार्या होमकर्मसु जानतेति । अग्निहोत्रं तपः सत्यं वेदानां चैव धारणम् । आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते वापीकूपतटाकानां देवतायतनानि च । अन्नप्रदानमारामाः पूर्तमित्यभिधीयते । इष्टापूर्तादिकं कर्म स्वशाखोक्तं नविद्यते । तत्र बौधायनं ग्राह्यं बह्वृचादिभिरादरात् । इत्युक्तत्वात् बौधायन सूत्रानुसारेण बौधायनीय प्रायश्चित्त प्रदीपोक्तं याव-दपेक्षितं किंचिल्लिख्यते । अथ हविषामर्थे व्रीहियवौ मुख्यौ । तयोरभावे प्रियंगवस्तेषामभावे कोद्रवोद्दालक माषवर्जं सर्वा ग्राम्या श्चोषधयो भोजनेऽविरुध्दा ग्राह्याः । यद्वा व्रीहियव प्रियंगू नामभावे श्यामाकनीवार यवादयः आरण्या ओषधयो ग्राह्याः । तेषामभावे इतर कन्दमूलफलानि ग्राह्याणि । आज्यार्थे गवां घृतं मुख्यं । तस्यालाभे माहिषमाजं वा तयोरभावे तैलं प्रतिनिधि । तस्यालाभे जतिलतैलम् । अतसीकुसुंभ सर्षपतैलं ग्राह्यम् । तेषामभावे पुन्नागमधूकादीनां बीजोद्भव स्नेहा तेषामभावे भोजनेऽविरुध्द नारिकेलादिसंभव स्नेहा ग्राह्याः । लोकशास्त्रविरुध्दानि निंबादीनि च वर्जयेत् । सर्वालाभे यवपिष्टानि व्रीहिपिष्टानि श्यामाकपिष्टानि वाद्भिः संमृज्य आज्यार्थे प्रयुंजीत । जैमिनिराज्यस्य चतुरः प्रतिनिधीनाह ः ऊधन्यं बाह्यं दधि पयो वेति आज्यस्य प्रतिनिधय इति । ऊधन्य ईषद्विलीनं नवनीतम् । शकटादिना वाह्यमाने दधिनि वर्त्मन्येव यद्भवति तद्बाह्यम् । दधि पयसी प्रसिद्धे । आज्य-

पयसोः परस्परप्रतिनिधित्वम् । यथाह कौण्डन्यः । आज्याभावे पयः पयसोऽभावे आज्यं ।। तद्वत् । दर्भकार्ये कुशा मुख्याः कुशाभावे अश्ववालम् । तदभावे शरः कुतप इक्षवः सुगंधतृणानि दूर्वा। अर्जुन दार श्यामाकमुंजा ग्राह्याः । शूकप छन्न बल्वज कृष्ण तूर्ण तृणवर्जं तृणानि दर्भकार्ये गृह्णीयात् । स्मृत्यर्थसारेऽप्येवं-पालाशः खादिरो वेध्मौ मुख्य. पालाशः त्रिविधः श्लक्षणाको लोमशो व्रतरिति । पालाशेषु त्रिविधेषु श्लक्ष्णको मुख्यः तदभावे इतरौ ग्राह्यौ । खादिरौ द्विविधौ रक्तः श्वेतश्चेति । पालाश खादिराभावे यज्ञियानां वृक्षाणां अन्यतमध्ये-ध्माः कार्याः । तेषामप्यभावे निबनीप बिल्वबाधक बिभीतक राजन्यवृक्षशाल्मली रुरुकपित्थकरंजकोविदारश्लेष्मातक पलानीति त्रयोदश वृक्षान् वर्जयित्वा सर्ववृक्षेभ्य इध्मं गृह्णीयात् --स्मृत्यर्थसारेप्येवम् । त्रिकाण्डमण्डनेप्येवमेव ।। एवं पात्रेषूक्त काष्ठाद्यभावे पूर्वोक्त कपित्थादीन् वर्जयित्वा वृक्षमात्र ग्राह्यमित्युक्तं भाव्यम् । अत्र पालाशखादिरेध्माभावे अश्वत्थोदुंबर शम्यपामार्गादय उक्तं भाव्यम् । पालाशः खादिरो वा स्यादिध्मः शमिवटादिकं । ग्राह्यमनयोर्यद्यसंभव इति कारिका । प्रायश्चित्त प्रदीपे-दक्षिणानां काले गौर्हिरण्यं वासो वा दक्षिणां दद्यात् । काम्येष्टिषु वासो दक्षिणा । या अनादिष्टदक्षिणाः प्रायश्चित्तेष्टयस्तासु सर्वत्र हिरण्यं दद्यात् । नित्येष्टिपशुषूक्तानां दक्षिणानामभावे फलानि मूलानि भक्ष्याणि वा दक्षिणां दद्यात्। यथाकथंचिन्नित्यानि कर्तव्यानि । नित्यं नित्यानि कुर्वीत न च नित्यानि लोपयेदित्याचार्येणोक्तत्वात् काम्येष्टिषु नैमित्तिकेष्टिषु च यथोक्तदक्षिणां दद्यात् । तदभावे प्रत्याम्नायत्वेन

शक्त्यनुसारेण हिरण्यं दद्यात् । सति द्रव्ये हीनकल्पं न कुर्यात्। तथाह मनु: हीनकल्पं न कुर्वीत सति द्रव्ये फलप्रदम् । प्रभु: प्रथमकल्पस्य योऽनुकल्पेऽनुवर्तते । न पारलौकिकं तस्य दुर्लभं विद्यते फलमिति ।। अत्र स्मार्तेष्टि शब्देन स्थालीपाक: शतचण्डी रुद्रहोमायुतहोमादीनि च कर्माणि ग्राह्याणि । हविरुच्छिष्टं दक्षिणेत्यादिष्टदक्षिणा आग्रयणे पुत्रिणेत्यादि कारिकोक्तेः । अन्ये वा काम्यवृषोत्सर्गादिका: काम्या: पथिकृदित्यादि प्रायश्चित्तस्थालीपाका: श्रवणाकर्मादि नित्य ग्रहमखादि नैमित्तिकानां वक्ष्यमाणभागे पत्नं मुपवेदयेत्युक्तं । तत्र संस्कार्य संस्कार्यपत्नीनामुपवेशने नियम: स्कंदेनोक्तो भंगभट्टीयां । संस्कारकस्तु सर्वत्र तिष्ठेदुत्तरत: सदा । संस्कार्य: पुरुषो वापि स्त्रीवा दक्षिणत: सदा । ऋतौ पुंसवने चैव सीमंते यज्ञकर्मणि । श्राद्धकाले विवाहेषु पत्नी दक्षिणत: सदा ।। विवाहे गृहवेशे च पुंसि चौले तथैव च । जाते नाम्नि च कुर्वन्ति विच्छिन्नेऽग्नौ तथैव च ।। एषु कर्मसु पत्नी च दक्षिणे चोपवेशयेत् ।। शौनकोऽपि- कन्यादाने विवाहे च प्रतिष्ठा यज्ञकर्मसु । सर्वेषु धर्मकालेषु पत्नी दक्षिणत: सदा ।। स्त्रिषु स्थानेषु सा पत्नी वामभागे प्रशस्यते । पितॄणां पादशौचे च रथारोहे मृतौ तथा ।। अभिषेकेऽपि ।।

अथ पार्वण स्थालीपाकस्य दर्शपौर्णमास्यां प्रथमारंभ: ।। पर्वणि प्रातरौपासनं हुत्वा दर्भेष्वासीनो दर्भान्धारयमाण: पत्नीभि: सह प्राणानायम्य देशकालौ स्मृत्वा यज्ञपुरुषात्मक परमेश्वर प्रीत्यर्थं दर्शपूर्णमास स्थालीपाकाभ्यां यक्ष्ये । तत्रेदानीं पौर्णमास स्थालीपाकेन यक्ष्ये । इति पौर्णमासे । दर्शे तु

पूर्वसंकल्पित दर्शस्थालीपाकेन यक्ष्य इति संकल्प्य ॥ सप्तहस्त श्चतुः श्रृंगः सप्तजिह्वो द्विशीर्षकः । त्रिपात्प्रसन्न वदनः सुखासीनः शुचिस्मितः ॥ स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा । बिभ्रद्दक्षिण हस्तैस्तु शक्तिमन्नं स्रुचं स्रुवम् ॥ तोमरं व्यजनं वामैर्घृतपात्रं च धारयन् । आत्माभिमुख मासीन एवं रूपो हुताशनः ॥ चत्वारि श्रृंगेति चाग्नि ध्यात्वा स्थालीपाके देवतापरिग्रहार्थमस्मिन्नन्वाहितेऽग्नौ जातवेदसमग्नि मिध्मेन प्रजापतिं प्रजापतिं चाधारदेवते आज्येनाग्नीषोमौ चक्षुषी आज्येनाग्निमग्नीषोमौ प्रधानदेवते चरुद्रव्येणेति पौर्णमास्यां अग्निमिद्राग्नीति च प्रधानदेवते चरुद्रव्येणेत्य मावास्यायामग्नि स्विष्टकृतं हुतशेषेण रुद्रं पशुपतिमिध्म सन्नहनेन अग्निमयासमग्नि देवान् विष्णुं अग्निं वायुं सूर्यं प्रजापतिं चेताः प्रायश्चित्त देवता आज्येन ज्ञाताज्ञातदोषपरिहारार्थं त्रिवारमग्नि मरुतश्चाज्येन विश्वान् देवान् संस्रावेण अंगदेवताः प्रधानदेवताः सर्वाः सन्निहिताः सन्तु सांगोपांगेन कर्मणा श्वो यक्ष्ये सद्यस्कालपक्षे सद्यो यक्ष्ये । समस्त व्याहृतीनां प्रजापति ॠषिः प्रजापतिर्देवता बृहतीच्छन्दः अन्वाधान समिद्धोमे विनियोगः ॐ भूर्भुवः स्वः स्वाहा । प्रजापतय इदं । इध्मा बर्हिषी सन्नह्य दर्भैस्त्रिसंधिरावृत्तं रज्जुद्वयं कुर्यात् । तत्र प्रादेशमात्रान् षट्त्रिंशद्दर्भान् रज्जुकरणार्थं गृहीत्वा तत्र द्वादशदर्भैः संधित्रयवतीं रज्जुं प्रादक्षिण्येन कृत्वा पुनरन्यां रज्जुमेवं कृत्वोभयमपि प्रादक्षिण्येन समस्य पुनरन्यां कृत्वा प्रादक्षिण्येन त्रिः प्रथमां उदगग्रामास्तीर्य प्रादेशमात्रां दर्भमुष्टिं कृत्वापउपस्पृश्य प्रागग्रां तस्यांनिधाय तया बर्हिर्द्विरावेष्ट्य

रज्वग्रेण रज्जूमूलं च द्विरावेष्ट्य बर्हिषः पूर्ववेष्टनस्याधस्तात् रज्वग्रं पूर्वतो नयेत् । तद्बहिर्भूमेरन्यत्रोपरि देशे निधायान्यान् बहून् दर्भान् परिस्तरणादि सिध्यर्थं केनचिद्दर्भेण च बंधयेत् । अन्यां रज्जुं पूर्ववन्निधाय तस्यामरत्निमात्रकं पञ्चदशदारुकमुवतवृक्षे द्भूवमिध्ममरत्निमात्रं प्रादेशमात्रं वा निधाय रज्वेध्मं सकृदावेष्टय रज्जूमूलं च सकृदावेष्ट्योपरि निधायेत्यन्वाधानम् । द्व्यहपक्षे एतावत्पूर्वदिन कृत्यं कृत्वा -ऽहन्येव मांसमाषादि वर्जितं दम्पती अश्नीयाताम् । निश्यधश्चमैथुनरहितं शयीयाताम् । अथापरेद्युः प्रातर्होमोत्तरं सोदकेन पाणिनेशानीं दिशमारभ्य प्रदक्षिणमग्निं त्रिः परिसमुह्य पुनः पुनरुदकमादाय पूर्वं परिस्तरणाद्यर्थमुपरिनिहितान् दर्भानादाय दक्षिणोत्तरैरुत्तराधरैः प्रागुदगग्रैर्दर्भैरग्निं परिस्तृणा-तीति । हिरण्यकेशी बौधायनौ । तदेव कांश्चित् पात्रासादनार्थं दर्भान प्रागग्रान् अग्नेरुत्तरतो ब्रह्मवरणपक्षे तदासनार्थं तद्दक्षिणत आस्तीर्याग्नेः समंतात्सोदकेनोत्तानेन हस्तेन पूर्ववत् त्रिः पर्युक्ष्य अथ तेषु दर्भेषु पात्राणि न्यग्बिलानि उभाभ्यां पाणिभ्यां द्वंद्वं प्राक्संस्थमुदगपवर्गं प्रयुनक्ति । चरूद्धरणपात्रेण सह चरुस्थाली प्रोक्षण्यौ दर्वीस्त्रुवौ प्रणीताज्यपात्रे इध्माबर्हिषी शूर्पं कृष्णाजिने उलूखलमुसले दर्वीहोमे द्वादशपात्राणि । केवलाज्यहोमेतु प्रोक्षणी स्त्रुवौ प्रणीताज्यपात्रे इध्माबर्हिषी चेति षडासाद्य समौ साग्रौ दर्भौ प्रादेशमात्रावनन्तर्गर्भौ पवित्रे कुरुते । प्रोक्षणी पात्रमुत्तानं कृत्वा पवित्रेऽनर्धयाप आसिच्य अंगुष्ठोपकनिष्ठिकाभ्यामुत्ताना-भ्यां पाणिभ्यां पवित्रे गृहीत्वा ताभ्यां पवित्राभ्यां तज्जलं तूष्णीं त्रिरुत्पूय पात्राण्युत्तानानि कृत्वेध्मं विस्त्रस्य सर्वाणि

पात्राणि सपवित्रेणोत्तानेन पाणिना ताभिरद्भि युगपत् त्रिः प्रोक्षेत् । अथ चमसं प्रत्यगग्नेः पुरतो नीत्वा पवित्रे अंतर्धाय उत्पूतवारिणान्येन च पूरयित्वा गंधादिप्रक्षिप्य ब्रह्मपक्षे अस्मिन् कर्मणि ब्रह्माणं त्वां वृण इति वृत्वा ब्रह्मा वृतोऽस्मी त्युक्त्वा कर्मांगाचमनं बहिः प्राङ्मुख एव कुर्यात् । प्रावप्रणी- ताप्रणयनात् समस्त पाण्यंगुष्ठोऽग्रेणाग्निं परीत्य दक्षिण आस्तीर्णेषु दर्भेषु निरस्तः परावसुरित्यासनात्तृणमंगुष्ठोप कनिष्ठिकाभ्यां नैऋत्यां निरस्याप उपस्पृश्येदमहमर्वावसोः सदने सीदामि इत्युदङ्मुखो दक्षिणपादं सव्योरूपरि कृत्वोपविश्य । बृहस्पति र्ब्रह्मा ब्रह्मसदन आशिष्यते बृहस्पते यज्ञं गोपाय स यज्ञं पाहि स यज्ञपतिं पाहि समां पाहि । इत्येतदंतं गृह्यपरि -शिष्टोक्तं जपति । अथ कर्ता ब्रह्मन्नपः प्रणेष्यामीत्युक्ते भूर्भुवः स्वर्बृहस्पति प्रसूत इत्युपांशु ॐ प्रणयेत्युचैरुक्त्वातिसर्जेत् । सर्वदा यज्ञमना भवेदेके नैतदिच्छन्ति । निरासश्चोपवेशश्च तथा ब्रह्मजपोऽपि च । प्रायश्चित्ताहुतिः संस्था ब्रह्मणः कर्म पंचकम् । इति पारिजातोक्तेः पंचकर्माणि ब्रह्मणः । ॐ प्रणयेत्युक्ते कर्ता दक्षिणोत्तराभ्यां पाणिभ्यां प्रणीतापात्रं नासिका दघ्नमुद्धृत्याग्ने- रुत्तरतो दर्भेषु निधाय दर्भैः प्रच्छादयेत् । ब्रह्माकरण पक्षेतु प्रणीतापात्रं पूर्ववत्पूरयित्वा ब्रह्मन्नपः प्रणेष्यामीत्याश्रुत्यो प्रणयेत्येतदंतमनुक्त्वैव नासिका दघ्नमुद्धृत्याग्नेरुत्तरतो दर्भेषु निधाय दर्भैः प्रच्छादयेत् । अथ प्रत्यगग्नेः सपवित्रे शूर्पे अग्नये त्वा जुष्टं निर्वपामि इत्यग्नीषोमाभ्यां त्वा जुष्टं निर्वपामि इति चतुरश्चतुरोमुष्टीन् व्रीहीन् निर्वपेदिति पौर्णमास्यां । अग्नयेत्वा जुष्टं निर्वपामीद्राग्निभ्यां त्वा जुष्टं निर्व-

पामीति अमावास्यायां । तत उपरि पवित्रे कृत्वा निर्वाप संख्यया प्रोक्षयेदग्नये त्वा जुष्टं प्रोक्षामि इत्येवमप्यथाग्नेरुत्तरभागे प्रत्यग्ग्रीव उत्तरलोम्नि कृष्णाजिन उलूखलं निधाय तस्मिन् व्रीहीन् पत्न्यवहृतांस्त्रिः फलीकृतांस्त्रिः प्रक्षाल्याग्नौ श्रपयेत् । ततः प्रत्यगग्नेः सपवित्रे आज्यपात्रे आज्यमानीयांगारान् परिस्तरणाद्बहिरग्ने रुदक् अपोह्य तस्मिन्नारूढेऽग्नावाज्यमधिश्रित्य ज्वलतोल्मुकेनावज्वल्य द्वे अंगुष्ठमात्रे दर्भाग्रे प्रच्छिद्य प्रक्षाल्याज्यपात्रे प्रत्यस्य ज्वलता तेनैवोल्मुकेन चरुणा सहाज्यं त्रिः पर्यग्निकृ वोल्मुकं निरस्याप उपस्पृश्याज्यं कर्षन्निवोदगुद्वास्यांगारानग्नावतिसृज्याप उपस्पृश्येति परिशिष्टे शौनके च । तत्रस्थमेवाज्यं प्रोक्षणी जलवत्त्रिः प्रागुत्पुनाति । सवितुष्ट्वेत्यस्य हिरण्यस्तूपः सविता पुरउष्णिक् आज्यस्योत्पवने विनियोगः । ॐ सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः इति सकृन्मंत्रेण द्विस्तूष्णीं । एवं त्रिरुत्पूय पवित्रे प्रोक्ष्यानले प्रक्षिपेत् । तूष्णीं स्कन्दायस्वाहेत्याचारः । अथ बर्हिरात्मनोऽग्नेर्मध्येन नीत्वोन्मुच्योदगग्रां रज्जुं प्रसार्य तस्यां बर्हिः प्रागग्रमुदगपवर्ग मविरलमास्तीर्य तस्मिन्नाज्यपात्रं संस्थाप्य दक्षिणेन पाणिना दर्वीस्रुवावादाय सव्येन कांश्चिद्दर्भान् सहैवाग्नौ प्रताप्य भूमौ दर्वीं निधाय दक्षिणेन पाणिना स्रुवस्य बिलं दर्भाग्रैः प्रागादि प्रागपवर्गं त्रिः संमृज्याग्रैरेवाभ्यात्मं बिलपृष्ठं त्रिः संमृज्य दर्भमूलैर्दण्डस्याधस्तात् बिलपृष्ठादारभ्य यावदुपरिष्टाद्बिलं तावत्त्रिः संमृज्य तैरेव स्रुवमद्भिः प्रोक्ष्य प्रताप्योदगाज्याद्बर्हिषि आसाद्य तथा तैरेव दर्भैर्दर्वीं च संमृज्य स्रुवादुदङ् निधाय दर्भान् प्रोक्ष्याग्नौ

प्रहरेत् । सुश्रृतं चरुं स्रुवेणाभिघार्यो दगुद्वास्यांतरेणाग्निमाज्यं च नीत्वाज्याद्दक्षिणतो बर्हिष्यासाद्य पुनरप्यभिघार्य सह श्रपण पक्षे पृथगुद्धरणाय चर्वाज्ययोर्मध्ये पात्रांतरं निधाय ऋग्विधानोक्तमग्निमभ्यर्चेत् । विश्वानिन इत्यृचस्य आत्रेयो वसुश्रुतोऽग्निस्त्रिष्टुप् । अग्न्यर्चने विनियोगः । विश्वानिनो दुर्गहा--मश्यां इत्यष्टभिः पादैरष्टदिक्ष्वक्षतादिभिरभ्यर्च्य यस्मैत्वं सुकृते-- स्वस्ति । इत्यग्निमभ्यर्च्यात्मानं चालंकृत्येति पारिजातोक्तेः आत्मानमलकृत्य हस्तं प्रक्षाल्येध्मबंधनरज्जुं प्रणीताया मुखे क्षिपेदित्युक्तेः प्रणीता मुखे निधाय दक्षिणेन पाणिना इध्ममादाय सव्ये धृत्वा मूलमध्याग्रेषु स्रुवेण त्रिरभिघार्य मूल मध्ययोर्मध्यभागे इध्मं गृहीत्वा सव्यं हृदि निधाय । अयंत इध्मेत्यस्य वामदेवो जातवेदा अग्निस्त्रिष्टुप् इध्महवने विनियोगः । ॐ अयंत इध्म आत्मा जातवेदस्तेनेध्यस्व वर्धस्व चेद्ध वर्धय चास्मान् प्रजया पशुभि र्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा इतीध्ममग्नावाधाय जातवेदसेऽग्नय इदं नममेति त्यक्त्वा । स्रुवेणाज्यं गृहीत्वा अग्नेः परिस्तरणानां च वायवीमारभ्याग्नेयी पर्यंतं प्रजापतय इति चतुर्थ्यंतं पदं स्मरन् स्वाहेति उपांशूक्त्वाऽघारयेत् । पुनस्तथैव निर्ऋतिमारभ्येशानीपर्यंतं आघारयेत् उभयत्र प्रजापतय इदं नममेत्याघार संज्ञकावितः परं सर्वत्राज्यं स्रुवेण गृहीत्वा तत्कार्यं कुर्यात् । अग्नावुत्तरतो अग्नये स्वाहा अग्नय इदं । दक्षिणतः सोमाय स्वाहा सोमायेदं -- एतावाज्यभागौ । ततः पूर्वनिहितपात्रांतरेऽर्धं चरुमुद्धृत्य स्थालीस्थमिदमग्नये इदमग्नीषोमाभ्यामिति पौर्णमास्यामभिमृशेत् । अभीष्टचरोरुदगपवर्गं तथैवामावास्यायां

मिदमग्नये इदमिंद्राग्नीभ्यामिति । दर्व्यामुपस्तीर्याग्नेय चरु मध्यादंगुष्ठोपकनिष्ठिकाभ्यां अंगुष्ठपर्वमात्रमापस्तंबसूत्रात्तिरश्चीनमवद्य दर्व्यामेोप्यास्यैव पूर्वतः तद्वद् द्वितीयमनूचीनं पंचावत्तो चेत्पश्चार्धादप्यवदाय पात्रस्थमनभिघार्य दर्वीस्थमप्यभिघार्य दर्व्यापार्श्वेन मध्ये जुहोत्यग्नये स्वाहाऽग्नयइदं नमम । तथैवेतरचरोरवदाय पूर्वाहुतेः प्राग्वोदग्वाऽग्नीषोमाभ्यां स्वाहा अग्निषोमाभ्यामिदमिति पौर्णमास्यामेवं इंद्राग्निभ्यां स्वाहा इंद्राग्निभ्यामिदमित्यमावास्यायां द्वितीयं । दर्व्यामुपस्तीर्य प्रधान चरुभागोत्तरार्धात् पूर्वावदानतो भूयोऽनूचीनाभिरेवांगुलीभिः सकृदवदायोप्य पंचावत्ती चेत्पश्चार्धादप्यवदायोप्य तथैव द्वितीयभागात्ततः पात्रस्थमन्नमनभिघार्यैव स्विष्टकृतं द्विरभिघार्य यदस्येत्यस्य हिरण्यगर्भोऽग्निः स्विष्टकृदिति धृतिः । स्विष्टकृद्धोमे विनियोगः ।। ॐ यदस्य कर्मणो त्यरीरिचं यद्वान्यूनमिहाकरम् । अग्निष्टत् स्विष्टकृद्विद्वान् सर्वं स्विष्टं सुहुतं करोतु मे ।। अग्नये स्विष्टकृते सुहुतहुते सर्वप्रायश्चित्ताहुतीनां कामानां समर्धयित्रे सर्वान्नः कामान्त्समर्धय स्वाहा इतीशान्यामसंसृष्टं हुत्वा । अग्नये स्विष्टकृत इदं नमम । इध्मबंधनरज्जुं विस्रस्यानले प्रास्य रुद्राय पशुपतये स्वाहा रुद्राय पशुपतय इदं ।।अप उपस्पृश्य । अयाश्चेति विमदोयाळग्निः पंक्तिः प्रायश्चित्ताज्यहोमे वि- ।। ॐ अयाश्चाग्नेस्य –षजं स्वाहा । अयसेऽग्नय इदं । अतो देवाइत्यस्य काण्वो मेधातिथिर्देवा गायत्री । प्राय-। ॐ अतो देवा---धामभिः स्वाहा । देवेभ्य इदं ।। इदं विष्णुरित्यस्य काण्वो मेधातिथिर्विष्णुः गायत्री । प्राय---।। ॐ इदं विष्णु--- सुरे स्वाहा । विष्णव इदं ।। व्यस्तसमस्त व्याहृतीनां

विश्वामित्र जमदग्नि भरद्वाज प्रजापतय ऋषय: । अग्निवायु सूर्यप्रजापतयो देवता: गायत्र्युष्णिगनुष्टुब्बृहत्यश्छंदांसि । प्राय-- ।। ॐ भूः स्वाहा अग्नयइदं । ॐ भुव: स्वाहा । वायवइदं । ॐ स्व: स्वाहा सूर्यायेदं । ॐभुर्भुव: स्व: स्वाहा प्रजापतय इदं ।। एता: सर्वाप्रायश्चित्ताहुतय: सप्त । ततो ब्रह्मा कर्तारं परीत्याग्नेर्वायव्यदेशे तिष्ठन् एता एव सप्ताज्याहुतीर्जुहुयात् । त्यागं यजमानोऽत्र कुर्यात् । ततो ब्रह्माभावे कर्ता वा । अनाज्ञातमिति मंत्रद्वयस्य हिरण्यगर्भोऽग्निस्त्रिष्टुप् । ज्ञाताज्ञात दोषानिबर्हणार्थमाज्यहोमे । ॐअनाज्ञातं ----तथ॰ स्वाहा । अग्नयइदं । ॐ पुरुषसंमितो ----तथ॰स्वाहा । अग्नयइदं ।। यत्पाकत्रेत्यस्याप्त्यस्त्रितोऽग्निस्त्रिष्टुप् । अनाज्ञातदोष निबर्हणार्थं प्रार्याश्चत्ताज्यहोमे । ॐ यत्पाकत्रा--- यजातिस्वाहा । अग्नय इदं । यद्वो देवा अभितपा मरुतस्त्रिष्टुप् । मन्त्रदेवता हवि -विपर्यासादि दोषपरिहारार्थमाज्यहोमे--।। ॐ यद्वो देवा--तन स्वाहा । मरुद्भ्यइदं । अथात्र यद्यपि प्रयोग पारिजात कारेण पूर्णाहुतिरुक्ता तथाप्यनुष्ठान दर्शनाभावान्नलिखिता । अथ बर्हिषि पूर्णपात्रं निनयेत् केचित् पूर्णमसीत्यादि पठन्ति । पूर्वासादितं पूर्णपात्रमास्तीर्णे बर्हिषि दक्षिणपाणिना स्पृशन् पूर्णमसि पूर्णं मे भूया: सुपूर्णमसि सुपूर्णं मे भूया: सदसि सन्मे भूया: सर्वमसि सर्वं मे भूया: अक्षितिरसि मामे क्षेष्ठा इति जपित्वा कुशाग्रैः प्रागादि पंच दिक्षु मन्त्रैर्जलं सिंचेत् । प्राच्यां दिशि देवा ऋत्विजो मार्जयन्ताम् । दक्षिणस्यां दिशि मासा: पितरो मार्जयंताम् । अपउपस्पृश्य प्रतीच्यां दिशि गृहा: पशवो मार्जयंताम् । उदीच्यां दिश्याप ओषधयो वनस्पतयो

मार्जयंताम् । ऊर्ध्वायां दिशि यज्ञः संवत्सरः प्रजापति र्मार्जयंताम् । तत एकश्रुत्यापठन् कुशाग्रैः स्वशिरसि मार्जयेत् । आपो अस्मान् इत्यस्य यामायनो देवश्रवा आप स्त्रिष्टुप् । मार्जने ---।। आपो अस्मान् मातरः शुंधयंतु घृतेन नो घृतप्वः पुनंतु । विश्वं हि रिप्रं प्रवहन्ति देवी रुदिदाभ्यः शुचिरापूत एमि । इदमापः सिंधुद्वीप आपोऽनुष्टुप् । मार्जने ॐ इदमापः प्रवहत – नृतम् । सुमित्र्यान आप ओषधयः सन्तु दुर्मित्र्यास्तस्मै संतु योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तं हन्मीत्यनेन नैर्ऋत्यां कुशाग्रैरपः सिचेत् । ततो ब्रह्मा यजमान वामपार्श्वस्थित पत्न्यंजलौ पूर्णपात्रस्थं जलं । माहं प्रजां परासिचं यानः सयावरी स्थन । समुद्रेवो निनयानि स्वं पाथो अपीथेत्येकश्रुत्या पठन् प्रत्यङमुखं निषिच्यांजलिस्थोदकेन यजमानं पत्नीं च प्रोक्षयेत् । पत्नी तज्जलं बर्हिषि निषिंचेत् अथवा वर्तव स्ववामपाणावुत्ताने बर्हिषि निधाय दक्षिणपाणिना पूर्णपात्र मादाय माहं प्रजां परासिचं इत्यात्माभिमुखं निषिच्य पाणिस्थं जलं संस्कारकर्मसु संस्कार्यानपि प्रोक्षेत् ।। अथ कर्ता वायव्यदेशे तिष्ठन् अग्निमुपतिष्ठेत । ॐ चमे स्वरश्च मे यज्ञोपचते नमश्च । यत्ते न्यूनं तस्मै त उपयत्तेऽतिरिक्तं तस्मै ते नमः इति । ब्रह्माप्येवमेव उपतिष्ठेत । ततः कर्ता स्नात्वा पुंड्रं मृदा कुर्याद्धुत्वा चैव तु भस्मना। देवानभ्यचर्य गंधेन सर्वपापापनुत्तये । इति पारिजात ब्रह्माण्ड पुराणोक्तेः ।। मानस्तोक इति कुत्सो रुद्रो जगती । विभूति ग्रहणे विनियोगः । ॐ मानस्तोके -- हवामहे इति ततो विभूतिमंगे लिपेत् त्र्यायुषं जमदग्नेः ललाटे । कश्यपस्य त्र्यायुषं

कण्ठे । अगस्त्यस्य त्र्यायुषं नाभौ । यद्देवानां त्र्यायुषं दक्षिणस्कन्धे । तन्मे अस्तु त्र्यायुषं वामस्कन्धे । सर्वमस्तु शतायुषं शिरसि धारयेत् । ततः परिस्तरणानि विसृज्याग्निं परिसमुह्य पर्युक्ष्य पुष्पादिभिरलंकृत्य ब्रह्मणे हुतशेषं घृतादिकं हिरण्यं च दद्यात् तदभावेऽन्यस्मै ब्राह्मणाय। ततो यस्यस्मृत्या – मन्त्रहीनं -- प्रमादात्कुर्वतां कर्म-इत्यनेन स्थालीपाकेन यज्ञपुरुषात्मक श्रीपरमेश्वरः प्रीयतां इति ब्रह्मार्पणं कृत्वा ब्राह्मणान् भोजयेदिति पौर्णमास स्थालीपाकः। दर्शस्थालीपाकेतु दर्शस्थालीपाकं करिष्ये अग्नीषोम पदस्थाने सर्वत्रेंद्राग्नीपद मावपेदयमेव विशेषः स्यात् । दर्शेतु अन्यत्समं भवेदग्निकर्मांतेऽन्युदकशेषं त्यजेत् ॥ इति स्थालीपाकः। इति श्रीमद्दारडोपनामक लक्ष्मीधरात्मज नारायण भट्ट कृते गृह्याग्नि सागरे स्थालीपाकप्रयोगः ॥

॥ अथ स्थालीपाक लघुप्रयोगः ॥

तत्रामुककर्म करिष्ये तदंगं स्थंडिलादि करिष्ये । अष्टादशांगुलमवरमधिकं सर्वतः स्थंडिलं कृत्वा गोमयेनोपलिप्य यज्ञियशकलमूलेन रेखाद्वयमग्रेण चतस्र उल्लेखन क्षेत्रे पश्चिमत स्त्वंतरंगुलं त्यजेत् यास्येऽष्टांगुलं त्यजेत् सौम्येंगुलद्वयं प्राच्यामर्धांगुलं एवमुल्लिखेत् षड्रेखा उदगायतां पश्चात्प्रागायते नानां तयोरितरो मध्ये स्थंडिले शकलं निधाय स्थंडिलमभ्युक्ष्य नैर्ऋत्यां शकलं निरस्याप उपस्पृश्य। एह्यग्ने राहूगणो गौतमोऽग्निस्त्रिष्टुप् जुष्टो दमूना आत्रेयो वसुश्रुतोऽग्निस्त्रिष्टुप् अग्न्यावाहने विनियोगः । ॐ एह्यग्न ---देवान् । जुष्टो दमूना

...नानि । व्याहृतीनां परमेष्ठी प्रजापतिः प्रजापति बृंहती अग्निप्रतिष्ठापने वि - । ॐ भुर्भुवः स्वरों अग्नि प्रतिष्ठाप्य । एतावत्सर्वं अग्निप्रतिष्ठायां साधारणम् । समिदादावग्निः समारोपितश्चेत् । प्रत्यवरोहेत्यस्य हिरण्यगर्भोऽग्निस्त्रिष्टुप् अग्नि प्रत्यवरोहणे विनियोगः । ॐ प्रत्यवरोह - शंयोः । इति समारोपित समिधमग्नौ प्रक्षिप्य नित्यहोमो न जातश्चेत् एतदुत्तरं होमसंकल्पादुपस्थानांतं विधाय स्थालीपाकादि कर्मसंकल्पः । यथा - परमेश्वरप्रीत्यर्थं दर्शपूर्णमासाभ्यां स्थाली -पाकाभ्यां यक्ष्ये । तत्रेदानीं पौर्णमास स्थालीपाकेन यक्ष्ये । दर्शे तु दर्शस्थालीपाकेन यक्ष्ये । चत्वारि श्रृंगा गौतमो वामदेवो ऽग्निस्त्रिष्टुप् । अग्निमूर्ति ध्याने वि-। ॐ चत्वारि -। सप्तहस्त : - हुताशनः । क्रियमाणे स्थालीपाके देवतापरि-ग्रहार्थमन्वाधानं करिष्ये । समिद्द्वयं त्रयं वादाय अस्मिन्नन्वाहितेऽग्नौ जातवेदसमग्निमिध्मेन प्रजापतिं प्रजापतिं चाघार-देवने आज्येन अग्नीषोमौ चक्षुषी आज्येनाग्निमग्नीषोमौ च प्रधान देवते चरुद्रव्येण दर्शे अग्निमिंद्राग्नी प्रधानदेवते चरुद्रव्येण अग्निं स्विष्टकृतं हुतशेषेण रुद्रं पशुपतिमिध्मसन्नहनेन विश्वान् देवान् संस्रावेण अग्निमयासं देवान् विष्णुमग्निं वायुं सूर्यं प्रजापतिं च एताः प्रायश्चित्तदेवता आज्येन ज्ञाता ज्ञात दोषनिबर्हणार्थं त्रिवारमग्निं मरुतश्चाज्येन विश्वान् देवान् संस्रावेणांगदेवताः प्रधानदेवताः सर्वाः सन्निहिताः संतु एव-मात्मकेन सांगोपांगेन कर्मणा सद्यो यक्ष्ये । व्याहृतीनां परमेष्ठी प्रजापतिः प्रजापति बृंहती अन्वाधानसमिद्धोमे विनियोगः । ॐ भूर्भुवः स्वः स्वाहा प्रजापतय इदं । तत इध्मा बर्हिषी

सन्नह्योपरि निदध्यात् एतदंतमन्वाधानं पर्वणि कर्तव्यम् । अथापरेद्युः प्रातर्होमोत्तरं सद्यस्कालेऽन्वाधाने तत्तद्देवता परिसमूहनादि पाणिना वोदकेनाग्नेः समंततस्त्रिः परिसमूह्य। दक्षिणोत्तरैः प्रागुदगग्रैः दर्भैरग्निं परिस्तीर्य कांश्चिदुत्तरतो दर्भानास्तीर्य उत्तानेन हस्तेनाग्नेः समंतात् त्रिः प्रोक्ष्य पर्यूह्य परिषेकौ स्तः । सर्वत्र त्रिस्त्रिरंभसा दर्भेषु उत्तरतो द्वंद्वं पात्राणि न्यंचि सादयेत् । उभाभ्यां पाणिभ्यां सहैव चरुस्थाली प्रोक्षण्यौ दर्वीस्रुवौ प्रणीताज्यपात्रे इध्माबर्हिषी शूर्पकृष्णाजिने उलूखलमुसले । प्रोक्षणी पात्रमुत्तानं कृत्वा अनखच्छेदितौ प्रादेशमात्रौ साग्रौ दर्भौ पवित्रे कृत्वोत्ताने सपवित्रे प्रोक्षणी पात्रेऽपो निनीय पवित्राभ्यां त्रिरुत्पूयोत्तानानि पात्राणि कृत्वेध्मं विस्रस्य सर्वाणि पात्राणि त्रिः प्रोक्षयेत् । सपवित्रं चमसं स्वपुरतो निधायाद्भिरापूर्य गंधपुष्पाणि प्रक्षिप्य नीत्वा तन्नासिकादघ्नमुदगग्नेर्दर्भेषु निधाय दर्भैः प्रच्छाद्य प्रत्यगग्नेः सपवित्रां तर्हिते शूर्पे प्रतिदैवतं चतुरश्चतुरो मुष्टीन्निर्वपेदग्नये त्वा जुष्टं निर्वपाम्यग्नीषोमाभ्यां त्वा जुष्टं निर्वपामि अग्नये त्वाजुष्टं निर्वपामि इंद्राग्निभ्यां त्वाजुष्टं निर्वपामि उपरि पवित्रं कृत्वा निर्वापसंख्यया प्रोक्षेदग्नये त्वा जुष्टं प्रोक्षामि अग्निषोमाभ्यां त्वा जुष्टं प्रोक्षामि अग्नये त्वा जुष्टं प्रोक्षामि इंद्राग्निभ्यां त्वा जुष्टं प्रोक्षामीत्येवमूहः । पात्राणामुत्तरतः पूर्वग्रीवोत्तरलोम्नि कृष्णाजिने उलूखले व्रीहीन् पत्न्यवहन्यात् त्रिः शुक्लीकृत तण्डुलान् त्रिः प्रक्षाल्याग्नौ श्रपयेत् ॥

सपवित्रे आज्यपात्रे आज्यमासिच्य अग्निं परिस्तरणाद्बहिरपोह्योत्तरतोंगारास्तेष्वधिश्रित्य तद्घृतमुल्मुकेनावज्वल्य प्रोक्षितं

दर्भाग्रद्वयं प्रक्षिप्य तेनैव ज्वलता चरुणा सहाज्यं त्रिः पर्यग्निकृत्वोल्मुकं निरस्याप उपस्पृश्य कर्षान्नबोदगुद्वास्यां ·गारानग्नावतिमृज्यापउपस्पृश्यांगुष्ठोपकनिष्ठिकाभ्यां पवित्रे असंहते गृहित्वोत्तानाभ्यां पाणिभ्यां सवितुष्ट्वेति हिरण्यगर्भः सवितापुरउष्णिक् । आज्यस्योत्पवने वि -- । ॐ सवितुष्टवा प्रसव -- रश्मिभिः इति सकृन्मंत्रेण द्विस्तूष्णीं तद्घृतं त्रिः प्रागुत्पूय पवित्रे प्रोक्ष्याग्नौ प्रहरेत् । स्कंदायस्वाहा स्कंदायेदं ।। अग्नेः पश्चादुदगास्तीर्णरज्जौ प्रागग्रे बर्हिषि आज्यं संस्थाप्य । दक्षिणेन दर्वीस्रुवौ वामेन दर्भान् सहैवाग्नौ प्रताप्य दर्वीं निधाय स्रुवं वामेन धृत्वा दक्षिणेन दर्भाग्रैः स्रुवबिलाभ्यंतरं प्रदक्षिणं प्रागपवर्गं त्रिः संमृज्य स्रुवं न्यग्बिलं प्रत्यगग्रं निधाय दर्भाग्रैर्बिलपृष्ठं प्रदक्षिणं प्रत्यगपवर्गं त्रिः संमृज्य प्रागग्रमुत्तानंकृत्वा दर्भमूलैर्बिलपृष्ठतो यावदुपरिष्टाद्बिलं स्रुवमेवं दण्डमेकैकं त्रिर्मृज्योताधस्तात्प्रत्यगपवर्गं उपरि प्रागपवर्गं च स्रुवं प्रोक्ष्य प्रताप्य बर्हिषि घृतादुदगासाद्यैवं दर्वीं संमृज्योदक् स्रुवादा साद्य तान् कुशान् प्रोक्ष्य अग्नौ प्रहृत्य स्रुवेणाज्यं गृहीत्वा चरु-मभिघार्योदगुद्वास्यांतरेणाग्निमाज्यं च नीत्वा बर्हिष्याज्याद्दक्षि-णत आसाद्य चरुं प्रत्यभिघार्य चर्वाज्ययोर्मध्येऽन्यत्रात्रं चरु मुद्धर्तुं निधाय । विश्वानिन इत्यग्निमलंकृत्येध्मरज्जुं प्रणीतामुखे निधायेध्ममूलमध्याग्रेषु क्रमेणाभिघार्य सव्यहस्तं हृदि निधाय अयंतेध्मेत्यस्य गौतमो वामदेवो जातवेदा अग्नि स्त्रिष्टुप् इध्महवने विनियोगः । ॐ अयंतइध्म -- धय स्वाहा । जातवेदसेऽग्नय इदं । स्रुवेणाज्य ग्रहणं सार्वत्रिकम् । स्रुवेणाज्यं गृहीत्वा अग्नेर्वायव्यत आरभ्याग्नेयकोण पर्यंतं आज्यधारामृजुं

हरेत् । नैर्ऋतीमारभ्यैशानीपर्यंतं पूर्ववद्धरेत् । उभयत्र मनसा ध्यायन् प्रजापतये स्वाहा प्रजापतय इदं । स्वाहेत्युपांशू च्चारयेदेतावाघारौ । उदगग्नये स्वाहा अग्नय इदं । दक्षिणतः सोमाय स्वाहा सोमायेदं । एतावाज्यभागौ । अथ स्थालीस्थ चरोरर्धं स्थापित पात्रांतरे उद्धृत्य उदक् संस्थमभिमृशेत् । इदमग्नये इदमग्नीषोमाभ्यां दर्शे तु इदमग्नये इदमिंद्राग्निभ्यां । दर्व्यामुपस्तीर्य आग्नेय चरुमध्यतो हविरंगुष्ठपर्वमात्रमवदाय दर्व्यांपोप्यास्यैव पूर्वतस्तद्वदवदायाप्यां तदावपेत् । पात्रस्थमभिघार्याऽप्यां स्थितमप्यभिघारयेत् । दर्व्याः पार्श्वेनाग्निमध्ये जुहुयादग्नये स्वाहा अग्नय इदं । उपस्तरणादि द्वितीयचरुभागादेवमवदाय प्राग्वोदग्वाग्नीषोमाभ्यां स्वाहा अग्नीषोमाभ्यामिदं । पंचावत्तीतु पश्चार्धादप्यवद्यात् । जामदग्न्या वत्सविदा आर्ष्टिषेणास्तथैव च । भार्गवा च्यावना और्वाः पंचावत्तिन ईरिताः ॥ दर्शेत्वेवं द्वितीयं इंद्राग्निभ्यां स्वाहा । इंद्राग्निभ्यामिदं । स्विष्टकृति दर्व्यामुपस्तीर्य प्रथमचरोरुत्तरार्धात् सकृदवदायोप्येवं द्वितीयस्योत्तरार्धात् पंचावत्ती चेदद्वयोरपि पूर्वार्धाद्द्वितीयमवद्येत् पात्रस्थमनभिघार्यैव दर्वीस्थं द्विरभिघार्यैशान्यामसंसृष्टं जुहुयात् । यदस्येति हिरण्यगर्भोऽग्निः स्विष्टकृदतिधृतिः स्विष्टकृद्धामे ० । ॐ यदस्य – करोतु मे । अग्नये स्विष्टकृते – समर्धयित्रे स्वाहा । अग्नये स्विष्टकृतइदं । इध्मरज्जुं विस्रस्याद्भिः संस्पृश्याग्नौ प्रहरेत् रुद्राय पशुपतये स्वाहा रुद्राय पशुपतय इदं । अपउपस्पृश्य । स्रुक्स्रुवयोः संस्रावेण विश्वेभ्यो देवेभ्यः स्वाहा विश्वेभ्यो देवेभ्य इदं ॥ अथ प्रायश्चित्तानि । अयाश्चेति विमदोऽयाळग्निः पंक्तिः

प्रायश्चित्ताज्यहोमे –।। ॐ अयाश्चाग्ने – षजं स्वाहा । अग्नयेऽयस इदं। अतो देवा इति द्वयोः काण्वो मेधातिथि-र्देवा विष्णुर्गायत्री । प्रायश्चित्ताज्यहोमे – ।। ॐ अतो देवा -धामभिः स्वाहा। देवेभ्य इदं। ॐ इदं विष्णुः – सुरे स्वाहा । विष्णवइदं । व्यस्त समस्त व्याहृतीनां विश्वामित्र जमदग्नि भरद्वाज प्रजापतय ऋषयः अग्नि वायु सूर्य प्रजापतयो देवताः । गायत्र्युष्णिगनुष्टुप् बृहत्यश्छंदांसि प्राय-श्चित्ताज्यहोमे –।। ॐ भूः स्वाहा अग्नय इदं। ॐ भुवः स्वाहा वायव इदं। ॐ स्वः स्वाहा सूर्यायेदं। ॐ भूर्भुवः स्वः स्वाहा। प्रजापतय इदं । अनाज्ञातमिति द्वयो र्हिरण्य-गर्भोग्निरनुष्टुप्। ज्ञाताज्ञात दोषनिबर्हणार्थं प्रायश्चित्ताज्य-होमें – । ॐ अनाज्ञातं – तथऽस्वाहा । अग्नय इदं । ॐ पुरुष – तथऽस्वाहा अग्नयइदं ।। यत्पाकत्रेत्या प्त्यस्त्रितोऽग्निस्त्रिष्टुप् । न्यूनातिरिक्तदोष निबर्हणार्थं प्रायश्चित्ताज्य --।। ॐ यत्पाकत्रा -- यजाति स्वाहा। अग्नय इदं ।। यद्वो देवा अभितपामरुतस्त्रिष्टुप् । विपर्यासदोष निबर्हणार्थं प्राय --।। ॐ यद्वो देवा – तन स्वाहा । मरुद्भ्य इदं ।। बर्हिषि पूर्णपात्रं निनयेत्। आनीयैवं कुर्यात्। पूर्णमसि पूर्णं मे भूयाः सुपूर्णमसि सुपूर्णं मे भूयाः सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूयाः अक्षितिरसिमामेक्षेष्ठाः इति संप्रार्थ्य प्रति दिशं मार्जयेत् । प्राच्यां दिशि देवा ऋत्विजो मार्जयंतां । दक्षिणस्यां दिशि मासाः पितरो मार्जं-यंताम् । अपउपस्पृश्य । प्रतीच्यां दिशि ग्रहाः पशवो मार्जयंताम्। उदीच्यां दिश्यापओषधयो वनस्पतयो मार्जयंताम्।

ऊर्ध्वायां दिशि यज्ञः संवत्सरः प्रजापतिर्मार्जयंताम् ।। आपो अस्मान् इत्यस्य यामायनो देवश्रवा आपस्त्रिष्टुप् । मार्जने। इदमापः इत्यस्यांबरीषः सिंधुद्वीप आपोऽनुष्टुप् । मार्जने । ॐ आपो अस्मान् – एमि । इदमापः – नृतम् । सुमित्र्यान आप ओषधयः संतु -- द्विष्मः । इति कुशाग्रैरपः सिंचेत् । बर्हिषि सव्यहस्ते पूर्णपात्रं निनयेत् । ॐ माहं प्रजां -- पीथ इति । वामहस्ते जलं क्षिपेत् । गंगादि स्मरणं । मानस्तोक इति विभूतिं धृत्वा ॐ चमे -- तस्मै ते नमः । एवमुपस्थाय परिस्तर -णान्युत्तरे विसृज्य प्राग्वत् परिसमूहनपर्युक्षणे कृत्वा हुतशेष मन्नमाज्यं च ब्रह्मणे ब्राह्मणाय वा दद्यात् । अग्नि पूजन प्रदक्षिणादि कृत्वा कर्म समापयेत् ।। यस्य स्मृत्या – तदस्तु मे प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् । स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ।। अग्निसमारोपो विवक्षितश्चेत् । अश्वत्थसमिधि समारोपयेत् । तदभावे खादिरपालाशोदुंबराणा मन्यतर समिधि वा समारोपयेत् । अयं ते इत्यस्य गाथिनो विश्वामित्रोऽग्निरनुष्टुप् । समिध्यग्नि समारोपणे वि -- । ॐ अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः । तं जानन्नग्न आसीदाथानो वर्धया गिरः ।। इत्यारडोपनामक नारायण भट्ट कृते गृह्याग्निसागरे लघुस्थालीपाकप्रयोगः ।।

अथ प्राकृतवैकृतानां स्थालीपाकानामेतत्सर्वं साधारणं तंत्रं । तत्र सद्यस्कालत्वं प्रधानदेवतान्यत्वं च ज्ञेयमथ पूर्वोक्त समान तंत्रतायाः प्रयोगक्रम आश्वयुज्याभाग्रयणाश्वयुजीकर्मणी क्रियेते तदाश्वयुज्याग्रयणे पृथक् पृथक् उल्लिख्याग्रयणमाश्वयुजी कर्मणासह समान तंत्रं करिष्य इति संकल्प्याश्वयुजीकर्मणः

प्रधानहोमं कृत्वाप्रयणे प्रधानहोमः । द्वयोश्चर्वोरेकः स्विष्टकृदित्यादि समानं । प्रयोगपारिजाते भगवान् -- आ।- ज्यस्थालीमादायाज्यं तस्थां निषिच्य उदगग्ने निरूढेषु त्वंगारेषु सभस्मसु । अधिश्रित्य विलाप्यैतदवज्वल्य ज्वलत्तृणैः ॥ आज्ये प्रत्यस्य दर्भाग्रे त्वंगुष्ठपर्व मात्रके ॥ अत्रोक्त निरूढ शब्दार्थः स्मृतिदीपिकायां व्याख्यातः ॥ निरूढः स्याद्विभक्तोऽग्निर्यः परिस्तरणाद्बहि । अनिरूढः स वह्निः स्याद्यः परिस्तृति मध्यगः इति ।। यत्तु कैश्चिदुच्यते । अग्नेरुत्तरतोंऽगारान्नि- रुह्याज्यस्य सत्क्रियां । कुर्यात्परिस्तृतेरर्वाक् न परिस्तरणाद्बहिः ॥ इति । तदेतत् चिंत्यमित्युक्तम् । पारिजाते तत्रैव - जामदग्न्या वत्सविदा आर्ष्टिषेणास्तथैव च । भार्गवा च्यवना और्वाः पंचावर्त्तिन ईरिताः ॥ एतेभ्योऽन्ये द्विजाः सर्वे ज्ञेयाश्चतुर -र्वत्तिनः ॥ ऋग्विधाने - विश्वानिन इति द्वाभ्यां ऋग्भ्यां यो वह्निमर्चति । स तरत्यापदः सर्वा यथा प्राप्नोति चाक्षयमिति । होमे मुद्रात्रयं प्रोक्तं मृगी हंसी च सूकरी । मुद्राहीनस्तु यो होमस्तत् सर्वं निष्फलं भवेत् ॥ सूकरी सर्वांगुलयो हंसी मुक्तकनिष्ठिका । मृगी कनिष्ठतर्जन्यौ मुद्रात्रयमुदाहृतम् ॥ अभिचारे च होमे च सूकरी कथ्यते बुधैः । यज्ञे शांतिकवल्याणे मृगी हंसी प्रकीर्तिने ॥ स्यात्त्रिमुद्रा भृगीमुद्रा होमे सर्वं फलप्रदा । कर्मांते पूर्णपात्रं तदाकृष्यैवावनीं स्पृशेत् । बर्हिषि स्थाप्य संतर्प्येत् स्त्रावयेद्वारुणीं दिशम् । वामं तत् पश्चिमे न्यस्य करंदक्षिणगृह्य च । न्यचं कुर्यात्ततः पात्रं पश्चिमा- भिमुखं द्विजः ॥ ताः स्मृत्वा विशमानाम्तु समुद्रं प्रति पावनीः ॥ आत्मानं प्रोक्षयेत्पश्चात् अद्भिस्ताभिः शुभाप्तये ॥ संतर्प्येति

संतर्पणमुत्सेचनम् । प्राच्यां दिशीति पंचभिर्मंत्रैः । यथोक्त दक्षिणालाभे हिरण्यं वा स्वशक्तितः । यद्यस्ति हुतशेषं तु देयं विप्राय तद्धविः । एतावत्सर्वं प्रयोगपारिजाते उक्तम् । संग्रहे - अग्रे धृत्वा तु विफलं मध्ये धृत्वा प्रजाक्षयम् । मूलेन म्रियते होता स्रुवस्थानं कथं भवेत् ॥ अग्रान्मध्याच्च मध्ये तु मूलान्मध्याच्च मध्यतः । स्रुवस्तु धार्यो विद्वद्भिः सर्वकाम प्रसिद्धये ॥ इति संग्रहोक्तम् ॥ इदानीं यथा औपासनहोमेऽग्निहोत्रहोमे वा सायं प्रातरौपसनहोमौ करिष्ये तत्रेदानीं सायमौपासनहोमं करिष्ये । इति पूर्वमुदाहृतः संकल्पः । तथाऽऽत्रापि स्थालीपाकविषये दर्शपूर्णमासाभ्यां स्थालीपाकाभ्यां यक्ष्य इति कर्मैक्यात् समुदायात्मकसंकल्पं कृत्वा तत्रे दानीं पौर्णमासस्थालीपाकेन यक्ष्य इति पौर्णमासे । दर्शे तु पूर्वं समुदाय संकल्पस्य जातत्वात् पूर्वसंकल्पित दर्श स्थालीपाकेन यक्ष्य इत्येवरूप एव संकल्पः । केचिद्दर्शपौर्ण मासारंभे एव संकल्प इति वदंति । नैतन्मतं मीमांसानुसारिणां याज्ञिकानां । तत्र कारिकायां -- प्रातरौपासनं हुत्वा समिधौ द्वे निधाय च । अथवा तिस्र आदध्यात् ऋतुसंकल्पपूर्णकमिति उक्तत्वात् सर्वत्र कर्म संकल्पोत्तरं द्वे तिस्रो वा समिधोऽन्वादध्यात् तदन्वाधानम् । अन्वाधानं नाम संकल्पादनुलक्षीकृत्य समिधामाधानम् । उपसमिंधनं । प्रथमतो बलवत्काष्ठं बलवत्करणमिति । धूर्ते आंडविलायां च । पारिजातेऽपि अन्वाधानं नाम द्वयोस्तिसृणां वा समिधामभ्याधानम् । तदुक्तं गृह्यपरिशिष्टे – अन्वादधाति कर्मपुरःसरं द्वयोस्तिसृणां वा समिधामभ्याधानमिति । एतादृशेनान्वाधानेन कृतेन अग्नेरन्वाहितता

संपद्यते । तस्मात्त पूर्वं नस्मिन्नग्नौ जातवेदसमग्निमिध्मे त्यादि वक्तव्यत्वात् अस्मिन्नग्नावित्येवोक्तम् । प्रागुक्तलक्षणमन्वाधान मकृत्वैव अन्वाहितेऽग्नौ जातवेदसमित्याद्येवं उल्लेखः केन प्रमाणेन प्राप्यते तदेतत्सद्भिर्विचारणीयम् । यत्तु आंध्रादि देशे केचिदाधुनिका याज्ञिकाः अन्वाहितेऽग्नौ जातवेदसमेव मुल्लेखार्थं पूर्वं समिधोऽभ्याधाय अन्वाहितत्तां संपाद्य अन्वाहितेऽग्नावेवमुल्लेख कुर्वंति । तदेतत्सद्भिर्युक्तायुक्तं विचारणीयम् । मम तु तथैव युक्तमिति प्रतिभाति । तच्चान्वाधानं । श्रोते ममाग्न इत्यादि मंत्रैः व्याहृतिभिस्तूष्णीं वेति पक्षत्रयं । स्मार्ते तूष्णीं व्याहृतिभिर्वा । द्वे प्रधानके पौर्णमासे दर्शे वा यागे स्विष्टकृति दर्वीमुपस्तीर्य प्रथमप्रधान चरुभागस्योत्तरार्धतः सकृदवदाय दर्व्यामोप्य तथैव द्वितीयप्रधानभागोत्तरतः सकृदवदाय दर्व्यामोप्य पचावत्ती चेच्चरुद्वयादपि पूर्ववत्तथैव सकृत्सकृदवदाय ओप्य चरुननभिघार्यैव स्विष्टकृतं द्विरभिघार्य यजेत् । नात्र चतुरावत्तिनः पचावृत्तता तथा पंचावत्तिनः सप्तावत्तता शंकनीया । तत्र पूर्वं दर्व्यां सर्वार्थत्वेन कृतेनोपस्तरणेन अन्ते सर्वार्थत्वेन कृतेन द्विरभिघारणेन एकैकस्य द्रव्यस्य चतुरवत्वं पंचवत्वं संपद्यते । अनेनैव न्यायेन बहुप्रधानद्रव्यके कर्मणि अप्येवमेव सर्वेषां प्रधान द्रव्याणां स्विष्टकृत्येकदेवतां कृत्वा तदुपस्तरणाभिघारणेषु तंत्रता पुनर्द्रव्यप्राधान्यत्वानुरोधेन उपस्तरणाभिघारणतन्त्रता नपुनर्द्रव्यप्राधान्यानुरोधे उपस्तरणाभिघारणांगावृत्तिः । अतएव दर्शे यागे सोमयाजिनः दधिपयसोर्द्रव्ययोरैन्द्रान्माहैंद्रैक देवताकत्वात् प्रधानयागेऽपि तन्त्रेणैव उपस्तरणाभिघारणे किं पुनरंगे यागरूपे

ष्विष्टकृति । तथा सप्तदशपशुद्रव्यके प्राजापत्य देवताके वाज-
पेय यागेऽपि अनेनैव न्यायेन । स्मार्तेऽपि अष्टका श्राद्धांगपूर्वेद्युः
सप्तमीश्राद्धे ओदन कृसर पायस त्रिप्रधान द्रव्ययागे एकेनैवोप-
स्तरणेनेकेनैवाभिघारणेन प्रधानद्रव्यत्रयस्यापि चतुरवत्तता पञ्चा
वत्तता वा सम्पद्यते । एवमन्येष्वपि कर्मसु ज्ञेयम् । एवमनुष्ठान
मदृष्ट्वैवाविचार्यैव स्विष्टकृति प्रधान यागे वा चतुरवत्व पञ्चा
वत्व सम्पत्यर्थं पृथक् पृथगवदाय सहैव दर्व्यामोप्य प्रक्षिपन्ति
तदेतत् यत्किंचित् । अथान्वाधानोत्तर प्रमादात्प्रतिपदीष्ट्यकरणे
तृतीयादि तिथिषु प्रातरौपासनानन्तरं सङ्कल्पपूर्वकं संस्कृताज्यं
व्यस्त समस्त व्याहृतिभिर्हुत्वा पुनरन्वाधानयागं कुर्यात् । सूतक
दिनेष्टिरतीता चेदागामिपर्वपूर्वतिथि पर्यन्तासु अतिपन्नेष्टि
कुर्यात् । तास्वपि अतिक्रमेऽनन्तरे पर्वणि पथिकृद्यागपूर्वकमति-
पन्नयागं कृत्वा तत्पर्वणोऽन्वाधानं कुर्यात् । प्रयोगरत्ने सूतकादि
नेष्टिरतीता चेदागामिपर्वपूर्वतिथिषु द्वितीयां चतुर्थीं नवमीं
चतुर्दशीं विहायान्यासु तामतिपन्नेष्टिं कुर्यात् । तत्राप्यतिक्रमेऽ
तिपन्नयागस्य पादकृच्छ्रं प्रायश्चित्तं कृत्वा सद्यस्कालान्वाधान
पूर्वक कालप्राप्तमिष्टिं कुर्यात् । द्वितीय पर्वातिक्रमे पूर्ववदागामि
पर्वमध्ये कुर्यात् । तत्राप्यतिक्रमे तत्पर्वणि पथिकृद्यागपूर्वकमति
पन्नेष्टि कुर्यात् । तस्याप्यतिक्रमे पथिकृदिष्टिं कुर्यात् । तस्या-
प्यान्यतिक्रमे तृतीयप्रतिपदि अतिपन्नद्वयस्य प्रायश्चित्तं कृच्छ्रार्धं
चरित्वा प्राप्तकालामिष्टिं कुर्यात् । तस्याप्यतिक्रमे आगामि पर्व
पर्यंतं पूर्वोक्तवत्कुर्यात् । तत्राप्यतिक्रमे स्मार्ताग्निर्नश्यति । तेन
विधिना जयन्तोक्तं पुनराधेयं कृत्वा प्राप्ते पर्वणीष्टिं कुर्यात् ।
गृह्यकारिकायां तस्यैव पुनराधेयाभिधानात् । स्थालीपाकत्रयाति-

क्रमे स्मार्तोग्निर्नश्यतीत्यत्र मूलम् । यदि पर्वणो विच्छिद्येत तस्मिन् पथिकृतेन यजेद्यदि द्वौ वैश्वानरौ पथिकृतौ यदि बहून् पुनराधेयमिति हिरण्यकेशी स्मार्तसूत्रम् । अतीतेष्टौ कालविशेष माहाचार्यः । नातीतेष्टिश्चतुर्दश्यां चतुर्थ्यां मध्यपञ्चके । नवम्यांच द्वितीयायां कार्या ह्याहुतयस्तथा इति । (मध्यपञ्चके मध्ये पर्वमध्ये अष्टम्यां नेत्यर्थः पञ्चके पंचमदिवसे पंचम्यां नेत्यर्थः) अत्र पादकृच्छ्रार्धकृच्छ्रप्रायश्चित्ते प्रमाणं प्रजापतिः । दर्शं वा पौर्णमासं वा लुप्त्वाथोभयमेवच । एकस्मिन् कृच्छ्रपादेन द्वयोरर्धेन शोधनं इति ।। अथ स्थालीपाकस्य द्वग्रह कालत्वे अन्वाधानेष्टिमध्ये ग्रहणं चेत् तदा प्रायश्चित्त प्रकरणे वक्ष्यमाणं प्रायश्चित्तं कुर्यात् । तत्पूर्वं तदते वा ग्रहणं चेत्तदा न प्रायश्चित्तम् । अत्र किंचित्प्रासंगिकं दर्शपूर्णमासारंभात्पूर्वं येन केनापि निमित्तेन प्राप्तेऽपि प्रायश्चित्ते स्थालीपाके तत्रोक्तदेवतायाश्चतुर्थ्यंतं नाम्ना स्रुचि द्वादशगृहीतेन पूर्णाहुतिं स्रुवपूर्णाहुतिं वा जुहुयात् । न पुनः स्वरूपेण तत्तत् स्थालीपाकः प्रकृतेरनारब्धत्वात् । इदं सर्वं विध्यपराधे अपिवा प्रायश्चित्तेष्टीनां स्थाने तस्यै तस्यै देवतायै पूर्णाहुतिं जुहुयादित्येतत्सूत्रवृत्तौ स्पष्टमेव ।।

अथ श्रवणाकर्मादि सर्वविकृति स्थालीपाकानां कालः । तत्र पूर्वं इष्टिनिर्णयांते संक्षेपत उक्तेऽपि विकृतिप्रकरणे विशेषेणोच्यते । तत्र यदीष्टया पशुना यदि सोमेन यजेत सोमावास्यायां पौर्णमास्यां वेत्यापस्तंबः ।। तथाश्वलायनसूत्रे पौर्णमासेष्टि पशुसोमा उपादिष्टास्तैरेवामावास्यायां पौर्णमास्यां वा यजेतेति ।। माधवे । इष्टयादिविकृतीः सर्वाः पर्वण्येवेति

निर्णयः । एतत्सर्वं सर्वसाधरणम् । खण्डपर्वणि तु मदन पारिजाते कात्यायनः । आवर्तनात्प्राग्यदि पर्वसन्धिः कृत्वा तु तस्मिन् प्रकृतिं विकृत्याः । तदैव यागः परतो यदि स्यात्तस्मिन् विकृत्या. प्रकृतिः परेद्युः ।। इति । यदि मध्याह्नात् पूर्वं पर्वः प्रतिपदोः सन्धिस्तदा प्रकृतिं कृत्वा तदैव विकृतियागः कार्यः। अत्र मदनपारिजाते – मध्याह्नादूर्ध्वं संधौ तु तत्र सन्धिदिने प्रकृतेरन्वाधानादिकं विधाय विकृतियागं च तत्रैव कृत्वा परेद्युः प्रतिपदि प्रकृति याग इत्युक्तम् ।। तदसमञ्जस वस्तुतस्त्वेवमपेक्षितम् । तत्कथं यदातु मध्याह्नात्परतः पर्वप्रतिपदोः सधिस्तदा तस्मिन् दिने विकृतिं कृत्वा परेद्युः प्रकृतेर्यागः। सिधुकारोऽप्येवमुक्त्वा धूर्त स्वाम्यादयोऽप्येवम हुः । य इष्ट्येति सांगाया विकृतेः पर्वकालत्वादावर्तनात्प्राक् सन्धौ प्रकृतेः प्रतिपदि समाप्तिनियमात् । प्रकृत्यनन्तरं प्रतिपदि विकृति योगात् पूर्वेद्युर्विकृतिरित्युक्तम् । तन्त्ररत्ने पार्थसारथिना यद्यपि प्रकृतेः पूर्वोक्तत्वात् अपूर्वमन्ते स्यादिन्यायस्तत्रैनोक्तं । तथापि हेतुवादेन श्रुति मूलत्वाभावादंगं वा समभिव्याहारादिति चेद् प्रामाण्यमिति तदाशय इत्युक्तत्वात् ।। स्मृत्यर्थसारे तु । अनारब्ध प्रकृतीष्टे विकृतीष्टयः स्युः सद्यस्कालआवर्तनात्पूर्वसन्धौ प्रकृतिं समाप्य विकृतिः कार्या । ऊर्ध्वं तु सन्धौ विकृतिं समाप्य प्रकृतेः प्रारंभः । सर्वैर्निबन्धकारैर्विकृतीष्वेवमेव निर्णय उक्तः । तत्रापि दीपिकाकारेण दर्शेष्ट्यां परमुक्तमाग्रयणकं प्राक् पौर्णमासाच्च तदित्याग्रयणे विशेष उक्तः । स एव निर्णयसिंधुनाऽनुक्तः । परं तु सर्वत्र सूत्रादिग्रंथविरुद्धः । कथं विरोध इति चेत्तत्रामावास्यायां पौर्णमास्यामिति विकृति विधायकं सूत्रादिकं

तथा व्रीहीणां यवानां श्यामाकानामित्याग्रयण स्थालीपाकेन यजेतामावास्यायां पौर्णमास्या मित्यापस्तंबश्रौताग्रयणम् सूत्रम् । एवं सूत्रान्तराण्यपि तथा शरद्याग्रयणम् । नाम पर्वणि स्यात् तदुच्यते इति गृह्यकारिकादि स्मार्तग्रन्थाः पर्ववाचकास्ते सर्वे अखण्ड दर्शपक्षे मध्याह्नात्परतः सन्धिपक्षे च कथं व्याख्येया इति सद्भिर्विचारणीयमेतत् । इदानीं व्रीहिभिरिष्ट्वा व्रीहिभिर्यजेतयवेभ्यइत्याद्युक्तेरेवं वा दीपिकोक्तिर्व्याख्येया अण्डविलाद्युक्तप्रकारांतरेण दर्श पौर्णमासात्मकं कर्मात्र पौर्णमासारम्भे विद्युदसि दर्शते वृष्टिरसि एवं चेदग्नीनामजस्रता आगता अपवृत्ते कर्मणि लौकिक संपद्यत इति सूत्रात् तच्चापि दर्शेष्टेः परमुक्तमाग्रयणकमित्यप्यमावास्या पर्ववैयर्थ्यं दुर्निवार्यमिति दीपिकोक्तिर्शिचत्येति ममतु प्रतिभाति ।

इदानीं सप्तपाकसंस्थानामानि । स्मृतिचन्द्रिकायां हारीतः । पाकयज्ञान्नयेन्नित्यं हविर्यज्ञाश्च नित्यशः ।। सौम्याश्च विधिपूर्वेण यइच्छेद्धर्ममव्ययम् ।। इति च गोतमेन प्रदर्शिताः । अष्टका पार्वणं श्राद्धं श्रावण्याग्रहायणी । चैत्र्याश्वयुजीति सप्तपाकयज्ञसंस्थाः ।। पर्वणि क्रियमाणं स्थालीपाकलक्षणं पार्वणं श्राद्धं मासिकश्राद्धं । श्रावणी सर्पबलिः । आग्रहायणी आग्रयणम् । चैत्री होलिकाख्यं कर्म । आश्वयुजी इन्द्रध्वजहोमाख्यं कर्म । केचिदौपासनहोमो वैश्वदेवं च पार्वणम् । अष्टका मासिक श्राद्धं सर्पबलिरीशानबलिरिति सप्तपाकयज्ञानाहुः । अत्र प्रयोगरत्नकृताष्ट चत्वारिंशत्संस्कार गणनास्थले श्राद्धममावास्यादि श्रावणी श्रवणा कर्म आग्रयणी प्रत्यवरोहणं चैत्री शूलगवः । आश्वयुजी आश्वयुजीकर्म इति हरदत्तो व्याचख्यौ

इत्येवमुक्तं युक्तं त्विदमेवेति । श्रौतकर्मणि दर्शपूर्णमासयो राग्रयणादीनां च प्रथमारंभे स्मार्तेऽपि प्रथमोपाकरणादौ तथा दृष्टत्वात् । तत्र तावत् श्रवणाकर्म सर्पबलिश्चोच्यते । श्रावण्यां पौर्णमास्यां पूर्वाह्णे प्रथमारंभे उभयोस्तंत्रेण मातृकापूजनपूर्वकं नांदीश्राद्धं कुर्यान्न द्वितीयादि प्रयोगे । श्रौतकर्मणि दर्शपूर्णमासयोराग्रयणादीनां च प्रथमारभे स्मार्तेऽपि प्रथमोपाकरणादौ तथा दृष्टत्वात् । श्रवणाकर्म सर्प बली करिष्यमाण उभयोस्तंत्रेण नांदीश्राद्धं करिष्य इति संकल्प्य नांदीश्राद्धं कुर्यात् । ततो दिवैव प्रस्थमितयवानामेव सूत्रवृत्तिकृदुक्तेरलाभे तत्सादृश्याद्गोधूमानां व्रीहीणां वा लौकिकाग्नौ भर्जनेन धानाः कृत्वा तत्पिष्टरूपैः सक्तुभिः नवं कलशं पूरयित्वा बलि निक्षेपण साधनभूतां वैकंकतीं दर्वीमपि संपाद्य तद्द्वयं गृहकाष्ठादिलंबिते नवे शिक्ये निधाय तदेव स्वगृहे बल्यर्थं प्राच्यां शुचिदेशं परिगृह्णीयादिह करिष्यामीति मनसोच्चारयन् व्रीहींश्चरुपात्रं पुरोडाशकपालं उक्त लक्षण शम्यां दृषदुपलं दर्भमुष्टिमयं वेदं पिष्ट भर्जनार्थं पिष्टोद्वपन्याख्यपात्रं मेक्षणं जलतापनार्थं मदंत्याख्यं पात्रं पुरोडाशार्थं शरावसदृशमाशयाख्यं पात्रं प्रादेश मात्रं यज्ञियकाष्ठं उपवेषाख्यं च पाकृतपात्रेभ्य एतावदधिकं संपाद्य धानाः समर्धीकृत्य अर्धा लौकिकाज्येनाक्ताः कृत्वैकपात्रे निधाय अपरा अनक्तार्धा धानाः पात्रांतरे निदध्यात् । ततोऽस्तमिते सूर्ये सायं होमोत्तरं शुचिः सपवित्रः प्राणानायम्य देशकालौ स्मृत्वा मम समस्तपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं नित्यविधिरूपं श्रवणाकर्म करिष्ये । इति संकल्प्याग्निं ध्यात्वा

समिद्द्वयं त्रयं वादायश्रवणाकर्महोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये इत्यादिचक्षुष्यंते अग्निं चतुर्वारं चरुद्रव्येण अच्युतभौमाग्निं पुरोडाशद्रव्येण अग्निमाशयाज्येन वाजिनो धानाद्रव्येण शषेग स्विष्टकृतमित्यादि परिसमूहन परिस्तरण पर्युक्षणांते उत्तरत आस्तीर्णेषु दर्भेषु प्राकृतान्न पात्राण्यासाद्य शूर्प कृष्णाजिनाद्यन्यदर्थं प्राप्तं च सादयेदिति कारिकोक्तेः एतान्यर्थप्राप्तानि चासादयेत् । तत्रायं क्रमः । चरुस्थाली प्रोक्षण्यौ दर्वीस्त्रुवौ प्रणीताज्यपात्रे इध्माबर्हिषी एककपाल शूर्पे कृष्णाजिनशम्ये उलूखलमुसले दृषदुपले वेदपिष्टोद्धरण्यौ मेक्षणमदंत्यौ आशयोपवेषौ एवं द्वंद्वान्यासाद्य पवित्रे कृत्वोत्ताने सपवित्रे प्रोक्षणपात्रेऽपो निनयेदित्यादि पूर्णपात्र-निधानांते सपवित्रे शूर्पे चरुपुरोडाशयोरग्निध्यानादि चतुर्णां चर्वर्थं पंचमस्याच्युतभौमाग्नि ध्यायन् पुरोडाशार्थं च वृत्ति करिकोक्तेः प्रतिदैवतं तूष्णीं चतुरश्चतुरो मुष्टीन् निरूप्य तत्संख्यया तूष्णींप्रोक्ष्यावघातादि कृत्वा प्रक्षाल्य चरुपुरोडाश तण्डुलान्यथाभागं द्विधाकृत्वाग्नेरुत्तरतः प्रत्यग्ग्रीवमूर्ध्वलोम कृष्णाजिनमास्तीर्य तस्मिन्नुदीच्यग्रां शम्यां निधाय तस्यां प्रागग्रां दृषदुपलां तिरश्चीमादाय तत्र पुरोडाशतण्डुलानोप्यो पलेन तान् स्वयं किंचित् पिष्टीकृत्य कृष्णाजिने प्रस्कंद्य पत्न्यान्येन वा पेषयित्वा ततश्चर्वर्थमग्नौ दक्षिणभागे सोदक स्थालीं निधाय आयतने एवाग्नेः प्रत्यग्देशे उपवेषेण द्वावंगारौ पृथक् कृत्य तयोरेकं वायव्ये निरस्याप उपस्पृश्य अवशि-ष्टमंगारमग्नेः पश्चात् परिस्तरणं मध्ये कपालार्थस्थानेऽवस्थाप्य तस्मिन्नंगारे कपालं निधाय कपालेऽन्यमंगारं निक्षिप्य मंदत्या-

ख्ये पात्रे पिष्टसेकार्थं अग्नावपः प्रताप्य पिष्टोद्वपनीं प्रक्षाल्याग्नौ शोषयित्वा स्वाग्रे भूमौ निधाय तस्यां पवित्रवत्यां पुरोडाशार्थं पिष्टं निक्षिप्य वाचयम आज्यवत्तूष्णीं पवित्राभ्यां पिष्टं त्रिरुत्पूय तत्राग्नावग्नौ निधाय पिष्टमर्जनं कृत्वा पिष्टेषु भर्जितेषु स्रुवेण पूर्णपात्रोदकं पूर्वप्रतप्तोदकं च पिष्टेषु प्रक्षिप्य पिष्टपात्रं भूमावानीय तस्मिन्यावदर्थं प्रतप्तोदकं दत्वा मेक्षणेन संमिश्र्य पिण्डं कृत्वा पूर्वमुपरि निहितं कपालाद्वेदेनांगारानपोह्य चरुस्थाल्यां तण्डुलानोप्य पिष्टपिण्डस्याश्वशफमात्रं कूर्माकृतिं पुरोडाशं कृत्वा कपाले निधाय तमद्भिः श्लक्ष्णीकृत्याज्यं संस्कृत्याज्येन सह चरुं पुरोडाशावत्ता धानाश्च त्रिः पर्यग्नि कृत्वा पुरोडाशमुल्मुकैः प्रताप्य दर्भैरभिज्वाल्य तदुपरि सांगारं भस्म निक्षिप्य तत्रैव विसृष्टवाक् सुशृतं चरुं श्रपयित्वा हस्तं प्रक्षाल्य पिष्टपात्रं प्रक्षालयेत् । तत आज्यमुत्पूयोद्वास्य पूर्वं बर्हिरास्तरणादि दर्वीसंमार्गांते पुरोडाशस्थं भस्मादि वेदेनापोह्यं । चरुपुरोडाशावभिघार्यं उदगुद्वास्य बर्हिष्यासाद्य तदुत्तरत आशयपात्रे पुरोडाशं तस्मिन् लौकिकाज्यं प्रभूतं निनयेत् प्रकटं पृष्ठं वा कुर्यात् । तदुत्तरतोऽक्ता धानास्तदुत्तरतोऽनक्ताश्चासाद्य इध्माधानाद्याज्यभागांते अनुद्धृतान्चरोरवदानधर्मेणावदाय वृत्तिकारिकोक्तेः ऋगंते स्वाहाकारं पठन् आहुति चतुष्टयं जुहुयात् । नात्र स्वाहाकारान्ते होमः। अग्ने नयेति चतुर्णां मैत्रावरुणिरगस्त्योऽग्निस्त्रिष्टुप् । श्रवणाकर्मप्रधान चरुहोमे विनियोगः । ॐ अग्नेनय – विधेम स्वाहा। अग्नय इदं । ॐ अग्नेत्वं पारया –– शंयोः स्वाहा । अग्नय इदं । ॐ अग्नेत्वंनस्म – यजत्र स्वाहा । अग्नय इदं ।

Accession No. 16906
10.6.93
GURUKUL KANGRI ... POOR

ॐ पाहि नो अग्ने – सहस्व स्वाहा । अग्नये इदं । ततः सव्यपाणिना दक्षिणपाणिं प्रोक्ष्योपस्तीर्य तस्मिन् कृत्स्नं पुरोडाशमादाय द्विरभिघार्य पञ्चावत्ती चेत्त्रिः अच्युताय भौमाय स्वाहेति अपर्यावर्तयन् पुरोडाशं हस्तेन हुत्वा अच्युताय भौमायाग्नय इदं । ततो यस्मिन्नाज्ये पुरोडाशः स्थापितस्तदाशयाज्यपात्रं वामेन धृत्वा दक्षिणहस्तस्थित स्रुवेण शनैः शनैः पुरोडाशोपरि सर्वं जुहुयादित्येवं याज्ञिक सम्प्रदायः । मानो अग्न इत्यस्य मैत्रावरुणोऽगस्त्योग्निस्त्रिष्टुप् । आशयाज्यहोमे विनियोगः । ॐ मानो अग्नेऽवसृजो अघायाविष्यवे – दाः स्वाहा । अग्नय इदं । ततः स्वांजलावन्येनोपस्तृते प्रागक्ताद्धानाद् द्विस्त्रिर्वा वापयित्वाभिघार्य । शंनो भवंत्वित्यस्य मैत्रावरुणिर्वसिष्ठो वाजिनस्त्रिष्टुप् । श्रवणाकर्मप्रधान धाना होमे विनियोगः । ॐ श नो भवन्तु – नमीवाः स्वाहा । वाजिभ्य इदं । ततो अनक्ता धाना पुत्राद्यमात्येभ्यो दत्वा चरुधानोत्तरार्धतः स्विष्टकृतं हुत्वा होमशेषं समापयेदिति आपस्तम्बीय पुरोडाश धर्मानुसारेण श्रवणाकर्म प्रयोगः ॥

इदानीं श्रवणाकर्मणि सूत्रप्रभृतिभिः पुरोडाशउक्तस्तद्धर्मास्तु नोक्ता स्तत्र स्थालीपाकसूत्रे ॥ अथ पार्वणस्थालीपाकस्तस्य दर्शपूर्णमासाभ्यामुपवास इत्युक्तं । उपवासोऽन्वाधानं । तच्चपूर्णमास मूलमाध्वर्यवं बहुविधं तत्र किं नियामकं ग्राह्यमित्याशंकायां इष्टापूर्तादिकं कर्म स्वशाखोक्तं न विद्यते । तत्र बौधायनं ग्राह्यं बह्वृचादिभिरादरात् ॥ इत्युक्तत्वात् । स्थालीपाके स्रुक् स्रुवयोरासादन सम्मार्गादि लक्षणस्य बौधायनानुसारेण कारिकादौ दृष्टत्वाच्च सर्वैरनुष्ठान कर्तृभि

रेवमेव पुरोडाशश्रपणादि धर्माः कार्याः । अथवा येषां बौधायनसूत्रेणैवाग्न्याधानादि श्रौतानुष्ठानं तैस्तद्गृह्यैश्च परिगृहीतपक्षस्य त्यागायोगादेतस्य दर्शपूर्णमासाभ्यामुपवास इत्येतेनैकवाक्यत्वात् बौधायनानुसारेणैव सर्वं कर्तव्यमिति समतु प्रतिभाति। युक्तमयुक्तमेतत् सद्भिर्विचारणीयमिति दिक्।।

तत्रापस्तंबसूत्रानुसारेणाधानादि श्रौतानुष्ठानवतां श्रवणाकर्मोक्तम् । इदानीं बौधायनानु सारेणानुष्ठानवता मन्येषां च श्रवणाकर्म प्रयोग उच्यते ।। तत्र कर्मसङ्कल्पादि दृषदुपलासादनांतं पूर्ववत्कृत्वा मेक्षणपिष्टोद्वपन्यौ वेदमदन्त्यौ आशयोपवेषौ एवं क्रमेणासाद्य पवित्रे कृत्येत्यादि तयोरे कमंगारं वायव्ये निरस्याप उपस्पृश्येत्यन्तं पूर्ववत्कृत्वावशिष्ट-मंगारमग्नेः पश्चात्परिस्तरणाद्बहिः कपालस्थानेऽवस्थापयेत्तेषां तथैवानुष्ठान दर्शनात्तस्मिन्नगारे कपालं तस्मिन्नन्यमंगारं निक्षिप्यायतने पिष्टार्थमपः प्रताप्य पिष्टोद्वपनीमग्नौ निधाय तप्तायां तत्रैव सव्येनोदगग्रं पवित्रं धारयन् दक्षिणेन कृष्णा-जिनात् पिष्टानि सम्वपति । श्रृते पिष्टे स्रुवेण पूर्णपात्रो दकं तप्तोदकं च प्रक्षिप्य पिष्टपात्रं भूमावानीय यावदर्थं तप्तोदकं दत्वा मेक्षणेन सम्मिश्रच्य पिंडं कृत्वा पिंडस्याश्व-शफमात्रं कूर्माकृतिं पुरोडाशं कृत्वा चरुस्थाल्यां तिरः पवित्रं धृत्वा तण्डुलानोप्य पूर्वमुपहित कपालाद्वेदेनांगारानायतनस्थे ऽग्नौ प्रत्यूह्य पुरोडाशं कपाले निधाय तमद्भिः श्लक्ष्णी कृत्याज्यं सम्स्कृत्याज्येन सह चरुपुरोडाशावक्ता धानाश्च त्रिः पर्यग्निकृत्येत्यादि होमसमाप्त्यन्तं पूर्ववत् तत्राशयाज्यहोमे किंचिदाशयाज्यं स्विष्टकृदर्थं संस्थाप्य ततोऽपि स्विष्टकृतं

गृहीत्वेति विशेषः । चरुधर्मास्तु स्वसूत्रोक्ता एव ग्राह्या नात्र सूत्रांतरोक्ताः स्वसूत्रे स्पष्टत्वेनोक्तेरिति दिक् । इत्थं मल्लिखितं तद्युक्तं चेत् स्वीकार्यं ।। इति श्रवणाकर्म ।।

अथ सर्पबलिः

आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य मम भार्या पुत्राप्रत्त दुहितृ समेतस्य भौमान्तरिक्षस्य दिव्यादस्य सर्पेभ्यः सम्भावित बाधा परिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं नित्यविधिरूपं सर्पबल्याख्यं कर्म करिष्ये । इति सङ्कल्प्य पूर्वं शिक्य स्थापितां दर्वीमादाय शिक्यस्थापित कलशाहित सक्तुभिस्तामापूय गृहान्निर्गत्य प्राच्यां दिशि पूर्वपरिगृहीतं देशमासाद्य प्रोक्ष्य । ॐ सर्पदेवजनेभ्यः स्वाहेति मन्त्रेण दर्वीस्थसक्तून् तत्र प्राङ्मुखो निक्षिप्य सर्पदेवजनेभ्य इदं नममेति त्यजेत् । बलेर्बलिदातुश्चांतरा केनापि व्यवधानं न कार्यमापरिदानात् । ततः कृतांजलिः - ये सर्पाः पार्थिवा य आंतरिक्ष्या ये दिव्या ये दिश्यास्तेभ्य इमं बलिमाहार्षं तेभ्य इमं बलिमुपाकरोमीति मन्त्रेण सर्पानुद्दिश्य सम्हताभ्यां पाणिभ्यां नमस्कृत्य बलिं प्रदक्षिणीकृत्य पश्चाद्बलेरुपविश्य । ॐ सर्पोऽसि सर्पतां सर्पाणामधिपतिरस्यान्नेन मनुष्यां स्त्रायसेऽपूपेन सर्पान् यज्ञेन देवां स्त्वयि मासं तन्त्वयि सन्तः सर्पा मांहिंसिषु ध्रुवां ते परिददामीति मन्त्र मुपांशु सकृज्जपन् । सर्पोसीत्यादिकं मन्त्रं ददाम्यन्तं सकृद्वदेदिति कारिकोक्तेः । ततो ज्येष्ठानुक्रमतः पुत्रानप्रत्त दुहितृ पत्नीमात्मानं यथाक्रमं द्वितीयांतं नाम गृहीत्वा परिदद्यादेवं प्रतिनाम ध्रुवादिनाम सहित मन्त्रशेषस्यावृत्तिः । अत्रैवं प्रयोगः । ध्रुव कृष्णं ते परिददामीति

पुत्रम् । ध्रुवकृष्णां ते परिददामीत्यप्रत्तदुहितरम् । ध्रुव लक्ष्मीं ते परिददामीति भार्याम् । ध्रुव मां ते परिददामीत्यात्मानम् । अन्यः कर्ताचेन्मापदस्थाने द्वितीयांतं यजमाननामोक्त्वा परिददामीति वदेत् । एतावत्पर्यंतं परिदानं एतन्मध्ये नत्ववायः । ततः प्रतिपदमारभ्य प्रत्यवरोहणदिनपर्यंतं सायंप्रातः कालेषु तथैव दर्व्या तैरेव सक्तुभिः शुचिदेशे बलिं हरेत् ॥ अत्र ये सर्पा इति मन्त्र नमस्कारादि परिदानांत न कार्यम् ॥ नेह नमस्कारादिरिष्यत इति कारिकोक्तेः । अथवा प्रतिपदमारभ्य यस्मिन्नहनि प्रत्यवरोहणं मार्गशीर्ष शुक्ल चतुर्दश्यां पौर्णमास्यां वा क्रियते तस्मादर्वाचीनदिनानि ह्रासवृद्धिभ्यां परिगणय्य तेषु यावन्तः सायंप्रातः कालास्तावन्तो बलींस्तदहरेव दद्यात् । तथा च प्रथम बलिदानांते नमस्कारादि परिदानांतं सकृदेव, न प्रत्येकम् । अत्र तदहरेवाखिल बलिदानं मुख्यः पक्षः । प्रसंख्याय हैके इत्येतत्सूत्रस्थ हकारोक्तेः । श्रवणाकर्म सर्पबली प्रतिवर्षं कार्यं । सर्वेचाग्रयणाश्चैव संस्कारा वार्षिका मताः । इति व्यवस्थोक्तेः । श्रवणाकर्म सर्पबलिश्चैतद्द्वयं भुक्त्वापि केचित्कुर्वंति । तस्मात्प्रायः आहिताग्निपरं । अनाहिताग्नेस्त्व भुक्त्वैव युक्तम् । इति सर्पबलिः ॥ पर्वद्वैधे विकृतित्वात् खण्ड पर्वणि कार्यम् ॥

आश्वयुजि पौर्णमास्यामाश्वयुजीकर्मकार्यम् ॥
पूर्वेद्युः कर्ता दिवैव गृहकुड्यलेपन तदाच्छादन निम्नोन्नतभूमि समीकरण प्ररूढापामार्गाद्युन्मूलनरूपं निवेशनालङ्कारं विधाय सर्वे गृह्या विशेषेण स्नाताः शुक्लाम्बरधरास्तथा । इति कारि-

कोक्नेः । परेद्युः स्त्रीपुत्रादि समेतोऽभ्यंगादि विशेष स्नानं विधाय शुचिः शुक्लवासाः प्रातरौपासनं हुत्वा प्रथमप्रयोगे नांदीश्राद्धं विधाय प्राणानायम्य देशकालौ संकीर्त्य मम स्त्रीपुत्रादि सहितस्य न्यूनापेक्षितविषयसंपूर्णता नवधान्या सादन सिद्धि द्वारा श्रीपरमेश्वर प्रीत्यर्थं नित्यविधिरूप माश्वयुजीकर्म करिष्ये । इति संकल्प्य । अग्निं ध्यात्वा अस्मिन्नाश्वयुजीकर्मणि देवतापरिग्रहार्थमन्वाधानमित्यादि चक्षुष्यन्ते पशुपतिं चरुद्रव्येण पृषातकं पृषातक द्रव्येण शेषेण स्विष्टकृतमित्यादि पूर्णपात्रनिधानांतेऽग्नेः प्रत्यक् सपवित्रे शूर्पे पशुपतये त्वा जुष्टं निर्वपामीति चतुरश्चतुरो मुष्टींश्चर्वर्थं एतत्कर्मणः पूर्वमकृताग्रयणश्चेत् जीर्णव्रीहीन् जीर्णतण्डुलान्वा निरूप्य तथैव प्रोक्ष्य अवघातादि चरुश्रपणांतं कृत्वा पयस्या-ज्ये निषिक्ते तु तत्पयः स्यात्पृषातकमित्याज्यमिश्रं पयः पृषात-काख्यं हविरन्यत् कृत्वाज्यं सम्स्कृत्य पृषातकचरुभ्यां सह त्रिः पर्यग्निकृत्वाज्योत्पवनाज्य भागांते पुत्रादिभिरन्वारब्धः स्वसन्नि-धौवा तानुपवेश्य अवदानधर्मेण चरुमवदाय ॐ पशुपतये शिवाय शङ्कराय पृषातकाय स्वाहा इति हुत्वा । पशुपतये० पृषातकायेदं नममेति त्यजेत् । ततो यजमानांजलावन्यउप-स्तीर्य स्रुवेणैव पृषातकमंजलौ द्विरवदायाभिघार्य यजमानो जुहुयात् । ॐ नं मे पूर्यतां पूर्णमे मोपसदत्पृषातकाय स्वाहेत्यं जलिनैव हुत्वा । पृषातकायेदं । चरुपुरुषातकशेषात् स्विष्ट-कृतं हुत्वा । इध्मसन्नहनादि कर्मशेषं समापयेदित्याश्वयुजी-कर्म । पशुपतयेत्वाजुष्टमित्येतस्यादिष्टमंत्रत्वेऽपि वृत्तिकृदुक्तः समन्त्रनिर्वाप एतद्व्यतिरिक्तेष्टत्वामन्त्रहोमेषु निर्वाप प्रोक्षणे

तूष्णीं स्पष्टत्वेनोक्तं चैतत्परिभाषायाम् ॥

अथाग्रयण विचारः ॥

तत्र बौधायन प्रायश्चित्त प्रदीपे -- शरद्याश्वयुजकार्तिकयोः पौर्णमास्याममावास्यां वा शुक्लपक्षयुक्तरेवत्यां वा व्रीह्याग्रयणं कुर्यात्। व्रीह्याग्रयणस्यवसन्तर्तुपर्यंत गौणकालः अनापदि गौणकाले कुर्वन् प्रायश्चित्तपूर्वक आग्रयणं कुर्यात । आपत्तौतु गौणकाले कुर्वन् प्रायश्चित्तं न कुर्यात् । गौणकालेऽप्यतिक्रांते वैश्वानरेष्टि प्रायश्चित्तं कृत्वात्तिपन्नाग्रयणं कुर्यात् । स्मार्ते तु यएवाहिताग्नेः पुरोडाशास्ते एवौपासनीकस्य चरव इत्युक्तेः वैश्वानर देवताक स्थालीपाको ग्राह्यः। अग्नये वैश्वानराय त्वाजुष्टं निर्वपामीत्येवं रूपः । प्रथमाग्रयणस्य शरदत्ययेपि विभ्रष्टेष्टि कृत्वाऽग्रयणेन यजेतेति प्रायश्चित्तप्रदीपे उक्तत्वात् स्मार्तेपि प्रथमाग्रयणस्य शरदत्ययेपि विभ्रष्टेष्टि देवताक स्थालीपाकं कृत्वा आगामिमुख्यकाले आग्रयणं कुर्यात्। अनारब्धानां दर्शपौर्णमासाग्रयण पशूनां प्रायश्चित्तं वैकल्पिकमिति द्वैधसूत्रे दर्शितमिति दीपे वरदराजे चोक्तत्वात् । विभ्रष्टेष्टिरपि विकल्पः। आग्रयणमकृत्वा किमपि नवान्नं न प्राश्नीयात् । कालांतरेऽप्युप्तं न व्रीह्यादीनां तण्डुलादिभिरग्निहोत्रादीनि कृत्वा ब्राह्मणेभ्यो दत्वोपभुंजीत । स्वक्षेत्रोत्पन्न व्रीह्यादीनामभावेऽपि क्रीत्वाग्रयणं कुर्यात् । यथाकथंचिदाग्रयणमकृत्वा मोहतो नवान्नप्राशनं कृत्वार्तिमाप्नुयात् । सचेदकृत्वाग्रयणं नवमश्नाति मोहतः । देवेभ्यः कल्पितं भागं भक्षयित्वार्तिमाप्नुयात् । इति । एतत्सर्वं बौधायनीय प्रायश्चित्तप्रदीपानुसारेणोक्तम् । एतावत्सर्वं बौधायन प्रायश्चित्त सूत्रे एव

स्पष्टमस्ति । आश्वलायनसूत्रं तु सस्यं नाश्नीयादित्यत्र सस्य ग्रहणं व्रीह्यादिभ्योऽन्यदपि यन्नवं निष्पन्नं तस्य सर्वस्य प्रति षेधार्थमिति वृत्तिः । स्मृत्यर्थसारेतु - आग्रयणं पर्वालाभे शुक्ल पक्षे देवनक्षत्रे कार्यम् । कृत्तिकादि विशाखांत इति । एतच्च मलमासे गुरुशुक्रयोरस्ते च न कार्यम् । पुरातनधान्यालाभेतु मलमासेऽपि कार्यमेव । अनापदि शुद्ध एवेति सर्वसम्मतम् ।।

अथाग्रयणप्रयोगः ।।

तत्र तावत्स्मार्तसूत्रे कारिकादौ च आहिताग्नेराग्रयणस्था -लीपाक इति यदुक्तं तद्वृत्तिकारिकादिभिर्ऋत्विगाद्यसंभवे द्रव्याद्यसंभवे वा ज्ञेयमिति व्याख्यातम् । तत्तु अग्निहोत्रीवै नानादयित्वा तस्याः पयसा जुहुयात् इति श्रौत सूत्रे एव गत्यन्तरोक्तेः । आधानोत्तरं संवत्सरांते पवमानेष्टीनामनुष्ठा -नापेक्षया व्याख्येयमिति मम प्रतिभाति । तत्राग्निहोत्री वैं नाना इत्येतत्पक्षो वक्तुमशक्यः । पवमानेष्टिभ्यः पूर्वमग्निहोत्र स्यानारब्धत्वात् । श्रौतसूत्रे देवता याज्यापुरोनुवाक्यानामेव विधानात् पुरोडाशधर्माम्नानात् स्मार्ते पाकयज्ञ धर्माम्नानात् सजू-रित्यादि मन्त्र लाभादाग्रयणप्रकरणलाभाच्चोक्तं तदिति प्रति-भाति । तत्वं तु सद्भिर्वा विचारणीयम् । अथ सूत्रपाठक्रमेणा हिताग्नेः स्थालीपाकानुष्ठान प्रकार उच्यते ।। स यथा जयंते द्वितीयाध्याये - अथ आहिताग्निराग्रयण स्थालीपाकं कुर्वन् गार्हपत्येऽन्वाधानादि चरुश्रपणांतं कृत्वा नित्येऽप्याहवनीयेऽन्वा धानादि करोति । ततो गार्हपत्यसकाशात् पूर्वमुत्पवनादीध्मा-बर्हिषी आहवनीय समीपे आनयति ततो बर्हिरास्तीर्य हवि-रासादनात्पूर्वं परिधीन् परिदधाति । पूर्वमेव संस्कृताज्येन

स्रुवेण चरुमभिघार्योदगुद्रास्य पुनरप्याज्यं हविश्च गृहीत्वा वेद्यां बर्हिष्यासादयति । ततोऽग्निमलंकृत्येध्माधानाद्याज्यभागान्ते अवदान धर्मेण सजूरित्यादिभिस्त्रिभिर्मन्त्रैस्तिस्र आहुतीर्हुत्वा स्विष्टकृतं हुत्वा चरोरेकदेशं पात्रे गृहीत्वा तत्पात्रं सव्ये पाणौ कृत्वेत्यादि सर्वं वक्ष्यमाणानाहिताग्नि स्थालीपाकवत् समापयेदिति आहिताग्नेराग्रयण स्थालीपाकः । अत्र यः सर्वाधान्यर्धाधानी वाहिताग्निस्तस्य श्रौताग्रयणेनैव सिद्धिः न पुनर्गृह्यकर्मत्वेन स्मार्ताग्रयणानुष्ठानं श्रौताग्रयणेनैव नवान्नप्राशनाधिकारसिद्धेः। आहिताग्नेः शालाग्नौ लौकिकाग्नौ पार्थक्येनानुष्ठानविधानाभावात् । अनाहिताग्नेरौपासनाग्निमतः शालाग्नौ विधानाच्चेति प्रासंगिकमेतत् ।।

अथाहिताग्नेराग्रयणस्थालीपाकप्रयोगः ।।

तत्र शरदि पर्वण्यमावास्यायां पौर्णमास्यां वा तदलाभे शुक्ल पक्षगत कृत्तिकादि विशाखान्तेषु देवनक्षत्रेषु रेवत्यां वा प्रातरौपासनं हुत्वा प्रथम प्रयोगे नान्दीश्राद्धं विधाय प्राणानायम्य देशकालौ सङ्कीर्त्य मम जरारोगनिवृत्ति श्रीर्यशोऽन्न प्राप्ति सिद्धि द्वारा श्री परमेश्वर प्रीत्यर्थं नित्यविधिरूपं व्रीह्याग्रयणं करिष्ये इति सङ्कल्प्य अस्मिन्नाग्रयण कर्मणि देवतापरिग्रहार्थमन्वाधानादि चक्षुष्यन्ते इन्द्राग्नी विश्वान्देवान् द्यावापृथिव्यौ चरुद्रव्येण शेषेण स्विष्टकृतमित्यादि पूर्णपात्र निधानान्तं कृत्वा सपवित्रे शूर्पे प्रति दैवतं तां तां देवतां ध्यायन् तूष्णीं चतुरश्चतुरो मुष्टीन् नवीनान् व्रीहीन् नवीनांस्तण्डुलान्वा निरूप्य तथैव प्रोक्ष्यावघातादि चरु श्रपणान्तं कृत्वाऽज्यं संस्कृत्याघाराज्य भागान्तं कृत्वावदानधर्मेणाभ्युद्धृताच्चरोरवदाय तिस्र आहुतीर्जुहुयात् । ॐ सजूर्ऋतुभिः

सर्जूर्विश्राभिः सजूरिन्द्राग्निभ्यां स्वाहा। इन्द्राग्निभ्यामिदं ॥ ॐ सजूर्ऋतुभिः सर्जूविधाभिः सर्जूविश्वेभ्यो देवेभ्यः स्वाहा। विश्वेभ्यो देवेभ्य इदं। ॐ सजूर्ऋतुभिः सर्जूविधाभिः सजूर्द्यावापृथिवीभ्यां स्वाहा। द्यावापृथिवीभ्यामिदं। स्विष्टकृतं हुत्वाऽवशिष्ट चरोरेकदेशं पात्रान्तरे गृहीत्वा तत्पात्रं सव्ये पाणौ धृत्वा ॐ प्रजापतये त्वा गृह गृह्णामि मह्यं श्रियै मह्यं यशसे मह्यमन्नाद्याय इति मन्त्रेण दक्षिणेन पाणिनाभिमृश्य ॐ भद्रान्नः श्रेयः समनैष्ट देवास्त्वया वसेन समशीमहित्वा। सनो मयो भूः पितवाविशेह शन्ना भव द्विपदे शं चतुष्पदे। इति मन्त्रेण प्राश्य द्विराचम्य तत्रैवोपविष्टः। ॐ अमो सि प्राण तदृतं ब्रवीम्यमासि सर्वानसि प्रविष्टः। स मे जरां रोगमपनुद्य शरीरादमाम एधि मामृथाम इन्द्र। इति मन्त्रेणात्मनो नाभिमालभेत। जयन्त भाष्ये - मध्यमहविर्वैश्वदेवं वैश्वदेवं मध्यममिति जयन्तः। पत्नीतु मध्यमहविः शेषममन्त्रकं प्राश्नीयात्। इति वृत्तिकारोक्तेः। ततो यजमान इध्मसन्नहन होमादिकर्मशेषं समापयेत्। अनाहिताग्नेः स्थालीपाक एव कार्यो नाग्निहोत्री वै नानादयित्वेत्ययं पक्षः कार्य इति वृत्तिः॥ इत्याग्रयणं॥

इदमाग्रयणं आश्वयुज्यां पौर्णमास्यां क्रियते तदैककालत्वात् आश्वयुजीकर्मणा समानतन्त्रता भवति। एकबर्हिरिध्माज्यस्विष्टकृतः स्युस्तुल्यकाला इति सूत्रोक्तम्। अनेके पाकयज्ञाः स्युरिति कारिकोक्तेश्च। तत्रैवं प्रयोगः। आश्वयुजीकर्माग्रयणं च करिष्यमाणस्तदंगमादौ नान्दीश्राद्धं तन्त्रेण करिष्ये इति सङ्कल्प्य नान्दीश्राद्धं कृत्वा प्रागुक्तकर्मद्वयं सङ्कल्प्योल्लेखपूर्वकं आश्वयुजीकर्म व्रीह्याग्रयणं च तन्त्रेण करिष्ये इति सङ्कल्प्य

अन्वाधाने चक्षुष्यनन्तरं पशुपतिं चरुणा पृषातकं पृषातकेन इन्द्राग्नी विश्वान्देवान्द्यावापृथिव्यौ नूतनचरुद्रव्येण शेषेण स्विष्टकृत - ॥ आश्वयुजीकर्मणः प्राग्भावेनानुष्ठेयत्वात्समान तन्त्रत्वेऽपि पौर्वापर्यं विहितत्वाच्च जीर्णतण्डुल चरुणाश्वयुजी कर्मप्रधानहोमं कृत्वा नवीनतण्डुल चरुणाग्रयण प्रधान होमः । द्वयोश्चर्वोरेकं स्विष्टकृतं ततश्चरुप्राशनं तत इध्मसन्नहन होमादि कर्मसमाप्तिः ॥

अथ यवाग्रयणं न कार्यं अपि वा अक्रिया यवेष्विति श्रौतसूत्र एव विकल्पोक्तत्वात् स्मार्तवृत्तावपि यवाग्रयणं न कार्यं-मित्युक्तत्वात् यवव्रीह्याग्रयणयोः समान देवताकत्वात् कर्तृका-लैक्याच्चेति । श्यामाकैः प्रस्तरं कुर्यान्नाग्रयणमिति स्मार्तवृत्तिः । तत्र प्रस्तरः कुत्र विहितः कथं वा कुर्यादिति विचार्यमाणे विशेषा नाम्नानात् श्यामाकतृणमुष्टेः श्रौतप्रस्तरवदमन्त्रमसिदनिधानन छेदनसंस्कारं कृत्वा बर्हिष्येव स्रुवादुत्तरतस्तादृशं श्यामाक प्रस्तरं प्रागग्रं स्थापयित्वा तदुपरि दर्वीं स्थापयेत् । एतावत् श्यामाकप्रस्तरकृत्यं नान्यत् । तथासति न श्यामाकाग्रयणं कार्यं युक्तमयुक्तं वा सद्भिर्विचारणीयमेतत् अपिवात्र समानतन्त्रं कुर्यात् । सौम्यं चरुमस्य नामधेयेन होम इति स्मार्तवृत्तावे-वोक्तत्वात् । समानतन्त्रत्वेऽपि क्रमापेक्षितत्वात् तस्मिन् पक्षे श्रौतसूत्रे इन्द्राग्नी विश्वेदेवाः सोमो यजति । तत्र श्यामाको द्यावापृथिवी इत्येव क्रमस्य दृष्टत्वात् समानतन्त्रमेव व्रीहि श्यामाकयोराग्रयणानुष्ठानमिति प्रतिभाति । तत एवं प्रयोग-क्रमः । व्रीहि श्यामाकाग्रयणं तन्त्रेण करिष्ये इति सङ्कल्प्य निर्वापकाले इन्द्राग्निभ्यां विश्वेभ्यो देवेभ्यश्च तूष्णीं व्रीहीन्नि-

रूप्य तस्मिन्नेव शूर्पेऽन्यशूर्पे वा पवित्रे निधाय सोमाय त्वाजुष्टं निर्वपामीति समन्त्रकं श्यामाकान्निरूप्य पुनः सपवित्रे व्रीहिशूर्पे द्यावापृथिवीभ्यां तूष्णीं व्रीहीन्निरूप्य निर्वापवत् प्रोक्ष्यावघातादि स्थालीद्वये चरुद्वयं श्रपयित्वोद्वास्य निर्वापक्रमेण द्वयोः सजूरित्यादि समन्त्र हुत्वा श्यामाकचरुं सोमाय स्वाहेति हुत्वा द्यावापृथिवीभ्यां सजूरित्यादि समन्त्रं हुत्वा व्रीहिचरोः स्विष्टकृतं गृहीत्वा श्यामाकचरोश्च स्विष्टकृतं गृहीत्वा द्विरभिघार्य यदस्येति हुत्वा चरुद्वयैकदेशं पात्रान्तरे सहैव गृहीत्वा तत्पात्रं सव्ये पाणावित्यादि कर्मशेषं पूर्वोक्तवत्समापयेत् । आश्वयुजी कर्मणा समानतन्त्रत्वेऽपि तत्पूर्वकमेव कृत्वा त्रिभ्यः स्विष्टकृतं तिस्रः स्थाल्य इति विशेषोन्यत्सर्वं समानम् ।। इति श्रीमदारडोपनामक नारायणभट्टकृते गृह्याग्निसागरे आश्वयुजीकर्म व्रीहि श्यामाकाग्रयणानां समानतन्त्रत्वेन प्रयोगः ।।

अथ श्राद्धहेमाद्रौ वायुपुराणे - । श्यामाकैरिक्षुभिश्चैव पितॄणां सर्वकामिकम् । कुर्यादाग्रयणं यस्तु स शीघ्रं सिद्धिमाप्नुयात् ।। आग्रयणदिने षड्दैवत्यं श्राद्धमपि कर्तव्यम् । नवे धान्ये समायाते गृही श्राद्धं समाचरेत् । नवान्नलाभे देवो वै कामकालौ सदैव हि । इति हेमाद्रावुक्तेरत्रायं श्राद्धजातं मत्कृते श्राद्धसागरे स्पष्टमुक्तम् । आग्रयणाकरणे प्रायश्चित्तं स्मृतिचन्द्रिकायां कात्यायनः । नित्ययज्ञात्यये चैव वैश्वदेवात्ययेऽपिच्च । अनिष्ट्वा नवयज्ञेन नवान्नप्राशने तथा । भोजने पतितान्नस्य चरुर्वैश्वानरो भवेदिति । कारिकापि । अकृताग्रयणोऽश्नीयान्नवान्नं यदि वै ततः । वैश्वानराय कर्तव्यश्चरुः पूर्णाहुतिस्तुवेति ।। ऋग्विधाने - समिन्द्ररायामन्त्रे च वर्षे वर्षे जपेच्छतम् । आग्रयणं यदा न्यूनं

तदा सम्पूर्णमेव तत् ॥ इत्याग्रयणम् ॥

॥ अथ प्रत्यवरोहणप्रयोगः ॥

तच्च वृत्तिकारोक्तत्वात् मार्गशीर्ष्यां पौर्णमास्यां तत्पूर्वेद्युः चतुर्दश्यां वा कार्यम् । दिवैव गृहकुड्यलेपनतदाऽऽच्छादन निम्नोन्नतभूमिसमीकरण प्ररूढापामार्गादि उन्मूलनरूपं निवेशनालङ्कारं विधाय फलमूलरहित धान्यतृणाख्य पलालनिर्मितं च शयनार्थं कटं सम्पाद्य सङ्कल्पपूर्वकं प्रथमप्रयोगे प्रत्यवरोहणाङ्गं नान्दीश्राद्धं विधायास्तमिते सायमौपासनोत्तरं शुचिः पवित्रे धृत्वा प्राणानायम्य देशकालौ स्मृत्वा मम स्त्रीपुत्रादिसहितस्य जलस्थलचर सर्पबाधानिवृत्त्यभयहेमन्त सौमनस्य सिद्धिद्वारा श्री परमेश्वरप्रीत्यर्थं नित्यविधिरूप प्रत्यवरोहणाख्य कर्म करिष्ये । इति सङ्कल्प्याग्निं ध्यात्वा समिद्द्वयमादाय पुनर्देशकालौ सङ्कीर्त्य अस्मिन् प्रत्यवरोहणहोमे देवतापरिग्रहार्थमन्वाधानमित्यादि चक्षुष्यन्ते द्विवारं श्वेतं पायसेन नात्र स्विष्टकृतं सूत्रोक्तः रुद्रं पशुपतिमित्यादि पूर्णपात्रनिधानान्ते सपवित्रं शूर्पे श्वेताय द्विश्चतुरश्चतुरोमुष्टीन् व्रीहींस्तूष्णीं निरूप्य तूष्णीं प्रोक्ष्य पयसि चरुश्रपण.ज्यसंस्काराद्याज्यभागान्ते सुतादिभिरन्वारब्धोऽवदान धर्मेणावदाय द्वे पायसाहुती जुहुयात् । ॐ अपश्वेत पदा जहि पूर्वेण चापरेणच । सप्तच शारुणीरिमाः सर्वाश्च राजबान्धवाः स्वाहा । श्वेतायेदमुभयत्रापि ॥ ॐ नवं श्वेतश्चाभ्यागारे हिर्जघना किञ्चना श्वेतायवै दार्वायतमः स्वाहा । ॐ अभयं नः प्राजापत्येभ्यो भूयात् । इत्यग्निमीक्षमाणो जपित्वा । ॐ शिवो नः सुमना भवेत्युक्त्वा हेमन्तं सम्बुध्यन्तं मनसा स्मरेत् । ततोऽग्नेः पश्चाद्देशे पूर्वं पलालनिर्मितं कटं शयनार्थं कर्ता स्वयमास्तीर्य स्त्री

पुत्रादि सहितस्तस्मिन्नुपविश्य स्योना पृथिवीत्यस्य काण्वो मेधाथितिर्भूमिर्गायत्री जपे विनि० । ॐ स्योना पृथिवि - प्रथः । इत्यृचं जपेत् । एतदारभ्य मन्त्रोच्चारणार्हा स्त्री बालक व्यतिरिक्ताः स्योना पृथिवीत्यादीन् स्वस्त्ययनपर्यंतान् मन्त्रान् जपेयुः । ततः सामात्यः कर्ता प्राक्शिरा उदङ्मुखो दक्षिणपार्श्वेन शयीत । पूर्वं कर्ताऽनन्तरं जाया यथा ज्येष्ठं सर्वे पुत्रपौत्राःस्तथैव शयीरन् । यथावकाशं वा शयीरन् । ततः उत्थायोपविश्य प्राङ्मुखा अतोदेवा इत्यस्य काण्वो मेधातिथिर्देवा गायत्री । जपे वि० । अतो देवा -- धामभिरित्यृचं त्रिर्जपित्वा पुनरपि तथैव शयित्वोत्थायोपविश्य दक्षिणाभिमुखोऽतोदेवा अवन्तुन इति प्रथमपादं सकृज्जपित्वा पुनरपि तथैव शयित्वोत्थायोपविश्य पश्चिमाभिमुखः यतो विष्णुर्विक्रमे इति द्वितीयपादं सकृज्जपित्वा पुनरपि तथैव शयित्वोत्थायोपविश्योदङ्मुखः पृथिव्याः सप्त धामभिरिति तृतीयपादं सकृज्जपेयुः । ततः कर्ता स्विष्टकृद्वर्जमिध्मसन्नहनरज्जुप्रहरणादि कर्मशेषं समाप्य धृतपवित्रग्रन्थि विस्रस्य शुचि देशे क्षिपेद्द्विराचामेच्च । ततः सर्वे यथाशय्यं शयित्वा अपरेद्युरुत्थायोदिते सूर्ये स्नानादि कृतनित्यक्रियाः संगम्य सौर्याणि स्वस्त्ययनानि च सूक्तानि जपेयुः । अत्र वान्यत्राध्ययनकाले वा सूर्यसूक्तानां जपो दिवंवेति नियमश्चतुर्थाध्याये शांतिहोमस्थले वृत्तिकृदुक्तेः । तानि च । उदुत्यमिति त्रयोदशर्चस्य सूक्तस्य काण्वः प्रस्कण्वः सूर्यो नवाद्या गायत्र्यों यतश्चतस्रोऽनुष्टुभोंत्यस्तृचो रोगघ्न उपनिषदन्त्योर्धर्चो द्विषघ्नः जपे - । उदुत्यं नव षड्द्वित्रमिति कारिकोक्तेः नवर्चमेव कारिकामते

जप्यं । चित्रं देवानामिति पळर्चस्य सूक्तस्यांगिरसः कुत्सः सूर्य स्त्रिष्टुप् । नमोमित्रस्येति द्वादशार्चस्य सूक्तस्य सूर्योऽभितपाः सूर्यो जगती । दशमी त्रिष्टुप् । सूर्योन इति पचर्चस्य सूक्तस्य सौर्यश्चक्षुः सूर्यो गायत्री । आनोभद्रा इति दशर्चस्य सूक्तस्य राहूगणो गौतमो विश्वेदेवाः पञ्चाद्याः सप्तमी जगत्यः षष्ठी विराट्स्थाना शेषास्त्रिष्टुभः । स्वस्तिनो मिमीतामिति पञ्च-र्चस्य सूक्तस्यात्रिर्विश्वेदेवाः आद्यस्त्रिष्टुभोंत्ये अनुष्टुभौ । परावतोये दिधिषन्त इति सप्तदशर्चस्य सूक्तस्य नाभानेदिष्ठो मानवो विश्वेदेवा जगती । अन्त्ये त्रिष्टुभौ । सर्वेषां जपे विनियोगः । एतानि सर्वाणि जपेयुः । ग्रन्थबाहुल्यादत्र न लिखितानि । ततो यजमानः संस्कृतेन गृहान्नेन स्वादु व्यञ्ज-नादियुक्तेन त्रीनधिकान्वा शक्त्या ब्राह्मणान् भोजयित्वा तैः स्वस्त्ययनं वाचयेत् । एवं ॐ स्वस्तीति ब्रूत ॐ स्वस्तीति ब्राह्मणानां प्रत्युत्तरम् । स्वस्ति ब्रूत इत्युक्त्वा ॐ स्वस्तीति ब्रुवन्ति ते इति कारिकोक्तेः । इदं कर्म केचित् भुक्त्वापि कुर्वन्ति । युक्तं तूपवासी कर्म समाप्य भुक्त्वा शयीत । इति प्रत्यवरोहणम् ।। एतेषां पाकयज्ञानां मध्ये अन्यतमस्याकरणे प्रायश्चित्तमाह प्रजापतिः । हविर्यज्ञेष्वशक्तस्य लुप्तमप्येकमा-दितः । प्रजापत्येन शुध्येत पाकसंस्थासु चैवहीति । एतदुक्त प्रायश्चित्तानां श्रवणाकर्म सर्पबलि आश्वयुजीकर्माग्रयण प्रत्य-वरोहण प्रायश्चित्तमिति अवगन्तव्यम् । तत्राग्रयणे अन्यदप्युक्तं तच्चोक्तं प्राक् । इत्यारडोपनामक नारायण भट्ट कृते गृह्याग्नि सागरे प्रत्यवरोहणांतनिरूपणम् ।।

अत्रैव प्रमाणत्वेन श्रवणाकर्मादि गृह्यकारिकोच्यते । उच्यते

श्रवणाकर्म सर्पबल्पाख्य कर्मच । कुर्वंति श्रावणे मासि पौर्ण-
मास्यामिदं द्वयम् ।।१।। पूरयेत्तत्र कलशं नवं यावक सक्तुभिः ।
निधाय तं नवे शिक्ये दर्वीं वैकंकतीमपि ।।२।। प्राच्यां
दिशि शुचौ देशे बल्यर्थं परिकल्प्य च । यवधाना
विभज्यैकं भागमभ्यज्य सर्पिषा ।।३।। आदित्येऽस्तमिते
कुर्यात् अन्वाधानादि पूर्ववत् । हविर्द्वयस्य तूष्णीं स्तो निर्वा-
पप्रोक्षणे इह ।।४।। पुरोवदवघातादि स्याद्विभज्य च तण्डुलान् ।
तत्रैकेन पूरोडाशमन्येन श्रपयेच्चरुम् ।।५।। एकस्मिस्तु
पुरोडाशं कपाले श्रपयेदिह । आज्येन सह धानानां पर्यग्नि
करणं भवेत् ।।६।। आज्यस्य केवलोत्पूतौ तासां त्रिः प्रोक्ष-
णं भवेत् । चरुमासादयेत्पूर्वं पुरोडाशमतः परम् ।।७।। बर्हिष्या
ज्यांतरे कृत्स्नं पुरोडाशं निमज्जयेत् । प्रकाशपृष्ठमथवा
पुरोडाशं निमज्जयेत् ।।८।। अथ कृत्वाज्यभागांतं चर्वाहुति
चतुष्टयम् । हुत्वा चतुष्टयेनाग्नेनयेति प्रत्यृचं ततः ।।९।। उप-
स्तीर्याथ सव्येन दक्षिणे प्रोक्षिते करे । सव्येनैककपालं तमो-
प्य कृत्स्नमखण्डितम् ।।१०।। उपरिष्टात्तु सव्येन कुर्याद्विरभि
घारणम् । अच्युतायेति मन्त्रेण दक्षिणेन जुहोत्यथ ।।११।।
यस्मिन्नाज्ये निमग्नोयं स्रुवेणैव जुहोति तत् । उपर्येककपालस्य
मानो अग्ने व इत्यृचा ।।१२।। अथोपस्तरणाद्यन्यः करोति
गृहिणोंजलौ । सतेन जुहुयादक्ता धानाः शनो भवंत्विति
।।१३।। यास्तु धाना अनभ्यक्ताः पुत्रादिभ्यो ददाति ताः ।
अथ स्विष्टकृतं हुत्वा चरुधानैकदेशतः ।।१४।। परिषेचन
पर्यन्तं होमशेषं समापयेत् । इत्युक्तं श्रवणाकर्म सर्पब-
ल्याख्यमुच्यते ।।१५।। इति श्रवणाकर्म ।।

अथ प्रपूरयेद्दर्वी सक्तुभिः कलशस्थितैः ।। गृहात्प्रागु पनिष्क्रम्य शुचौ देशेऽह्नि कल्पिते ।।१६।। अप आसिच्य तानोप्य सर्प देवेति मन्त्रतः ।। नांतरा बलिमात्मानं व्यवेयादिह कश्चन ।।१७।। व्यवायस्य निषेधोयमुक्त आपदि दानतः ।। ये सर्पा इति मन्त्रेण नमस्कुर्यात्कृतांजलिः ।।१८।। बलिं प्रदक्षिणीकृत्य पश्चात्तस्योपविश्य च ।। सर्पोऽसीत्यादिकं मन्त्रं ददाम्यन्तं सकृद्वदेत् ।।१९।। ध्रुवामुंते परिददाम्येनमुक्त्वा निवेदयेत् ।। ज्येष्ठानुक्रमतः पुत्रानप्यत्र दुहितॄस्तथा ।।२०।। ततः पत्नी ध्रुवामुंत इत्याद्यावर्ततेऽत्रतु । वाच्य पुत्रादि नामात्र द्वितीयांतममुं पदे ।।२१।। ध्रुवमामिति चात्मानं ततः परिददा-ति सः । अत्यः कुर्वीतचेदाह गृहिणो नाम मां पदे ।।२२।। साय प्रातश्चमन्त्रेण तेनाप्रत्यवरोहणात् । बलिमेवहरेन्नेह नम-स्कारादिरिष्यते ।।२३।। सायंप्रातश्च यावन्तः कालाः स्यु-र्तद्दिनादधः । तावन्तो वा बलींस्तस्मिन्नेवाहुति हरेदथ ।।२४।। इति सर्पबलिः । कुर्वीताश्वयुजीकर्म तदिदानीं मयोच्यते। स्यादाश्वयुजमासस्य पौर्णमास्यां तु कर्म तत् ।।२५।। निवेशनम-लकुर्यात् कुड्यानां लेपनं भवेत् । उपर्याच्छादनं चैषां समां भूमिं करोत्यथ ।।२६।। सर्वे गृह्या विशेषेण स्नाताः शुक्लांबरा स्तथा । औपासनाहुतेः प्रातरन्वाधानादि पूर्ववत् ।।२७।। उक्त्वा पशुपतीत्येतत् चतुर्थ्यन्तं ततः परम् । त्वाजुष्टं निर्व-पामीति निर्वापप्रोक्षणे तदा ।।२८।। प्रोक्षामीति विशेषस्तु प्रोक्षणेऽन्यत्समं भवेत् । चरुश्रपणपर्यन्तमवघातादि पूर्ववत् ।२९।। कुर्यात्पृषातकं नाम हविरन्यत्तदुच्यते । पयस्याज्ये निषिक्तेतु तत्पयः स्यात् पृषातकम् ।।३०।। अस्यापि च सहाज्येन पर्यग्नि

करणं भवेत् ।। आज्यस्य केवलोत्पूतौ तस्य त्रिः प्रोक्षणं भवेत् ॥३१॥ इध्माभिघारणं तस्याहुतयोद्वासनादिकं ॥ कृत्वा ज्यभागपर्यंतमन्वारब्धः सुतादिभिः ॥३२॥ पशुपतये शिवाय शङ्करायेति नामतः ॥ पृषातकाय स्वाहेति मन्त्रेण जुहुया च्चरुम् ॥३३॥ अथोपस्तरणार्दन्यः करोति गृहिणोंऽजलौ ॥ अवद्यत स्रुवेणैव पृषातकमवद्यति ॥३४॥ जुहोत्यंजलिनाप्यन्ते ऊनं मे पूर्यतामिति ॥ हविर्द्वयांशतः स्विष्टकृतं हुत्वा समापयेत् ॥३५॥ इत्याश्वयुजीकर्म ॥

शरद्याग्रयणं नाम पर्वणि स्यात्तदुच्यते । पूर्णपात्र निधानांतमन्वाधानादि पूर्ववत् ॥३६॥ निर्वापप्रोक्षणे तूष्णीं भवेतामत्र कर्मणि ॥ कृत्वाज्यभागपर्यंतमवघातादि पूर्ववत् ॥३७॥ तिस्रश्चर्वाहुती हुत्वा सजूरित्यदिभिस्त्रिभिः ॥ ततः स्विष्टकृतं हुत्वा पूर्वान्नप्राशनं त्विति ॥३८॥ चरुशेषस्यैकदेशं सव्ये पाणौ निधाय च ॥ प्राजापत्येति मन्त्रेण दक्षिणेनाभिमृश्य तम् ॥ ३९ । भद्रान्न इति तु प्राश्याचम्याग्रे नाभिमात्मनः ॥ आलभेतोपविष्टस्तु तत्रैवामोसि मन्त्रतः ॥४०॥ मध्यमन्तु हविःशेषं पत्नीमाश्नात्यमन्त्रकम् ॥ परिषेचनपर्यन्तं होमशेषं समापयेत् ॥४१॥ एतदाग्रयणं कुर्यात् त्रेताग्निस्त्वाहितानले ॥ इत्याग्रयणम् ॥ ॥ एवमाग्रयणं प्रोक्तं वक्ष्ये प्रत्यवरोहणम् ॥४२॥ मार्गशीर्षस्य मासस्य पौर्णमास्यां तदिष्यते ॥ पूर्वेद्युर्वा भवेत्तद्वदलंकृत्य निवेशनम् ॥४३॥ भानावस्तमिते कुर्यादन्वाधानादि पूर्ववत् ॥ निर्वापप्रोक्षणे तूष्णीं पयसि श्रपयेच्चरुम् ॥४४॥ कृत्वाज्यभागपर्यंतमन्वारब्धः सुतादिभिः ॥ अपश्वेतेति मन्त्राभ्यां जुहुयात्पायसाहुती ॥४५॥

जपेदभयमित्यादि वीक्षमाणो हविर्भुजम् ।। उक्त्वा शिवोन इत्यादि हेमन्तेति पदं स्मरेत् ।।४६।। स्वस्तर स्वयमास्तीर्य पश्चादग्नेरतः परम् ।। तत्रोपविशति स्योना पृथिवीति जपेदृचम् ।।४७। एतत्प्रभृति मन्त्रज्ञा जपेयुः सूनवो पि च ।। शयीत तत्र सामात्यः प्राक्शिरा उदगाननः ।।४८।। गृहिणोऽनन्तरं जाया ज्येष्ठस्तत्र शयीत सः । यथावकाशमथवा शेरते तद्वदेव ते ।।४९।। उत्थायर्चं अतो देवा: प्राङ्मुखास्त्रिर्जपन्त्यथ ।। ऋचोऽस्याः प्रथमं पादं जपेयुर्दक्षिणामुखाः ।।५०।। प्रत्यङ्मुखा द्वितीयं तु तृतीयमुदगाननाः ।। ततोत्र स्विष्टकृद्वर्जं होमशेषं समापयेत् ।।५१।। यथाशय्यं शयित्वा ते संगता उदिते रवौ ।। जपेयुः सूर्यसूक्तानि तद्वत् स्वस्त्ययनानि च ।।५२।। उदुत्यं नव षट्चित्रं देवानामुदगादिति । नमो मित्रस्य सूक्तं च सूर्योन इति चापरम् ।।५३।। उक्तानि सूर्यसूक्तानि वक्ष्ये स्वस्त्ययनान्यथ ।। आनो भद्रास्तथा स्वस्ति नो मिमीतां परावतः ।।५४।। सम्स्कृतेन गृहान्नेन ब्राह्मणान् भोजयेदथ ।। ॐ स्वस्ति ब्रूत इत्युक्त्वा ॐ स्वस्तीति ब्रुवन्ति ते ।।५५।। इति प्रत्यवरोहणम् ।।

अथ पिण्डपितृयज्ञः ।। एवमनाहिताग्निर्नित्ये श्रपयित्वा तं प्रणीय जुहुयादिति सूत्रात् गृह्याग्निमतः पिण्डपितृयज्ञः प्राप्तः स च गृह्याग्नि परिचरणोत्तरं यदैव दर्शप्राप्तिस्ततस्तदेवारम्भणीयः । न पुनस्तस्य दर्शपूर्णमासस्थालीपाकारंभप्रतीक्षा । अमावास्या -यामपराह्णे पिण्डपितृयज्ञेन चरत्यमावास्यायामपराह्णे पिण्ड पितृयज्ञ इति श्रुतिसूत्रयोस्तस्य स्वतन्त्रकाल विधानात् पिण्डपितृयज्ञः स्वकालत्वादनंगः स्यादिति जैमिनिसूत्राच्च ।तत्र

सूत्रम् । अमावास्यायामपराह्णे पिण्डपितृयज्ञ इति अमावास्या शब्दः प्रतिपत्पंचदश्योः संधिवाचकः । अत्रापराह्ण शब्दः समन्वयात् तद्वत्यहोरात्रे वर्तते तस्या अपराह्णे अह्नश्चतुर्थ भागे पिण्डपितृयज्ञः कर्त्तव्य इति वृत्तिः । अनेन खण्डे दर्शे शेषपर्वणि स्थालीपाकोत्तरं अपराह्णे पिण्डपितृयज्ञः कर्तव्य इति साधितम् । अखण्डे तु दर्शे तद्दिन एव पिण्डपितृयज्ञः । अहोरात्रसंधौ तिथिसन्धौ तु पूर्वदिन एवेति वृत्तिकृत् । यागः स्थालीपाकः । अत्र योऽनाहिताग्निरौपासनाग्निमान् मृतपितृकः स वक्ष्यमाणं पार्वणश्राध्दं पिण्डपितृयज्ञं वाऽखण्डे दर्शे व्यतिषगंग कुर्यात् । खण्डे दर्शेतु पूर्ववच्छेषपर्वणि पिण्डपितृयज्ञपूर्वेद्युः केवल पार्वणश्राद्धमेव न व्यतिषंगः । वृत्तिकृता नात्र स्थालीपाकश्चोद्यते सर्वश्राद्धेषु प्रसंगादित्युक्तेः । व्यति-षंगो नाम द्वयोः कर्मणोर्विच्छिद्य सहानुष्ठानात्मकः तंत्र विशेषः । अत्रार्थे निर्णयसिंधुः । आश्वलायनानामपि शेषपर्वणि पिण्डपितृयज्ञः । तथा च सूत्रम् । अमावास्यायापराह्णे पिण्ड पितृयज्ञ इति । अत्र नारायणवृत्तिः अमावास्या शब्दः प्रति-पत्पंचदश्योः सन्धिवचनोऽप्यत्रापराह्ण शब्द समन्वयात्तद्वत्य-होरात्रे वर्तते । तस्यापराह्णे अह्नश्चतुर्थभागे पिण्डपितृयज्ञः कार्यः । औपासनावसथ्यौ यजनीये एवाहनि यदात्वहोरात्रसन्धौ तिथिसन्धिः स्यात्तदौपवसथ्य एवाहनि क्रियत इति । अयं च स्मा-र्ताग्निमता सम्पूर्णदर्शे श्राद्धव्यतिषंगेण कार्यः । व्यतिषंगो नामोभ-योः सहानुष्ठानम् । एतच्च स्थालीपाकेन सह पिण्डार्थमुद्धृत्येति सूत्रे वृत्तिकृतोक्तम् । खण्डपर्वणि तु केचिदाहुः । पूर्वेह्नि पिण्डपितृयज्ञः व्यतिषंगेण श्राद्धं कृत्वा परेऽह्नि पिण्डपितृयज्ञः कार्यः ।

वृत्तिकृता – अन्वष्टक्यं च पूर्वेद्युः मासि मास्यथ पार्वणम्। काम्यमभ्युदयेऽष्टम्यामेकोद्दिष्टमथाष्टममित्युदाहृत्य पूर्वेद्यु चतुर्षु स्थालीपाकादुद्धृत्याग्नौ करणमित्युक्ते दर्शश्राद्धे स्थालीपाको नियत इति गम्यते। स्थालीपाकश्च पितृयज्ञ एवेति। पूर्वदिने व्यतिषंगः सिद्धः। प्रयोगपारिजाते तु। वार्षिकश्राद्धादेरपि व्यतिषंग उक्तः। किमुत दर्शश्राद्धस्य। न्यायविदस्त्वाहु सूत्रस्य वृत्तेश्च संपूर्ण दर्शविषयत्वात्। खण्डपर्वणि पूर्वदिने केवलं श्राद्धम्। पर दिने च केवलं पितृयज्ञः। अतएवोक्तं वृत्तिकृता नात्र पूर्वे स्थालीपाकश्चोद्यते सर्वश्राद्धेषु प्रसंगादिति। प्रयोगपारिजातो -क्तिरप्येतद्विषये वा पूर्वदिने च श्राद्धे अग्नौकरणमेव न पाणिहोमः। चतुर्ष्वाद्येषु साग्नीनां वह्नौहोमो विधीयते। पित्र्य ब्राह्मण हस्ते स्यादुत्तरेषु चतुर्ष्वपि। इति परिशिष्टे नियमात्। न च लौकिकाग्नौ पक्वस्य कथं गृह्याग्नौ होमः। नान्याग्नौ पक्वमन्याग्नौ जुहुयादिति निषेधात्। मैवं। श्राद्धस्य गृह्यत्वेन स्मार्ताग्नौ पचनाग्नौ वा कर्तव्यत्वात्। अस्मात् पूर्वेद्युः केवल श्राद्धम् न व्यतिषंगः। इदमेव युक्तम्।

आहिताग्निनातु सर्वाधानिनार्धाधानिना च सम्पूर्णे खंडे वादर्शे श्रौताग्नौ पृथगेव पितृयज्ञः कार्यो न तु दर्शश्राद्धे व्यतिषंगेणे ति विस्तरभीतेर्विरामः। इति निर्णयसिन्धूक्तं। अथ प्रथमदर्शे पत्न्यां रजस्वलायां पिण्डपितृयज्ञारंभं न कुर्यात्। पिण्डपितृयज्ञ लोपप्रायश्चित्तार्थं सप्तहोतारं हुत्वा अनन्तर दर्शे पिण्डपितृयज्ञारंभं कुर्यात्। इत्युक्तम् प्रायश्चित्त प्रदीपे-। द्वितीयादौ पिण्डपितृयज्ञेन प्रतिबंध इत्युक्तं भाव्यम्। तत्र अनाहिताग्नेर्दक्षिणाग्निस्थानीये औपासनाग्नौ श्रपणहोमौ भवतः।

यद्वा प्रयोगरत्ने वाजपेयि कृत श्राद्धपद्धतौ चोक्तत्वाद्यथासम्प्रदायं विचार्येत्युक्तत्वादतिप्रणीते होम इति साधितत्वाच्च नित्ये श्रपयित्वाति प्रणीते वा होमः ।। अत्र होमे पक्ष द्वयं उपवीती प्राचीनावीतीति च । तत्राद्यपक्षे अग्नये कव्य वाहनाय स्वाहा । सोमाय पितृमते स्वाहेति हुत्वा सव्येनैव मेक्षणानुप्रहरणम् । प्राचीनावीतिना होमपक्षे तु पूर्वं सोमाय पितृमते स्वधानमस्ततोऽग्नये कव्यवाहनाय स्वधानम इति जुहुयात् प्राचीनावीतिनैव मेक्षणानुप्रहरणम् । यद्यपि भट्टैः प्रयोगरत्ने वाजपेयिभिः स्वकृतश्राद्धपद्धतौ च उभयपक्षेपि अपसव्येन मेक्षणानुप्रहरणम् । इदानींतनानां याज्ञिकानामेवं विधानुष्ठान दर्शनात् । कारिकायाम् स्वाहाकारेण होमश्चेदुपवीती भवेदिह । अस्मिन्नेव तु पक्षेऽग्नौ पूर्वमेव जुहोत्यथ ।। मेक्षणानुप्रहृत्यन्तं मंत्रयोर्व्यत्ययस्तथेत्युक्तत्वात् । स्मृत्यर्थसारे - प्राचीनावीतिना होमपक्षे प्राचीनावीतिनैव मेक्षणानुप्रहृत्यन्तं मन्त्रयोर्व्यत्ययस्तथा इत्युक्तत्वाच्च । सव्येन होमपक्षे सव्येन मेक्षणानुप्रहरणम् प्राचीनावीति पक्षे प्राचीनावीतिनैवेति मथितोऽर्थः ।। वृत्तिकृत्स्वरसस्तु सव्येनेति प्रतिभाति तदावृत्तौ सूत्रच्छेदः । एवं स्वाहाकारेण वाग्नि पूर्वं यज्ञोपवीती इदमेव सूत्रम् । मेक्षणमनुप्रहृत्य परं प्राचीनावीती रेखां त्रिरुदकेनोपनयेत् पितामह प्रपितामहा इति ततोऽप्यपरम् । अत्र प्रासंगिकं किंचित् । य अर्धाधानी य आहिताग्निस्तस्य श्रौतेन पिण्डपितृयज्ञेनैव सिद्धिः न पुनरौपासनहोमस्थालीपाकवत् स्मार्तेऽपि पिण्डपितृयज्ञः एवमनाहिताग्नि नित्य इत्येतत् सूत्रस्यानाहिताग्नित्वेन प्राप्त्यभावात् ।।

॥ अथपिण्डपितृयज्ञप्रयोगः ॥

अत्रैवं कारिका ॥ एकाग्निरपि कुर्वीत पितृयज्ञः स उच्यते। अथ दर्शेऽपराह्णेतु प्रज्वाल्यौपासनं ततः। ।१।। प्राग्दक्षिणाग्रकैर्दर्भैः परिस्तीर्य हविर्भुजम् ॥ कर्मसाधनमन्त्रेष्टं सर्वं प्राग्दक्षिणामुखम् ॥२॥ दर्भानास्तीर्य वायव्यामैशान्यां वा हविर्भुजः ॥ स्थाल्याद्यैकैकमासाद्य स्थालीशूर्पे प्रगृह्य च ॥३॥ व्रीहिमच्छकटं वह्नेर्दक्षिणस्यामवस्थितम् ॥ आरुह्य व्रीहिभिः पूर्णां स्थालीं शूर्पे निमज्य च ।।४।। शकटारोहणं चेह भवेद्दक्षिणभागतः ॥ शूर्पस्थान् शकटे प्रास्य कृष्णाजिन उलूखले ॥५॥ चरुस्थाली स्थितान् व्रीहीनवहन्याद्वधूस्ततः ॥ सकृत्फलीकृतानत्र सकृत्प्रक्षाल्य तण्डुलान् ॥६॥ श्रपयित्वोलमुकं नीत्वा ये रूपे त्यानलीं दिशम् ॥ अति प्रणीत एषोग्निस्तं परिस्तीर्य पूर्ववत् ।।७।। अर्वागस्माल्लिखेत् स्फ्येन लेखामपहता इति ॥ अभ्युक्ष्य तस्यामास्तीर्य सकृदाच्छिन्नबर्हिषा ॥८॥ अनुत्पूत विलीनाज्यं ध्रुवायां सिच्यतेऽधुना। उत्पूतं नवनीतं वासाद्य दक्षिणतो ध्रुवम् ॥९॥ अभिघार्य चरुं ध्रौवेणोदगुद्वास्य पश्चिमे ॥ आसाद्य चांजनादीनि दक्षिणस्यां हविर्भुजः ॥१०॥ प्राचीनावीत्यथेदानी माधायेध्मं हविर्भुजि ॥ अथावदान धर्मेण गृहीत्वा मेक्षणेन तु ॥११॥ चर्वाहुतिद्वयं हुत्वा सोमायेति द्वयेन वै ॥ स्वाहाकारेण होमश्चेदुपवीती भवेदिह ॥१२॥ मेक्षणानुप्रहृत्यन्तं मन्त्रयोर्व्यत्यय-स्तथा ॥ प्रास्याग्नौ मेक्षणं चापो निनयेत्पितृतीर्थतः ॥१३॥ लेखायां पितृतीर्थेन शुंधंतामिति तु त्रिभिः ॥ तत्र पिण्डत्रयं दद्यात् पराचीनेन पाणिना ॥१४॥ पित्रादि त्रिभ्य एतत्ते

विष्णो ये चेति मन्त्रतः ।। नामापि चेन्न जानीत ततेत्यादि वदेत्क्रमात् ।।१५।। स्वाहेतेनोक्तमन्त्रेण पिण्डो जीवाय हूयताम् । निपृतानत्र पितर इति ताननुमन्त्र्य तु ।।१६।। अप्रदक्षिणमावृत्य चोदक् प्राणान्नियम्य च । प्रत्यावृत्यानुमन्त्र्यामी मदंतेत्यादि मन्त्रतः ।।१७।। चरुशेषमवघ्राय निनयेत्पूर्ववज्जलम् ।। अभ्यंक्ष्वांक्ष्वेति नामादि मन्त्राभ्यां तैलमञ्जनम् ।।१८।। दद्याद्दशामथैतद्वदिति पिण्डेष्वतः परम् ।। नमो व इत्युपस्थाय मनोन्वेति तृचेन च ।।१९।। परेतनेति मन्त्रेण पिण्डान् तान्वै प्रवाहयेत् ।। औपासनान्तिकं गत्वा जपेदग्नेर्तमित्यृचम् ।।२०।। यदन्तरिक्षमित्येतान् तत्स्थ एव जपेदृचम् ।। गार्हपत्य पदस्येह लोपं न्यायविदो विदुः ।।२१।। वीरं मे दत्तमन्त्रेण पिण्डमादाय मध्यमम् ।। तत्पिण्डं प्राशयेत्पत्नी माधत्तेत्यादि मन्त्रतः ।।२२।। अप्सु वातिप्रणीतेऽग्नौ इतरौ प्रक्षिपेदथ ।। अथेहसादितानां च नवयज्ञायुधानि तु ।।२३।। द्वे द्वे एवोत्सृजेत्तानि शिष्टं सार्धं तृणेन तु ।। एवं पिण्डपितृयज्ञं वक्ष्ये नित्यं तु पार्वणम् ।।२४।।

अथप्रयोगः।।अमावास्यायामपराह्णे औपासनाग्निं प्रज्वाल्य शुचिः प्राणानायम्य धृतपवित्रो देशकालौ स्मृत्वा पितृतृप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं पिण्डपितृयज्ञं करिष्ये इति संकल्प्य आग्नेयाभिमुखोऽग्निं ध्यात्वा परिसमूह्याग्नेयाग्रकैर्दर्भैः परिस्तीर्याग्नेरीशान्यां वायव्यां वा आग्नेयाग्रकान्दर्भानास्तीर्य अग्निं पर्युक्ष्य तेषु चरुस्थालीं शूर्पं स्फ्यं उलूखलं मुसलं स्रुवं ध्रुवां कृष्णाजिनं सकृदाच्छिन्नं बर्हिरिध्मं मेक्षणं जलपूर्णं कमण्डलुं चेति द्वादश पात्राणि यथायोग्यं न्यग्बिलान्येकैकश आग्नेयसंस्थान्यासादयेत्।। पूर्वोक्तलक्षणः काष्ठखड्गं स्फ्यः । तथाज्यधारणार्था स्रुक् ध्रुवा

शेषं प्रसिद्धम् ॥ पात्राण्युत्तानानि कृत्वा कमण्डलु जलेन प्रोक्ष्य स्थालीं शूर्पं चादायाग्नेर्दक्षिणतः स्थितं व्रीहिमच्छकटं दक्षिणत आरुह्य स्थालीं शूर्पे निधाय व्रीहिभिः पूरयित्वा यथास्थाली मुखस्थाः शूर्पे निरतन्ति तथा निमृज्य स्थालीमुखदेशतः पतितान्व्रीहिन् शकटे प्रास्याग्नेः पश्चिमतो वायव्यग्नेव आस्तीर्णे कृष्णाजिने उलूखल निधाय तत्र स्थालीस्थान् व्रीहिन् निधायाग्नेयाभिमुख्या तिष्ठन्त्या पत्न्या वह तान् सकृत्फलीकृतानविविच्य सकृत्प्रक्षालितान् जीवतण्डुलान् श्रपयेच्चरुमनुद्धारयैवाग्नेरेकं प्रदीप्तमुल्मुकं गृहीत्वाग्नेराग्नेय्यां दिशि कृते शुचिस्थले ये रूपाणि प्रतिमुंचमाना असुराः सन्तः स्वधया चरन्ति ॥ परापुरो निपुरो ये भरन्त्यग्निष्टाल्लोकात्प्रणुदात्वस्मादिति मन्त्रेण नीत्वा तमतिप्रणीताख्यमग्निं पूर्वं तरिस्तीर्य दक्षिणाभिमुखो अपहता असुरा रक्षांसि वेदिषद इति मन्त्रेण औपासनातिप्रणीतयोरन्तराले स्फ्येन सव्योत्तराभ्यां पाणिभ्यां गृहीतेन कुशमूलेन वाग्नेय्यभिमुखं लेखामुल्लिख्य तामद्भिरभ्युक्ष्य सकृदाच्छिन्न बर्हिषाच्छाद्यानुत्पूतमाज्यं विलापितमुत्पूतं नवनीतं वा ध्रुवायामासिच्याग्नेर्दक्षिणतः कुशेष्वासाद्य स्रुवं सम्मृज्य तेन ध्रुवास्थमाज्यमादाय चरुमभिघार्य उदगुद्वास्यौपासनाग्नौ होमपक्षे तस्य पश्चादति प्रणीताग्नौ होमपक्षेऽतिप्रणीताग्नेः पश्चाद्दर्भेष्वासाद्य दक्षिणतोऽभ्यञ्जनाभ्यञ्जनं कशिपूपबर्हणान्यासादयेत् : ततोऽति प्रणीताग्नेरौपासनाग्नेर्वा पश्चिमत उपविश्यार्चयित्वा प्राचीनावीत्यभिघारितमरत्निमात्रं प्रादेशमात्रं वा पञ्चदशदारुकमिध्मं पितृतीर्थेन तूष्णीमग्नावभ्याधाय स्रुवेणाज्यमादाय मेक्षणमुपस्तीर्य उद्धृतं चरुं द्विधा विभज्योत्तर भागमध्यादंगुष्ठपर्वमात्रं मेक्षणेनावदाय

तेनैव पुनः पूर्वभागादवदाय पात्रस्थमवत्तं चाभिघार्य सव्यंपाणिं हृदि निधाय सोमाय पितृमते स्वधानमइति । अंगीकृताग्नें दक्षिणभागे पराचीन पाणिना हुत्वा सोमाय पितृमत इदं नम मेति त्यजेत् । पुनः पूर्ववद्दक्षिणभागस्थचरोरवदाय अग्नये कव्य-वाहनाय स्वधानम इत्यग्नेरुत्तरभागे पूर्ववद्धुत्वा अग्नये कव्यवा-हनायेदं नममेति त्यक्त्वा प्राचीनावीत्येव मेक्षणमग्नावनुप्रहरेत् ॥ अनुप्रहरणस्य होमांगत्वात् । स्वधानमः शब्दस्थाने स्वाहाकारेण वा होमः । तदा आहुत्योर्व्यत्ययः उपवीतिता च मेक्षणानुप्रहरण पर्यंतम् । यथा अग्नये कव्यवाहनायस्वाहेति प्रथमाहुतिः । सो-माय पितृमते स्वाहेति द्वितीया । त्यागश्चाहुतिवत् । ततः प्रा-चीनावीती पूर्वकृतलेखायां स्थापितकमण्डलुजलं दक्षिणहस्तेन पितृतीर्थेनाग्नेयापवर्गं । शुंधंतां पितरः शुंधंतां पितामहाः शुंधं-तां प्रपितामहाः इतिमंत्रैस्त्रिर्निनयेत् । ततो हुतशेषेण साज्येन त्रीन् पिण्डान् कृत्वा तस्यां लेखायां पराचीन पाणिः पितृ तीर्थेन तान्पिण्डानाग्नेयापवर्गं पित्रादिभ्यो दद्यात् । तद्यथा एत-त्तेऽमुकशर्मन् ये चत्वामत्रानु तेभ्यश्चेति पित्रे एवं पितामह प्रपिता महयोरपि । ततः अत्र पितरो मादयध्वं यथाभागमावृषायध्व-मिति सकृत्पिण्डाननुमंत्र्य सव्येन पार्श्वेन सव्यावृत्योदङ्मुखो भूत्वा यथाशक्ति प्राणान्नियम्य अभ्यावृत्य अमीमदन्त पितरो यथाभागमावृषायीषतेति पुनस्ताननुमंत्र्योपवीती चरुशेषमवघ्रा-याचम्य प्राचीनावीती पूर्ववच्छुंधंतां पितर इत्याद्यैर्मंत्रैस्त्रिभिः कमण्डलुजलं पिण्डान्ते निनीय अमुकशर्मन्नभ्यंक्ष्वेति त्रिष्वपि पिण्डेषु अभ्यञ्जनं तैलं घृतं वा दर्भेण दत्वाऽमुकशर्मन्नंक्ष्वेति तथै वांजनं दद्यात् । अथैतद्वः पितरो वासो मानो तोन्यत् पितरो

युङ्ध्वमिति प्रतिपिण्डं मन्त्रावृत्या नववासो दशां पञ्चाशद्वर्षाधिकवयश्चेत्स्वप्रकोष्ठहृदयान्यतर लोम वा दत्वा कशिपूपबर्हणे निवेद्य सव्योत्तराभ्यां पाणिभ्यां कृतांजलिराग्नेयाभिमुखः पिण्डानुपतिष्ठेत मन्त्रैः। तेच । नमो वः पितर इषे नमोवः पितर ऊर्जे नमो वः पितरः शुष्माय नमो वः पितरो घोराय नमो वः पितरो जीवाय नमो वः पितरो रसाय ।। स्वधाव पितरो नमो वः पितरो नम एतायुष्माकं पितर इमा अस्माकं जीवावो जीवन्त इहसन्तः स्याम ।। मनोन्वाहुवामहे नारा शंसेन सोमेन । पितॄणां च मन्मभिः ।। आतएतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक्च सूर्यं दृशे ।। पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रातं सचेमहि इति च ।। अथ परेतन पितरः सोम्यासो गम्भीरेभिः पथिभिः पूर्विणेभिः । दत्वा यास्मभ्यं द्रविणेह भद्रं रयिं च नः सर्ववीरं नियच्छथ ।। इति मन्त्रेण पिण्डानाग्नेयाभिमुखं सकृदुत्तानेन हस्तेन चालयेत् ।। अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदि स्पृशं । ऋध्यामात ओहैः । इत्यौपासनाग्नि समीपं गत्वा । यदन्तरिक्षं पृथिवी मुतद्यां यन्मातरं पितरं वा जिहिंसिम । अग्निर्मातस्मादेनसः प्रमुंचतु करोतु मामनेनसम् । इति मन्त्रं गार्हपत्य पद रहितं पठेत् । केचित्तु द्वाभ्यामपि मन्त्राभ्यामग्न्युपस्थानमाहुः ।। अथ वीरंमे दत्त पितर इति मन्त्रेण मध्यमं पिण्डमादाय सुपुत्र प्राप्त्यै पत्न्या प्राशयेत् । आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् । यथा यमरपा असदिति मन्त्रेण । अयं मन्त्रः पत्न्याः पत्न्यो बह्वृचश्चेद्विभज्य पिण्डं प्रतिपत्नीं मन्त्रेण प्राशयेदित्युक्त मण्डविलायाम् ।। रामाण्डारे तृतीयपटलेप्येवम् । पत्नीबहुत्वे पिण्डविभागो मन्त्रावृत्तिश्चेत्युक्तम् । गृह्यकारिकायामप्येवम् ।

निर्णयसिन्धौ - श्राद्धकारिकायां छागलेयः - प्राचीनावीतिनामंत्र्य पत्नीपिण्डो विभज्यते । प्रतिपत्त्यस्य मन्त्रस्य कर्तव्यावृत्तिरत्र तु ।। व्यतिषंगश्राद्धे तु द्वावपि मध्यमौ पिण्डौ विभज्य प्रतिपत्नीं मन्त्रेण प्राशयेत् ।। तत्रापि पिण्डद्वयप्राशने भागद्वयप्राशनेऽपि सकृदेव मन्त्रः सह भक्षणत्वात् । नृसिंहपारिजाते पत्नीद्वित्वे अर्थात् पितृमध्यपिण्डं एकस्यैव मातामहपिण्डमेकस्यैव दद्यात् ।। पत्नी बहुत्वे तासां गुणवतो वयस्कालत समर्थाभ्यो दद्यात् । तत्र सर्वाः समर्थाश्चेत् ऋतुकालानुसारेण दद्यात् । अथवाऽऽगामि दर्शे एकस्यैव दद्यादिति युक्तं वा विचारणीयमेवतत् ।। इतरौ पिण्डौ अप्स्वति प्रणीते वाक्षिपेत् । ब्राह्मणं वा प्राशयेत् । स्मृत्यर्थसारेतु - पिण्डांस्तु गोजविप्रेभ्यो दद्यादग्नौ जलेक्षिपेन् इति । आसादितानां पात्राणां मध्ये सकृदाच्छिन्नर्बर्हिरिध्म मेक्षणानां विनियुक्तत्वादवशिष्टानां द्वंद्वश उत्सर्गः । अवशिष्टमेकं तृणेन सहोत्सृजेत् । अत्राग्नेः परिसमूहन पर्युक्षणे स्मृत्यर्थ सारोक्तत्वाल्लिख्यते । मदनरत्ने वायुपुराणे । कण्डनं पोषणं चैव न तथोल्लेखन क्रिया । सकृदेव पितॄणां स्याद्देवानां तु त्रिरुच्यते ।। इति परिस्तरण काले नात्राप्रदक्षिण शंका कार्या अन्वष्टक्यां समूलबर्हिरप्रदक्षिणमिति तद्वृत्तौ विशेषोक्तेः । न चात्राप्रदक्षिण शंका परिसमूहन पर्युक्षणयोः पाराशरमाधवेन । मनुः । पतिव्रता धर्मपत्नी पितृपूजनतत्परा । मध्यमंच ततः पिण्डमद्याच्चैव सुतार्थिनी ।। आयुष्मन्तं सुतं विद्याद्यशो मेधासमन्वितम् । धनवन्तं प्रजावन्तं धार्मिकं साधकं तथेति । पिण्डं पत्नीं प्राशयेदित्यत्र पत्नी यदा गुर्विण्यादिना पिण्डप्राशनानर्हा तदातं पिण्डं वृद्धं वृषभं छागं वा प्राशयेत् । पत्नी यद्यन्यदेशस्था गुर्विणी सूतिकापिवा । तदा तं

जीर्णं वृषभश्छागो वा भोक्तुमर्हति । इति वृद्धयाज्ञवल्क्योक्तेः। परशुरामप्रतापे बृहस्पतिरेवमाह। पराशरमाधवे तु पत्न्या असन्निधाने प्रतिपत्त्यन्तरमाह बृहस्पतिः । अन्यदेशगता पत्नी गर्भिणी रोगिणी तथा । तदा त जीर्णवृषभश्छागो वा भोक्तुमर्हति इति । आपस्तंबोपि प्रतिपत्त्यन्तरमाह । यदि पत्नी विदेशस्था उच्छिष्टा यदि वा मता । दुर्गन्मानानुकूला च तस्य पिण्डस्य का गतिः । आकाशं गमयेत्पिण्डं जलस्थो दक्षिणामुखः । पितृणां स्थानमाकाश दक्षिणादिक् तथैव चेति । यत्तु देवलोक्तं - ततः पिण्डनिवृत्तः स्यात्पिण्डांस्तु तदनन्तरम् । ब्राह्मणोऽग्नि रजो गौर्वा भक्षयेदप्सु वा क्षिपेदिति । तत्पुत्रार्थित्वाभावविषयम् ॥ अत्र पित्रादि नामाज्ञाने तत्तन्नामस्थाने एतत्त इत्यस्यानन्तरं तत पितामह प्रपितामहेति शब्दाः क्रमेण पिण्डेषु प्रयोज्याः । सूत्रे उक्तत्वात् । एकस्य द्वयोर्वा नामाज्ञानेपि यथास्थानं ततादि शब्दप्रयोगोन्यत्र नामप्रयोगः । अत्र पित्रादीनां मध्ये एकस्य द्वयोर्वा जीवने तत्पिण्डकाले तत्पिण्डदानकाले पूर्वोक्तपिण्डदान मन्त्रेण स्वाहाकारांतेन जीवदुद्देशेनाग्नौ सव्येन पाणिना पिण्ड होमः । तत्र त्रयाणामपि जीवने पितृमातृ जीवने वा त्रयः पिण्डा होतव्याः । अथवा पिण्डदानरहितो होमांत एव पिण्डपितृयज्ञः । अनारम्भो वा पिण्डपितृयज्ञस्य । अन्ये तु न जीवन्तमति दद्यादिति श्रुतेः । पितरि तदादित्रिके वा जीवति त्रिभ्योऽपि होमः । न भूमौ पिण्डदानम् । पितरि जीवति त्रिभ्योपि होमः एव न भूमौ पिण्डदानम् । जीवत्पितामह प्रपितामहस्य पित्रे पिण्डं दत्वा द्वयं होमः । जीवत्प्रपितामहस्य आद्ययोः पिण्डौ प्रपितामहाय होमः । होमे च यज्ञोपवीतिता सर्वत्र इत्याद्याकरतो

ज्ञेयमित्युक्तम् । प्रयोगरत्ने पिण्डपितृयज्ञे । अति प्रणीतनाशे तस्मिन् होमपक्षे सर्वप्रायश्चित्तमेव न पुनरति प्रणयनं कार्याभावात् । तस्मिन् होमपक्षे पिंड प्रक्षेपपक्षे च सर्वप्रायश्चित्त कृत्वा पुनरतिप्रणयनम् । आपस्तंबानामति प्रणीतनाशे सर्वप्रायचित्तं हुत्वा पुनरतिप्रणयनं कुर्यात् । तस्य पुनरग्नौ प्रक्षेपविधानात् ।। पिण्डपितृयज्ञाकरणे प्रायश्चित्तम् ।। निर्णयसिन्धौ पाराशरमाधवे कात्यायनः । पितृयज्ञात्यये चैव वैश्वदेवात्ययेऽपि च ।। भोजने पतितान्नस्य चरुर्वैश्वानरो भवेदिति ।। चरुस्थालीपाकः अग्नये वैश्वानराय जुष्टं नीर्वपामीत्येवं रूपः । पितृयज्ञलोपे सप्तहोतारमिति बौधायनीय प्रायचित्त - सूत्रम् ।। इति पिण्डपितृज्ञप्रयोगः ।।

।। अथ पार्वणश्राद्ध प्रयोगः ।।

सचास्मत्कृतश्राद्धसागरे सप्रमाणः सविस्तर उक्तः । संक्षेपतस्त्वत्रोच्यते ।। अथ संक्षिप्त पर्वाण श्राद्धप्रयोगः ।। अथाश्वलायनगृह्यश्रित्य हेमाद्र्यनुसारेण सक्षिप्तपार्वण च श्राद्धप्रयोगः । श्राद्धकर्ता पूर्वेद्युः श्राद्धदिन ए ववा सव्येनैव प्राणायामत्रयं विधाय प्राचीनावीती देशकालौ संकीर्त्य अत्र वा प्रचीनावीती सव्यं जान्वाच्यास्मत्पितृ पितामह प्रपितामहानां अमुकशर्मणा ममुकगोत्राणां वसुरुद्रादित्यस्वरूपाणां सपत्नीकानामस्मन्मातामह मातुः पितामह मातुः प्रपितामहानाममुकशर्मणाममुकगोत्रा -णां सपत्नीकानां वसुरुद्रादित्य स्वरूपाणां सपिण्डं सदैवं दर्श श्राद्धमन्नेन हविषा पितृतृप्तिकामोऽहं श्वोद्यवा करिष्य इति संकल्प्य यज्ञोपवीत्युदङ्मुखो दक्षिणं जान्वाच्य प्राङ्मुखस्य विप्रस्य दक्षिणं जानुं स्पृष्ट्वाऽस्मत्पितृ पितामह प्रपिता-

महानमित्यादि पूर्ववदुक्त्वा सपत्नीकानां दर्शश्राद्धे विश्वे देवार्थं त्वया क्षणः करणीयः इति द्वावेकं वा निमन्त्र्य प्राचीनावीती दक्षिणाभिमुखः सव्यं जान्वाच्योदङ्मुखस्य विप्रस्य सव्यं जानुं स्पृष्ट्वास्मत्पितुरमुकशर्मणोऽमुकगोत्रस्य सपत्नीकस्य वसुरूपस्य दर्शश्राद्धे त्वया क्षणः करणीय इति पैत्रे क्षणः क्रियतां श्राद्धे क्षणः क्रियतां अमुकस्य स्थाने क्षणः क्रियतामित्येव यथा क्रेत्यादि यथालिंगं विप्रान्निमन्त्र्य ॐ तथेति क्षणस्य प्रत्युत्तरमग्निमभिमन्त्रणं द्वावेवं पुनः कर्ता प्राप्नोतु भवानित्युक्त्वा प्राप्नवानीति प्रत्युक्तः ततो अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः। भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा । इति विप्रान् श्रावयेदथ श्राद्धदिने कर्ताऽकृतदन्तधावनः सुस्नातः पुरुषसूक्तादि कृतमन्त्र जपो द्विराचम्य शिष्याद्याकारितान् कृतपच्छौचानाचांतान् ब्राह्मणान् प्रत्युत्थानेन सत्कृत्य पूर्वेद्युर्निमन्त्रणाद्यकरणपक्षेऽत्रवा सव्येनैव द्विराचम्य प्राणायाम त्रयं विधाय प्राचीनावीती तिथ्यादि संकीर्त्य पूर्ववदस्मत्पितॄणामित्यादि संकल्प्याचारान् समस्त संपदित्यादि पठन् प्रदक्षिणीकृत्य सम्प्रार्थ्याक्रोधनैरित्यादि उक्त्वा दर्शश्राद्धं कर्तुं ममाधिकारसम्पदस्त्विति भवन्तो ब्रुवन्तु इत्यस्तु श्राद्धाधिकारसम्पदित्यनुज्ञातः । स्वगृहमागतान् विप्रान् अपराह्णे स्वयं तिष्ठन् उभयत्रापि सव्येनैव देवपूर्वं भवतां स्वागतमिति पृथक् पृथक् एकैकं ब्राह्मणं ब्रूयात् सुस्वागतमिति प्रत्युक्तः सव्यापसव्याभ्यां देवे क्षणः क्रियतां पित्रादि नामोक्त्वा श्राद्धे क्षणः क्रियतामित्येवं द्वितीयं निमन्त्रणं कृत्वा । ततो गृहांगणे सव्येन पूर्वं देवार्थं चतुरस्रं प्रादेशमात्रमुदक्प्लवं विहित गन्ध-पुष्प प्रागग्रकुशद्वयं मण्डलमध्ये षडंगुलमन्तरं त्य-

त्वा प्राचीनावीती तद्दक्षिणतः पित्र्यं वर्तुलं वितस्तिमात्रं दक्षिणाप्लवं निहितगन्धपुष्प तिलदक्षिणाग्रकुशत्रयं गोमूत्रगोमयाभ्यां विधायोपवीती मण्डलसमीपे सदर्भ पीठयोः प्राङ्मुखौ द्विजावुपवेश्य स्वयमुदङ्मुखो वा प्रत्यङ्मुखो वा दक्षिणं जान्वाच्य आगच्छन्तु महाभागा विश्वेदेवा महाबलाः। ये अत्र विहिताः श्राद्धे सावधाना भवन्तु ते ॥ इति सम्प्रार्थ्य तत्पादयोर्यवकुश गन्धादियुक्तं जलमञ्जलिना पुरूरवार्द्रवसञ्ज्ञकविश्वेदेवाः इदं वः पाद्यं स्वाहा नमः इति प्रत्येकं क्षणक्रमेण देवतीर्थेन प्रक्षिप्य। शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः॥ इत्यृचा तत्पादावुपर्येव प्रक्षालयेत नाधः प्रक्षालन सग्रथिना पवित्रेणच॥ प्राचीनावीती दक्षिणमण्डल समीपे उदङ्मुखान् पित्र्य द्विजान् द्विजं वोपवेश्य स्वयं दक्षिणामुखः सव्यं जान्वाच्य तत्पादयोस्तिलकुशादियुक्तं जलमस्मत्पितृपितामह प्रपितामहा अमुकशर्माणोऽमुकगोत्रा वसुरुद्रादित्यस्वरूपा इदंवः पाद्यं स्वधानम इति अस्मत्पितरमुकशर्मन्नमुकगोत्र वसुरूप सपत्नीक इदं ते पाद्यं स्वधानम इति प्रत्येकं यथाक्रमं पितृतीर्थेन निषिच्य शंनइत्यृचेत्यादि पूर्ववदेवं पितामहादि मातामहादीनामपि। कर्ता मंडलार्चन पादत्रयप्रक्षालन पदार्थोपयुक्तं तिलकुशयव गन्धादि द्रव्यशेषांस्तत्तन्मण्डलोपरि सव्यापसव्य विभागेनैव निक्षिप्य धृतपवित्रं त्यक्त्वोपवीती स्वयंपादौ प्रक्षाल्य अन्ये पवित्रे धृत्वा दैविक मण्डलादुत्तरतो ब्राह्मणचरणक्षालनोदकाचमनोदकयोर्भूमौ संसर्गमकुर्वन् द्विराचम्य विप्रांश्च तत्र द्विराचमय्य। ब्राह्मणैः सह श्राद्धभूमिमागत्यापसव्येन श्राद्धसिद्धिरस्त्विति ब्राह्मणान् प्रत्युक्त्वा तैश्चास्तु श्राद्धसिद्धिरिति उक्ते तदुपवेशनार्थं प्रागुक्त श्वेत

कम्बलादीनि श्रीपर्णादि दारुमयानि प्रत्येकमुपरिस्थापितानि प्रागग्रदर्भद्वययुतानि दैवे पित्र्ये तु प्रत्येकं प्रत्येकमुपरिस्थापितदक्षिणाग्र कृत दर्भाग्राण्यासनान्युपकल्पयेत् ॥ इति श्री नारायणभट्ट कृते गृह्याग्निसागरे संक्षिप्तपार्वणश्राद्धप्रयोगे प्रथमः खण्डः ॥

अथ तेषु प्राङ्मुखानुदक् संस्थान दैविक ब्राह्मणान् उदङ्मुखान् प्राक् सम्स्थान् पित्र्य ब्राह्मणान् उदङ्मुखत्वालाभे दक्षिण वर्जितान्यदिङ्मुखान् यथाधिकारं सव्यापसव्याभ्यां वामहस्तेन तत्तदासनं धृत्वा दक्षिणेन तत्तद्विप्रदक्षिणहस्तं गृहीत्वा ॐ भूर्भुवः स्वः समाध्वमिति प्रत्येकमुक्त्वा यावन्मुखपाणिपादमार्द्रता न जहाति तावदवलम्बितमुपवेशयेत् । तैरप्योंं सुसमास्महे इति प्रत्युक्तस्तिलतैलेन घृतेन प्रशस्त स्नेहादिना वा प्रतिद्विजं दीपान् सव्यापसव्य विभागेनत्र संस्थाप्य यद्वैकं वा सव्येन । ब्राह्मणाश्च तत्प्रभृत्याश्राद्धसमाप्तेः पवित्रपाणयो मौनिनः प्रमादसम्भवमुच्छिष्टसंस्पर्शं वर्जयन्तो वर्तेरन् । प्रमादान्मौनलोपे प्रायश्चित्तं पूर्वोक्तं ज्ञेयम् । पूर्वोक्तलक्षणलक्षितातिथिरागतश्चेत् तमपि सव्येन ब्राह्मणपंक्तावुपवेशयेदथ शुचित्वातिशयार्थं पुण्डरीकाक्षस्मरण मात्रं पठेत् । अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा । यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः । ततोऽपसव्येन तद्विष्णोः परमं - ततम् । तद्विप्रासो - पदम् । तत्सवितुर्वरेण्यं - यात् ॥ इत्येतत्त्रयं जपित्वा । सव्येन श्री विष्णुस्मरणपूर्वकं प्राणायामत्रयं कृत्वा दक्षिणाग्रेषु दर्भेषु पित्र्यद्विजाभिमुखमुपविष्टः । सव्यं जान्वाच्य प्रणवपूर्वकमेव देशकालौ संकीर्त्य अपसव्येन अस्मत्पितृ - सपत्नीकानामेतदन्ते प्रक्रांतं श्राद्धं युष्मदनुज्ञया करिष्ये इत्युक्त्वा कुरुष्वेत्यनुज्ञातोऽत्रारम्भे मध्येऽवसाने चैतन्मन्त्रं देवताभ्यः

पितृभ्यश्च महायोगिभ्य एवच । नमः स्वाहायै स्वधायै नित्यमेव नमो नमः । इति त्रिवारं पठेत् । प्रागुक्तवदत्र नीवीबन्धः कर्तव्यः । ततोऽपहता असुरा रक्षांसि पिशाचा ये क्षयन्ति पृथि - वीमनु । अन्यत्रैतो गच्छन्तु यत्रैतेषां गतं मन इति सर्वतस्ति - लानपसव्येनैव विकीर्य । उदीरतामवर उत्परास उन्मध्यमाः पित - रः सोम्यासः । असुं य ईयुरवृका ऋतज्ञास्तेनो वन्तु पितरो हवेषु । इति सर्वतः प्रोक्षयेत् । तिलारक्षंत्वसुरतो दर्भा रक्षन्तु राक्षसात् । पंक्तिं वै श्रोत्रियो रक्षेदतिथिः सर्वरक्षक इति द्वार देशे कुशतिल प्रक्षेपः । ततः तरत्समन्दी धावतीति चतसृभिः पावमानीभिरभिमंत्रितजलेन पाकादि प्रोक्षयेत् । केचित्तु तद्वि- ष्णो र्गायत्र्याचेति । ततो दुष्टदृष्टिनिपातादि दूषितः पाकः पूतो भवत्विति संकीर्त्य अशेषं पाकं कुशपुष्पादींश्च संप्रो- क्षेन्नाप्रोक्षितवस्तु किंचित् स्पृशेत् ।। इति श्रीमन्नारायण भट्ट- कृते गृह्याग्निसागरे संक्षिप्त श्राद्धप्रयोगे द्वितीयः खण्डः ।।

अथ श्राद्धकाले गयां ध्यात्वा ध्यात्वा देवं जनार्दनम् । वस्वादींश्च पितॄन्ध्यात्वा ततः श्राद्धं प्रवर्तते इति जपित्वा । प्रवर्तयेति वाचयित्वा । संपादिताः पदार्थाः श्राद्धयोग्याः भवंत्विति भवन्तो ब्रुवन्तु इत्युक्त्वा श्राद्धयोग्या भवंत्विति प्रत्युक्ते । दैविकद्विजांतिकमुपवीत्युदङ्मुखउपविश्य । दक्षिणं जान्वाच्यांतर्जानुकरो द्विजहस्तयोरपोदत्वा तद्दक्षिणहस्त मुत्तानं निजवामहस्तेन धृत्वा दक्षिणेन जलयवसमन्वित दर्भा- ग्रद्वयमृज्वेवादाय पुरूरवार्द्रव संज्ञकानां विश्वेषां देवानां भूर्भुवःस्वरिदमासनं स्वाहा नम इत्युक्त्वा द्विजहस्ते तज्जल- मासिच्य कंबलाद्यासन दक्षिणभागस्योपरि देवतीर्थेन तत्सयव

दर्भाग्रद्वयं प्रक्षिपेत्तद्धस्ते । विप्रो धर्मोसि विशि राजा प्रतिष्ठित इति यजुरुच्चार्य स्वासनमिति ब्रूयात् । पुनरपो दत्वाऽऽसनं स्पृशन् अत्रास्यतामित्युक्त्वा धर्मोसि इति विप्रेणासनकुशान् गृह्णन् प्रत्युक्त्वा एवमन्यस्मिन् विप्रे प्रत्येकं पुनरपो दत्वा देवे क्षणः क्रियतामित्युक्त्वा निरंगुष्ठं द्विजहस्तं गृहीत्वा पूर्ववदेव वा निमंत्रयेदोंतथेति प्रत्युक्तः प्राप्नोतु भवान् इत्युक्त्वा प्राप्नवानीति प्रत्युक्तः एतदन्तमेव प्रतिविप्रमिदं तृतीयं निमंत्रणं। पुनर्हस्तेऽपो दत्वा प्रोक्षितायां भुवि प्रागग्रास्तीर्णेषु कुशेषूत्तानं पात्रद्वयमासादयेत् । तदुपरि द्विकुशं कूर्चमेकैकं निधाय तत्र सर्वं स्मृत्युक्तं शंनो देवीरित्यृचा प्रत्येकं मन्त्रावृत्याऽप आसिच्य यवोऽसि धान्यराजो वा वारुणो मधुसंयुतः । निर्णोदः सर्वपापानां पवित्रमृषिभिः स्मृतमिति प्रत्येकं मंत्रावृत्या यवानोप्य गंधादिभिरभ्यर्च्य देवपात्रे संपन्नं इत्यभिमृश्येत्युक्त्वा सुसंपन्नं इत्यनुज्ञातः सव्यं करं विप्रजानूनि विन्यस्योदङ्मुखः पुरूरवार्द्रवसंज्ञकान् विश्वान् देवान् भवत्स्वावाहयिष्य इत्ययं प्रश्नः पंक्तिमूर्धन्यमेकं सर्वान् वा प्रतिकार्य एवं पित्र्येप्युक्त्वाऽऽवाहयेत्यनुज्ञातो यवहस्तो विश्वे देवास आगत शृणुताम इमं हवम् । एदं बर्हिर्निषीदतेति प्रतिविप्र दक्षिणपादादियुग्म क्रमेण पादजान्वंसमूर्धान्तं देवार्चायां यवान्विकीर्य विश्वेदेवाः शृणुतेमं हवं मेये अन्तरिक्षे यउपद्यविष्ठ । ये अग्निजिह्वा उतवा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वमिति उपतिष्ठेन् । हेमाद्र्युक्ते वैश्वदेविकोत्पत्ति विशेष नामानन्दिज्ञेनात्राप्यागच्छंतु महा भागा इति चोपस्थाय तत्समीपे भूमौ शिष्टान् यवान् विकीर्य देवार्घ्यपात्रे संपत्तिरस्त्विति कृतांजलिर्देवविप्रान् पृच्छेदों अस्तु देवार्घ्यपात्रसंपत्तिरिति प्रत्युक्त

आस्तीर्णदर्भसहितमेकैकं पात्रमुद्धृत्य स्वाहार्घ्या इत्युक्त्वैकैकं विप्र पुरतः स्थापयेत् सन्त्वर्घ्या इत्युक्त्वोऽपो दत्वा पात्रस्थं कूर्चं प्रागग्रं विप्रकरे दत्वा कराभ्यां दक्षिणेन वा वामकरेण क्षीरदधि घृततिल तण्डुल सर्षपकुशाग्रपुष्पाण्येतत् द्रव्याष्टकयुतं प्रागेवसंभृत मर्घ्यपात्रमुद्धृत्य प्रागुवत प्रमाणोक्तेः या दिव्या आपः पृथिवी संबभूवुर्या अतरिक्ष्या उत पार्थिवीर्याः । हिरण्यवर्णा यज्ञियास्तान आपः शंस्योना भवन्तु । इति मंत्रमुक्त्वा पुरूरवार्द्रव संज्ञका विश्वेदेवा इदंवो अर्घ्यं स्वाहानम इति उक्त्वा तदुदकं देवतीर्थेन दत्वा । अस्त्वर्घ्यमित्युक्तः । एवं द्वितीयेपि । ततः प्रतिविप्रं प्रत्युपचारमपो दत्वा गंधद्वारां- श्रियमिति मंत्रमुक्त्वा पुरूरवार्द्रव संज्ञका विश्वेदेवा अयं वो गंधः स्वाहा नमम इत्यार्षप्रमाणोक्तेरेक वचनांतेन गंधशब्देनोक्त्वा सिक्तोदके विप्रकरे गंधं हस्तेनैव प्रदाय सुगन्ध इत्युक्तः एवमग्रेपि ततस्तैर्गंधैर्विगत पवित्रकरः कर्ता भालगले वक्षकुक्षि कक्षाद्यंगेषु लिपेत् । स्कंधादुपवीतमुत्तरीयंवा वतारयन् ब्राह्मणांश्चेत् परस्परमनुलेपन सपवित्रकरनिषेधनियमः । प्रशस्तं कुसुमाद्युपादाय ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः । अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥ आयनेते-- गृहा इमे ।। इति वा मंत्रमुक्त्वा प्रागुक्तवत् संबुध्या पुरूरवार्द्रव - इदंवः पुष्पमिति करे दत्वा सुपुष्पमित्युक्तः । पुनरपो गुग्गुलप्रभृति द्रव्यदाहात् प्रसूतिधूपं धूरसि धूर्वं धूर्वंतं इति मंत्रेण पुरूरवार्द्रव - देवाः अयंवोधूप इत्युक्त्वा पाददेशे धृत्वा क्रमाद् व्यजनादि वातेन विप्रघ्राणं प्रापयेन्न हस्तवातेन । सुधूप इत्युक्तः पुनरपः । उद्दीप्यस्व - दिशोदशेति मंत्रमुक्त्वा पुरूरवा – इदंवोज्योतिः इत्युक्त्वा मुखसमीपे प्रदर्शयेत् । सुदीप इत्युक्तः पुनरपो दत्वा युवं

वस्त्राणि- सचेथे। इत्युक्त्वा पुरूरवा - इदंव आच्छादनं स्वाहा: नमः स्वाच्छादनमित्युक्तः यज्ञोपवीतं दत्वा अर्चनं संपूर्णमस्त्विति देवानुक्त्वा अर्चनं संपूर्णमिति प्रत्युक्तः संकल्पसिद्धिरस्त्विति प्रत्युक्तो मंत्रहीनं क्रियाहीनं भक्तिहीनं द्विजोत्तम। श्राद्धंसंपूर्णतां यातु प्रसादाद्भवतां मम ॥ यस्यस्मृत्या - तमच्युतम्। देवताभ्यः पितृभ्यश्चेतित्रिवारं जपेत्। इति श्रीमन्नारायण भट्टकृते गृह्याग्निसागरे संक्षिप्त पार्वणश्राद्धप्रयोगे तृतीयः खण्डः ॥

ततः पवित्रे त्यक्त्वाऽन्ये धृत्वाचम्य युष्मदनुज्ञया पित्रर्चनं करिष्ये। कुरुष्वेति प्राचीनावीत्यन्वाचितसव्यजानूर्द्विजहस्तेषु प्रत्येकमपः तद्दक्षिणहस्तं वामेन धृत्वास्मत्पितुरमुकशर्मणोऽमुकगोत्रस्य सपत्नीकस्य वसुरूपस्येदमासनं स्वधानम इति स्वासनमेत्रमग्रेपि प्रत्येकं प्रत्युपचारं पुनः पुनरपोऽत्रास्यतां धर्मोसीति पुनरपोऽस्मत्पितुरित्यादि श्राद्धे क्षणः क्रियतामित्यादि प्राप्नवानीत्यंतं प्राग्वदिदं तृतीयं निमंत्रणम्। अथ प्रोक्षितायां भुवि द्विजपुरतो दक्षिणाग्रान् प्रतिवर्गं त्रीन्स्त्रीन् दर्भानास्तीर्य तेषूत्तानान्याग्नेयी संस्थानि प्रतिवर्गं त्रीणि त्रीणि पात्राण्यासाद्यैककस्मिन्पात्रे द्विगुणीकृत कुशत्रयकूर्चं दक्षिणाग्रं प्रत्येकं निधाय प्रत्येकं तूष्णीं पितृतीर्थेन जलमापूर्य शन्नोदेवीरिति सकृत्पठितेन स्वसूत्रोक्तेः सर्वाअपोऽनुमंत्र्य तिलोसिसोम-प्रीणयाहिनः स्वधानमः इति प्रतिपात्रं मंत्रावृत्या तिलानावपेत् नात्रोहः। पितृपात्रे गंधपुष्पादिभिरपः प्रपूर्य पित्रपात्रं संपन्नमित्यादि यथालिंगं सर्वाण्यभिमृश्य सुसंपन्नमिति प्रत्युक्तो हस्तेष्वपो दक्षिणामुखः सव्यंकरं विप्रजानुनि विन्यस्यास्मत्पितृ पितामह प्रपितामहानमुकशर्मणोऽमुकगोत्रान् वसुरुद्रादित्यस्वरूपान्सपत्नीकान् एवं मातामहादीन् भवत्स्वावाह-

यिष्ये इत्युक्तः विप्रैरावाहयेत्यनुज्ञातः उशंतस्त्वा नि - अत्तवे इत्यनूहेनैव प्रतिविप्रं शिरःप्रभृति वामांसादिक्रमेण शिरोजानु-पादयुग्मक्रमेण दक्षिणपादान्तं तिलान्विकीर्य आयन्तुतः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः। अस्मिन्यज्ञे स्वधयाम-दन्त्वधिब्रुवन्तु तेवंत्वस्मानिति पित्र्यविप्रान् सकृत्पठितेनोप-तिष्ठेत्। नात्रोहः। ततो हस्तस्थान् शिष्टांस्तिलान् विप्राग्रे भूमौ विकीर्य। ॐ पित्रर्घ्यपात्राणां संपत्तिरस्त्विति कृतांजलिः पितृविप्रान्पृच्छेत्। ॐ अस्तु पित्रर्घ्यपात्राणां संपत्तिरित्युक्तः प्रागुक्तेरुदकं ततो हस्तेष्वपोदत्वा तेष्वर्घ्यपात्रेष्वधोनिहित दर्भैः सह पाणिभ्यामैकैकमुध्दृत्य ॐ स्वधार्घ्या इति मंत्रेण पित्रादि-विप्राणां यथाक्रमं दक्षिणाग्रतया स्थापनं निवेदयेत्। संत्वर्घ्या इति मंत्रेणापो दत्वा पात्रस्थं कूर्चं दक्षिणाग्रं प्रत्येकं विप्रहस्ते दत्वोभाभ्यां कराभ्यां अष्टद्रव्ययुतमर्घ्यपात्रमुध्दृत्यार्घ्यपात्रोदकं सशेषं खड्गपात्रं चेत्तस्मिन् गृहीत्वा वामान्वारब्धेन खड्ग दक्षिणेनास्मत्सपत्नीकपितरिदंते अर्घ्यं स्वधा नमः एवं प्रतिविप्रं पितामहेदं ते अर्घ्यं इत्यादि यथालिंगमूह पठितैः प्रत्येकमर्घ्यं दत्वा प्रतिविप्रं यादिव्या - भवंत्विति मंत्रावृत्या सूत्रोक्ते वि-प्रहस्तात् स्रवन्तीरपोऽनुमंत्र्य विप्रपाणिष्वन्या अपो दद्यात्। तत्किंचिद्दूरे हस्तमात्रे दक्षिणाग्रान् दर्भान् संस्तीर्य तत्र तत्पा-त्राणि नीत्वा सादनस्थाने प्रथमपात्रेऽवशिष्टपात्रद्वयोदकमेकीकृत्य पुत्रकामश्चेन्मुखमनक्ति अथवार्घ्यस्थाने चैकीकृत्यमुखम-नक्ति उत्तर आस्तीर्णेषु कुशेषु कूर्चत्रयान्तर्हित न्यग्बिलमुत्तानं वा तृतीयेन पिहितं पितृभ्यः स्थानमसीत्यासाद्य गंधादिभिरभ्यर्च्य तत्पात्रं श्राद्धासमाप्तेर्न चालयेन्न संस्पृशेन्मातामहादीना मप्या-

दित आरभ्यैवमेवेति ।। इति श्री नारायणभट्टकृते गृह्याग्निसागरे संक्षिप्तपार्वणश्राद्धप्रयोगे चतुर्थः खण्डः ।।

अथ प्राचीनावीतीत्यपो दत्वाऽस्मत्पितृपितामह प्रपितामहा अमुकशर्माणोऽमुकगोत्राः सपत्नीका वसुरुद्रादित्यस्वरूपाः अयं वो गन्धः स्वधानमो नमभाःस्मत्पितरमुकशर्मन् अमुकगोत्र वसुरूपसपत्नीकायं ते गन्ध इत्यादिना दैकवचनांतेनैव गन्धशब्देन प्राग्वदनुलिंपेत् । पुनः पुनः प्रत्युपचारमपोदत्वाऽस्मत्पितरित्यादि संबुध्यैव यथालिंगमुक्त्वा पुष्पाद्याच्छादनान्तं तत्तन्मंत्रप्रतिवचन सहितं सर्वं स्वधानमो नममेतिशब्द सहितं पित्र्यधर्मेणैव प्राग्वत्कुर्यात् । तत्रापि पुष्पधूपदीपाच्छादन दानेषु गोत्रादि युक्तमेव नामोक्त्वा प्रतिविप्रं यज्ञोपवीतं दत्वा कृतांजलिः पितॄणामर्चनं संपूर्णमस्त्विति पित्र्यद्विजान् प्रतिवदेदस्त्वर्चनं संपूर्णमित्युक्तः संकल्पसिद्धिरस्त्वित्यादिकं प्राग्वदथोपवीत्याचम्य भूमिं संशोध्य भस्मादिरचित मण्डलै रन्योन्य व्यवधानं कुर्यात्। तत्र गोमयेन भस्मना वारिणा वा देवे प्रतिविप्रं चतुरस्रं प्राचीनावीती पित्र्ये वर्तुळमेवं मण्डलानि कृत्वा । तदुपरि यथाधर्मं सयवकुशेषु चोभयाद्यर्थं सौवर्णरौप्यादीनि पालाशादीनि वा भाजनानि मृन्मयवर्जितानि निधाय तेष्वपो निषिच्य हस्तेन निमृज्य प्रक्षाल्य पुनर्जलेन प्रक्षालयेदथ स्मृत्यर्थसारोक्तेः अपसव्य सव्यविभागेन पितृपूर्वं पिशंगभृष्टि — निबर्हय । रक्षाणो - वृधानं इति मंत्राभ्यां सर्वपात्राणि परितो भस्म क्षिप्त्वाचम्य । तथैव पितृपूर्वकं करशुद्धिं दत्वाचम्य करशुद्धिजलं पादप्रक्षालन मण्डले क्षिपेत् ॥ अथाग्नौ करणहोमः ।। तत्राहिताग्निः सर्वाधानी दक्षिणाग्नौ जुहुयात् । पित्र्यविप्रपाणौ वार्धाधानी त्वौपासन एव

द्विविधोऽपि पाणौवा जहुयात् । अन्यभावेपाणौवेति स्मृत्यर्थसारे । निरग्निस्तु पाणावेवाथैकाग्नेः पिण्डपितृयज्ञवत् व्यतिषंगेण वा प्रयोगः । तदात्र घृताक्तमन्नं घृतं वादाय सूत्रस्मृत्यर्थसारोक्ते-रुपवीत्यैवाग्नौ करिष्ये । कुरुष्वेत्युक्तोऽग्नि प्रदक्षिणं परिसमुह्य पर्युक्ष्याथ प्राचीनावीतीपित्र्यधर्मयुक्तस्तूष्णीमिध्मंपितृतीर्थेनाग्ना वाधाय मेक्षणे स्रुवेणाज्यमुपस्तीर्य चरोरुत्तरदेशस्य मध्यात्पूर्वा र्धाच्चांगुष्ठपर्वमात्रं मेक्षणेन द्विरवदाय पंचावत्ती चेत्पश्चार्धा दप्येवं त्रिरवदाय पात्रस्थमवत्तं च यथाक्रमं स्रुवेणाभिघार्य सोमाय पितृमते स्वधानमः इतिमंत्रेण हुत्वा सोमाय पितृमत इदं नममेति त्यक्त्वा पुनः प्राग्वद्दक्षिणभागस्थावदायाग्नये कव्यवाहनाय स्वधा नम इति मंत्रेण हुत्वाऽग्नये कव्यवाहनायेदं नममेति त्यक्त्वा प्राचीनावीत्यैवाग्नौ तूष्णीं मेक्षणमनुप्रहरेत् । पाणिहोमे तु हेमा-द्रिमते पाणिहोमं करिष्ये इत्युक्त्वा कुरुष्वेत्युक्तो विप्राग्निं प-रिसमुह्य पर्युक्ष्य प्राचीनावीती वामेन हस्तेन दर्भेण दक्षिणमुप-स्तीर्य दक्षिणेन द्विरवदायाभिघार्य पर्युक्षिते सदर्भविप्रपाणौ प्राग्व-द्धुत्वा परिसमुह्य पर्युक्ष्यैवं सर्वत्र जुहुयाद्विप्राश्च तदन्नं स्वस्व भाजने संस्थापयेयुः । प्रेतश्राद्धेषु पाणिहुतमन्नमग्नौ प्रक्षिपेयुरिति स्मृत्यर्थसारे । भोजनस्थानादन्यत्राचम्य यथास्थानमुपविशेयुः । अग्निहोमकेषु श्राद्धेष्वग्नौजुहुयात् पाणिहोमकेषुपाणौ । तत उप-वीती दैवपूर्वं आमासुपक्व - बृहत् । इति पात्राण्युपस्तीर्योभय-त्रापि सव्येनैव सतिल कुशहस्तः पत्नीवा नियुक्तः पुत्रादिः प्रशस्त हविष्यान्नपूर्वं देवपूर्वकमेव परिवेषणं कुर्यात् नापवित्रेण हस्तेन नायसेन नैहकस्तेन तृणपर्णाद्यंतर्धाने नदोषः । सर्वेषां पात्रेष्वन्ना-दिकं विषममकुर्वन्समसेव दद्यात् । तदेव सर्वमन्नं पिण्डार्थमुद्धृत्या-

न्नेषु परिविष्टेषु पाणिहोमपक्षेऽग्निहोमपक्षे वा हुतशेषं किंचित्पि-ण्डार्थं संस्थाप्य शेषं पितृभाजनेषु दद्यान्न देवभाजनेषु। इति श्रीनारायण भट्टकृते गृह्याग्निसागरे संक्षिप्त पार्वण श्राद्धप्रयोगे पंचमः खण्डः ।।

तत उपवीती देवपात्रेषु कुशयवान् क्षिप्त्वा दक्षिणं जान्वाच्य दैविक प्रथमविप्रपात्र गायत्र्याभ्युक्ष्योत्तानाभ्यां पाणिभ्यां पात्रमालभमानः। पृथिवीते पात्रं द्यौरपिधानं ब्राह्मणस्त्वामुखेऽमृतं जुहोमि ब्राह्मणानां त्वाविद्यावतां प्राणापानयोर्जुहोम्यक्षितमसि मामेक्षेष्ठा अमुत्रामुष्मिंल्लोके इत्यभिमंत्र्य अतो देवा-धार्मभिरित्यृचमुक्त्वा विष्णो हव्यं रक्षस्व इत्यनेन यजुषा न्युब्जेन दक्षिणकरेण न्युब्जमेव द्विजांगुष्ठं गृहीत्वा अनखमन्ने निवेश्य प्रदक्षिणमंगुष्ठं भ्रामयेत्ततो यवकुशान्वितमुदकं गृहीत्वा वामकरेण पात्रं स्पृशन् पुरूरवार्द्रवसंज्ञका विश्वेदेवा देवता इदमन्नं हव्यं अयं ब्राह्मण अहवनीयार्थे इयं भूमिर्गयायं भोक्ता गदाधरः इदमन्नं ब्रह्मेदं सुवर्णपात्रस्थितमक्षय्य वटच्छायेयं पुरूरवार्द्रवसंज्ञक विश्वेभ्यो देवेभ्य इदमन्नं सोदकुंभममृतरूपं परिविष्टं परिवेक्ष्यमाणं चातृप्तेः स्वाहा हव्यं नमो नमम। ॐ तत्सदिति तदुदकं देवतीर्थेन दैविकपात्रस्य वामे भूमावेव निक्षिपेदेवमग्रेऽपि। ततो दैविकविप्रान् युगपत्सकृत्पठितेनोपतिष्ठेत् -- येदेवासो - जुषध्वमिति। ततः पित्र्यधर्मयुक्तः पितृपात्रेषु सकुशतिलान् क्षिप्त्वा प्रथमपित्र्यपात्रं गायत्र्याभ्युक्ष्यालभ्य पृथिवीते - लोके इत्यभिमंत्र्य इदंविष्णु - सुरे। इत्यृचमुक्त्वा विष्णो कव्यं रक्षस्व इत्यनेन यजुषा प्रागुक्तवदंगुष्ठमन्ने निवेश्य अप्रदक्षिणमन्नोपरि भ्रामयेत्। द्विगुण भुग्नकुशत्रयसहितं सतिलं जलं दक्षिणेन गृहीत्वा

सव्येन पात्रनालभ्यास्मत्पिता अमुकशर्मा अमुकगोत्रः सपत्नीको वसु रूपो देवता इदमन्नं कव्यमयं ब्राह्मण - ब्रह्मेदं रजतपात्रमक्षय्य वटच्छायेय नरमत्पित्रेऽमुकशर्मणेऽमुकगोत्राय सपत्नीकाय वसुरूपा येदमन्नमृतरूपं परिविष्टं - स्वधा कव्यं नमो नमम। ॐ तत्सदिति तदुदकं सम्पन्नमुदकं पितृतीर्थेन पित्र्यपात्रस्य दक्षिण भूमावेव निक्षिपेदेवमग्रेऽपि। अथवास्मत्पितृ - महाः शर्मणोमुक गोत्राः सपत्नीका वसुरुद्रादित्यरूपा देवता : इदमन्नं कव्यं - छायेयमस्मपितृपितामहप्रपितामहेभ्यः शर्मभ्यो गोत्रेभ्यः सपत्नीकेभ्यो वसुरुद्रादित्येभ्यः इदमन्नं - चातृप्तेरित्यादि प्राग्वत्ततः सर्वान् पितृविप्रान् युगपत् सकृत्पठितेनोपतिष्ठेत्। ये चेह पितरो - जुषस्वेति नात्रोहोऽतिथिरागतश्चेत्तं देवधर्मवदर्चयेत् स्वेष्टदेवता रूपायान्नं त्यक्त्वा ये देवास इत्युपस्थायापसव्येन देवताभ्यः - नमो नमः। सप्तव्याधा - प्रसीदतु। इति जपित्वा सकुशाक्षतं जलं गृहीत्वा - एको विष्णु - गव्ययः। अन्नहीनं क्रियाहीनं मन्त्रहीनं च यद्भवेत्। तत्सर्वमच्छिद्रं जायतामिति विप्रान् संप्रार्थ्य विप्रैर्जायतां सर्वमच्छिद्रमित्युक्तः। ॐ तत्सद्ब्रह्मार्पणमस्तु येषामन्नमुद्दिष्टं तेषामक्षय्या तृप्तिरस्तु पितृस्वरूपी जनार्दन वासुदेवः प्रीयतामिति सकुशाक्षतमुदकं भूमौ विसृज्य नमस्कृत्य। ईशानविष्णु - मुक्तिहेतोः। गयायै नमः। गदाधराय नमः। पुंडरीकाक्षाय नमः। ततः उपवीती पितृपूर्वकमपोशनं दत्वा सप्रणव व्याहृतिकां गायत्रीं त्रिः सकृद्वा पठेत्। ॐ भूर्भुवः स्वः। तत्स - यात् इति मधुमतीः सकृदेव वदेत् - मधुवाता - भवन्तु नः। इति मधुमधुमध्विति त्रिवारं जपित्वा ॐ तत्सद्यथासुखं जुषध्वमिति विप्रान् ब्रूयात् विप्राश्च बलिदानवर्जं नित्यवद-

पोशनं कृत्वा वामहस्तेन पात्राणि धृत्वा प्राणाहुतिपूर्वकं मौनिन उक्तनियमाः सन्तो भुंजीरन् ।। इति श्रीमन्नारायण भट्टकृते गृह्याग्निसागरे संक्षिप्त पार्वण श्राद्धप्रयोगे षष्ठः खण्डः ।।

अथ यजमानः सव्येनैव प्रणव व्याहृतिकां गायत्रीमुक्त्वा भुंजानान्यथाशक्ति पितसूक्तानि श्रावयेत्ततो भोजनांते प्राचीनावीती तृप्ताः स्थेति विप्रान् पृष्ट्वा तृप्ताः स्मेति प्रत्युक्तो मधुवाता इति तृचं श्रावयित्वाऽक्षं नमीमदन्तेति च संपन्नमिति पृष्ट्वा सुसंपन्नमिति प्रत्युक्तः ततः पूर्वमन्नमनुद्धृतं चेत्तर्व-स्मादन्नात् किंचित्किंचित्पिंडार्थं तथा सर्वमन्नं विकिरार्थं चोद्धृत्यान्नशेषं किं क्रियतामिति शेषमन्नं द्विजेभ्यो निवेद्य तैरिष्टैः सहोपभुज्यतामिति प्रत्युक्तेऽन्नेंगीकृते वोच्छिष्ट भाग्भ्योन्नं दीयतामित्युक्त्वा विप्राश्च पात्रस्थं भुक्तावशिष्टं दैविकं दक्षिणभागे पैतृकं वामभागे बहिः कृत्य पात्रेषु भुक्तेषु उत्तरापोशनं पितृपूर्वकं विप्रकरेषु दद्यात् । ततो द्विजैर्नित्यवदापोशने कृते आचान्तेष्वनाचान्तेषु वा पिण्डान्निदध्याद्विप्राश्च शरावादौ मुखपूर्वं हस्तादीन् क्षालयेयुः न कांस्यताम्र पात्रयोस्ततो विप्राः कयानश्चित्र इति तृचं जपेयुः ।। इति श्रीनारायण भट्टकृते गृह्याग्निसागरे संक्षिप्तश्राद्धप्रयोगे सप्तमः खण्डः ।।

अथ पिण्डदानम् । तत्राग्नि होमपक्षे अग्निसमिपे पाणिहोमपक्षे द्विजोच्छिष्टान्तिके उत्तरतः प्रसारित भुजांतरमात्रेऽरत्निमात्रे वा गोमयेनोपलिप्ते देशे प्राचीनावीत्येव दक्षिणामुखो न्वाचितसव्यजानुः पिण्डपितृयज्ञवत् स्वसूत्रोक्तैः सव्येनैव वा पितृतृप्त्यर्थं पिण्डदानं करिष्ये । इति विप्राननुज्ञाप्य कुरुष्वेत्यनुज्ञातो बह्वृचानां करेणैके नान्येषां कराभ्यां स्फ्येन खादिरेण काष्ठेन

दर्भमूलेन वा अपहता असुरा रक्षांसि वेदिषद इति मन्त्रं प्रति लेखां पठन् हेमाद्रिमते पारिजातोक्तेश्चाग्न्ययाग्रकं प्रत्यगपवर्गं लेखाद्वयमुल्लिख्य प्रत्येकमद्भिरभ्युक्ष्य तत्र दक्षिणाग्रं बर्हिर्द्वय-मास्तीर्याग्नौकरणशेषयुक्तेन पाणिहोमशेषयुक्तेन वा मधुसर्पिस्तिल-मिश्रितेन सार्ववर्णिकेनान्नेनोक्तप्रमाणकं पिण्डषट्कं कृत्वा पूर्व रेखायां शुंधंतां पितरः सपत्नीकाः शुंधन्तां पितामहाः सपत्नीकाः शुंधन्तां प्रपितामहाः सपत्नीकाः इति त्रिभिर्मंत्रैः त्रिषु पिण्ड स्थानेषु पितृतीर्थेन तिलोदकं निनीयैवमेव पश्चिमरेखायां शुंधंतां मातामहाः सपत्नीकाः शुंधंतां मातुः पितामहाः सपत्नीकाः शुंधंतां मातुः प्रपितामहाः सपत्नीकाः इति त्रिभिर्यथाक्रमं रेखयोः परा-चीनपाणिः पितृतीर्थेन पित्रादिभ्यो मातामहादिभ्यश्च पिण्डान् दद्यात् एतत्ते अस्मत् पितरमुकशर्मन् अमुकगोत्र सपत्नीक वसु रूप ये च त्वामत्रानु अस्मत्पित्रेऽमुकशर्मणे अमुकगोत्राय सपत्नी-काय वसुरूपायायं पिण्डः स्वध नमइति । एतत्ते अन्नं स्वधा – नमइति चैवमग्रेपि दद्यात् । अस्मत्पितामह – पितामहाय – प्र-पितामह – प्रपितामहाय । मातामह – मातामहाय । मातुः पि-तामहाय – मातुः प्रपितामहाय – स्वधानम इत्यन्ते सर्वत्र गया-यां रुद्रपदे दत्तमस्तु इत्युक्त्वा लेपभाक् तृप्तये हस्तलेपं पिण्डद-र्भमूलेषु निमृज्याथात्र पितरो मादयध्वं यथाभागमावृषायध्वमि-ति सर्वान् पिण्डाननूहेन सकृदेवानुमंत्र्य सव्यपार्श्वेनोदगावृत्य यथाशक्ति प्राणान्नियम्यासित्वाऽभिपर्यावृत्यामीमदन्त पितरो यथाभागमावृषायिषतेति पिण्डाननूहेन सकृदेवानुमंत्र्योपवीती पिण्डशेषमवघ्राय हस्त धृतदर्भास्त्यक्त्वा अन्यान्धृत्वाऽचम्य प्राचीनावीती पूर्ववच्छुंधंतामित्यादिभिर्जलं निनीयास्मत्पितर-

मुकशर्मन् अमुकगोत्र वसुरूपसपत्नीकाभ्यंक्ष्वेति यथालिंगं मंत्रावृत्त्या पिण्डेष्वभ्यजने तैलं घृतं वा दर्भेण दत्वा अमुकेत्यादि तथैव अंक्ष्वेति मंत्रावृत्त्यांजनं दत्वा एतद्वः पितरो वासोमानोऽतोन्यत् पितरो युंग्ध्वमित्यनूहेन सकृत्पठितेन पिण्डेषु वास एव दद्यात् प्रतिपिण्डं वासो वा। ततः कशिपूपबर्हणे निवेद्य अस्मत्पितृभ्यः पिण्डेभ्यो वेति चतुर्थ्या विभक्त्याऽक्षतगंध पुष्प धूप दीपसार्ववर्णिकान्न नैवेद्य तांबूल दक्षिणा सर्वभोगांश्च प्रतिपिण्डं सिंधूक्संदद्यात् । अत्र नीवीं विस्रस्याग्नेयाभिमुखः पिण्डानुपतिष्ठेत एनैर्मंत्रैः ।। नमो वः पितरइषे नमो वः पितर उर्जे नमो वः पितरः शुष्माय नमो वः पितरो घोराय नमो वः पितरो जीवाय नमो वः पितरो रसाय ।। स्वधावः पितरो नमो वः पितरो नम एता युष्माकं पितर इमा अस्माकं जीवावो जीवन्त इह सन्तः स्याम ।। मनोन्वाहुवामह इति तृचेन अनुमंत्र्याथ पिण्डानाग्नेयाभिमुखमुत्तानेन हस्तेन पितृशब्दानूहेन युगपत्प्रवाहयेत् परेतन पितरः सोम्यासो गंभीरेभिः पथिभिः पूर्विणेभिः ।। दत्वा यास्मभ्यं द्रविणेह भद्रं रयिं चनः सर्ववीरं नियच्छतेति ॥ इति श्रीनारायण भट्टकृते गृह्याग्निसागरे संक्षिप्त पार्वण श्राद्धप्रयोगे अष्टमः खण्डः ।।

ततो दक्षिणाग्नि होमपक्षे तमेव प्रत्येयात् । अग्ने तमद्याश्वं नस्तोमैः क्रतुं न भद्रं हृदिस्पृशम् । ऋध्यामात ओहैरित्यय गार्हपत्यं प्रत्येयात् । यदतरिक्षं पृथिवी मुतद्यां यन्मातरं पितरं वाजिहिंसिम । अग्निर्मातस्मादेनसो गार्हपत्यः प्रमुंचतु दुरिता यानि चकृम करोतु मामनेहसम् इति ।। अथौपासनाग्नि होमपक्षे त्वौपासनमग्ने तमद्येति गत्वा यदंतरिक्षमिति गार्हपत्यपदरहितं

जपित्वा । पाणिहोमेत्वग्ने तमद्यादिकं मंत्रद्वयं नास्त्येव । ततो वीरंमे दत्त पितर इत्यनूहेन मध्यमं पितामह पिण्डमादाय मातुः पितामह पिण्डमप्यनेनैवादाय आधत्तपितरो गर्भं कुमारं पुष्कर स्रजम् । यथा यमरपा असदिति सकृत्पठितेनैव मंत्रेण पिण्डद्वयं पत्नीं प्राशयेद्यं मंत्रः पत्न्या एव । पत्न्यनेकत्वे गुर्विण्यादित्वेवा पूर्वोक्तमनुसंधेयम् ।। अथ पिण्डानुद्वासयिष्ये इत्युक्त्वोद्वासये-त्यनुज्ञातः इतरान्पिण्डान् अप्स्वति प्रणीतादिके वा क्षिपेत् । अथ द्विजान्पित्र्यपूर्वमाचमय्यापसव्येन विकिरं दद्यात् । अथा चान्नेषु पिण्डदानपक्षे पिण्डोद्वासनानन्तरमेव विकिरं दद्यात् ।। तत्रापवीती वैश्वदेविकद्विजसन्निधौ सयवकुशान्निधाय विकिरार्थमेकदेशमन्नं सयवजलं हस्तेनादाय तद्विकिरेत् । असोमपाश्च ये देवा यज्ञभाग विवर्जिताः । तेषामन्नं प्रदास्यामि विकिरं वैश्वदेविकम् इति ।। प्राचीनावीती पित्र्यसन्निधौ सतिलकुशेषु पितृतीर्थेनाव शिष्टमन्नं सतिलजलं विकिरेत् – अग्निदग्धाऽनग्निदग्धा जीवा जाताः कुलेमम। भूमौदत्तेन तृप्यंतु तृप्ता यांतु परां गतिमिति ।। उपवीती द्विराचम्य हरिं स्मरेत् । ततो देवद्विज हस्तेष्वपो दत्वा गंधयवकुशांश्च दत्वा ताभ्यां भूमौ तेषु निरस्तेषु पुनरपो दर्भानाशीरर्थमक्षतांश्च दत्वा प्राचीनावीती पित्र्यादि द्विजेष्वेवं कृत्वो पवीत्यमुकगोत्रोऽमुकशर्माहमभिवादये इति द्विजानभिवाद्यास्मद्गोत्रं वर्धतामिति याचयित्वा स्वस्ति वर्धतां ते गोत्रमिति प्रत्युक्तो आशिषो गृहीत्वा दत्ताक्षतान् मूर्ध्नि धृत्वा स्वयमेव शिष्यादिभिर्वोच्छिष्टभाजनानि चालयित्वाचामेत् । सव्येनैव देवपित्र्य हस्तेषु यवोदकं तिलोदकं च दत्वा देवेभ्यः स्वस्तीति ब्रूत पित्रादिभ्यः स्वस्तीति ब्रूत इति यथाक्रमं यथालिंगमुक्त्वा

विप्रैः स्वस्तीति प्रत्युक्ते पुरूरवार्द्रवसंज्ञकानां विश्वेषां देवानां यद्दत्तं श्राद्धं तदक्षय्यमस्त्विति ब्रूतेति च हस्तयोः सयवमुदकं दत्वाऽक्षय्यमस्त्विति प्रत्युक्ते प्राचीनावीती अस्मत्पितृ पितामह प्रपितामहानां सपत्नीकानां मातामह मातुः पितामह मातुः प्रपितामहानां सपत्नीकानां यद्दत्तं श्राद्धमक्षय्यमस्त्विति ब्रूतेति तिलानपश्च दत्वाऽक्षय्यमस्त्विति प्रत्युक्तेऽर्घ्यपात्रं प्रथममुत्तानं कृत्वार्घ्यपवित्राणि विस्रस्यातः परं सर्वमुपवीत्येवकुर्यात् । दैवपित्र्यद्विजेभ्यः सकर्पूरतांबूलं दत्वा पितृपूर्वकं दक्षिणां दद्यात् अमुकगोत्रोऽमुकशर्माहमित्युक्त्वा यथानामगोत्र सपत्नीकास्मत्पितृ स्थानोपविष्ट ब्राह्मणाय श्राद्धसाद्गुण्यार्थं रजतदक्षिणां प्रतिपादयामीत्येवमग्रेपि यथालिंगं दक्षिणां दत्वा पुरूरवार्द्रवसंज्ञक विश्वेदेव स्थानोपविष्ट ब्राह्मणाय श्राद्धसद्गुण्यार्थं सुवर्णं दक्षिणां प्रतिपादयामीत्यशक्तौ यज्ञोपवीतं वा दत्वा दक्षिणाः पांत्वित्युक्त्वा पांतु दक्षिणा इति प्रत्युक्ते स्वधां वाचयिष्ये इति पृष्ट्वा वाच्यतामिति प्रत्युक्तेऽत्रगोत्रादि सहितमेवास्मत्पितृ पितामह प्रपितामहेभ्यो, मातामह मातुः पितामह मातुः प्रपितामहेभ्यः सपत्नीकेभ्यः स्वधोच्यतामियुक्त्वा ॐ अस्तु स्वधेति प्रत्युक्ते पिण्डोपरि पिण्डसमीपे वा जलं निषिच्य स्वधासंपद्यन्तामित्युक्त्वा रुपंद्यन्तास्वधेति प्रत्युक्ते दैविकान्प्रति विश्वेदेवाः प्रीयन्तामित्युक्त्वा प्रीयंतां विश्वेदेवाः इति प्रत्युक्ते पित्र्यान्प्रति पितरः प्रीयन्तामित्युक्त्वा प्रीयन्तां पितर इति सर्वैः शोभनं हविरिति च प्रत्युक्ते वाजेवाजेवत - देवयानैरित्युक्त्वा उत्तिष्ठन्तु पितरो विश्वेदेवैः सहेति युगपद्व्युत्क्रमेण विप्रान् स्पृशन् पितृपूर्वं विसर्जयेत् । अत्र वा ब्राह्मणाः कव्यानश्चित्र इति तृचं जपेयुः । ततः कर्ता

पादप्रक्षाळनदेशे द्विजानुपवेश्य आमावाजस्य प्रसवो जगम्यादा-द्यावापृथिवी विश्वशंभू । आमागंतां पितरा मातरा चामासोमो अमृतत्वाय गम्या इति प्रदक्षिणीकृत्य हस्तेष्वक्षत पुष्पादि दत्वा तानभिमुखोऽस्मदाख्यातोपेतौ मंत्रौ पठेत् । दातारो नोभि वर्धंतां वेदाः सन्ततिरेव नः । श्रद्धाचनो माव्यगमद्बहुदेयं च नो-स्तु ।। अन्नंचनो बहु भवेदतिथींश्च लभेमहि । याचितारश्च नः सन्तु मा च याचिष्म कंचन इत्युक्ते विप्राश्च युष्मन्मध्यमपुरुषो पेतावेतावेव मंत्रौ पठन् प्रत्युत्तमेवं ब्रूयुः ।। दातारो वोऽभिव र्धंतां वेदाः सन्ततिरेव वः । श्रद्धाचवो माव्यगमद्बहुदेयं च वो-स्तु ।। अन्नं च वो बहु भवेदतिथींश्च लभध्वम् । याचितारश्च वः सन्तु माचयाचिढ्वं कञ्चन इति ।। ततः कर्ता स्वादुषंसदः - ईशतेत्युक्त्वा ततो विप्रैः इहैवस्तं मावियौष्टं - ऋक् ।। अयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च । प्रयच्छंति तथाराज्यं नृणां प्रीताः पितामहाः ।। प्रीतास्तुभ्यं पितामहाः । एताः सत्या आशिषः सन्तु । इति प्रत्युक्ते । दत्ताक्षत पुष्पाणि शिरसि धृत्वा मंत्राभ्यां पादाभ्यंगादिना विप्रान् परितोष्य प्रणिपत्य प्रसाद-येत् । अद्य मे सफलं जन्म भवत्पादाब्ज वन्दनात् अद्य मे। वंशजाः सर्वे याता वोऽनुग्रहाद्दिवम् ।। पत्रशाकादि दानेन क्लेशिता यूय-मीदृशाः । तत्क्लेशजातं चित्ते तु विस्मृत्य क्षन्तुमर्हथ ।। मंत्रहीनं क्रियाहीनं भक्तिहीनं द्विजोत्तमाः । श्राद्धं संपूर्णतां यातु प्रसादा-द्भवतां मम ।। इत्युक्त्वा सर्वं संपूर्णमस्त्विति वाचयित्वा विष्णुं स्मृत्वा क्षम्यतामित्युक्त्वाऽष्टौपदानि बन्धुवर्ग भार्या समन्वितोऽनुव्रज्य पूर्वसंकल्पितमासनालंकारादिकं तस्मिन् काले दत्वा प्रदक्षिणीकृत्य गृहमागत्य दीपं पाणिना निवार्य पवित्र

विसृज्य पादौ प्रक्षाल्य द्विराचम्योच्छिष्टपात्रं द्वासनं कारयित्वा शुद्धदेशे प्रक्षिप्यागारं गोमयेनोपलिप्यानाहिताग्निरत्रैव वा श्राद्धशेषेण पाकान्तरेण वा वैश्वदेवादिकं निर्वर्त्य अत्र नित्य श्राद्धस्य प्रसंग सिद्धिस्तत इष्टैः सह श्राद्धशेषं बलिदानादि नित्य धर्मयुक्तं भुंजीत निमंत्रणाहे एतद्रात्रौ च ब्रह्मचारी भूत्वोक्त नियमयुक्त एवैतदहोरात्रमति वाहयेत् । अनुपनीत स्त्रीशूद्राः श्राद्धमृत्विजाकारयेयुः ।। स्वयं वाऽमंत्रकं नामगोत्राभ्यां कुर्युः देवेभ्यो नमः पितृभ्यः स्वधा नम इति मत्राभ्यां वा कुर्युः ।। पितरो यत्र पूज्यंते तत्र मातामहा अपि इति ।। इति श्रीमन्नारायणभट्ट कृते गृह्याग्निसागरे पार्वणश्राद्धप्रयोगे नवम खण्डः ।।

अथ पिण्डपितृयज्ञ व्यतिषंगेण संक्षिप्त पार्वणश्राद्धप्रयोगः ।। अत्रैवं कारिका ।। कुर्वीत पार्वणश्राद्धं दर्शेतदभिधीयते । कामयोगेन वान्यास्मां तिथावित्यब्रुवन् ।। १ ।। ब्राह्मणान्वेदसंपन्नान् दान्तान्छान्तानलोलुपान् ।। अक्रोधनानरोगांश्च पाखण्डकुलनिःस्पृहान् ।। २ ।। विहितानामनुष्ठातॄन् निषिद्धानां च वर्जकान् ।। एवं भूत द्विजालाभे सयेकेन गुणेन वा ।। ३ ।। युक्तान्निमंत्रयीताहार्न् असद्गुण विवर्जितान् ।। शुचीन्निमंत्र्य दैवे द्वौ त्रीन्विप्रान् पितृकर्मणि ।। ४ ।। दैवे पित्र्येऽथवैकैकं सपिण्डीकरणं विना ।। सायमौपासन हुत्वासायं भुक्तवतो द्विजान् ।। ५ ।। उपगम्य स्वयं शिष्यः सुतो वा श्रद्धयान्वितः ।। श्राद्धं श्वो भविता तत्र भवद्भिर्दीयतां क्षणः ।। ६ ।। एवं निमंत्र्य नियतो मनो वाक्काय कर्मभिः ।। भोक्तुर्भोजयितुश्चैव ब्रह्मचर्यमतः परम् ।। ७ ।। कृत्वेध्माधान पर्यंतं पितृयज्ञमथ द्विजान् ।। स्नातांश्च कृत पच्छौचानाचांतानुपवेशयेत् ।। ८ ।।

द्विराचामंति ते विप्राः कर्त्रा क्षालयितांघ्रयः ।। द्वौ देवै प्राङ्-मुखौ पित्र्ये त्रीन्विप्रानुदगाननान् ।। ९ ।। ध्यायन्ममैते पितर इति तानुपवेशयेत् ।। अर्घयित्वोपविष्टौ तौ दैत्रे स्मृत्युक्त मार्गतः ।। १० । ये पक्षाः कथिताः पिण्डयज्ञे जीवमृतान्प्रति ।। श्राद्धेऽपि वेदितव्यास्ते पक्षा इत्याह वृत्तिकृत् ।। ११ ।। प्राचीनावीत्यपो दद्यात् पितृकर्माप्रदक्षिणम् ।। दर्भान्द्विगुणभुग्नांस्तु दत्वैषा मासनेष्वथ ।। १२ ।। अपो दत्वाथ दर्भेषु पात्राण्यासादयेत्क्रमात् ।। तैजसेऽश्ममये पात्रे मृन्मयेंतर्हिते कुशैः ।। १३ ।। एकद्रव्येषु चाग्नेयी दिक्संस्थेषु च तेष्वथ ।। निषिच्यापोनुमंत्र्यर्चा शन्नो देवीरभिष्टये ।। १४ ।। अनुमंत्रः सकृत्कार्यः तिलोसीत्या वपेत्तिलान् ।। आवृत्तिः प्रतिपात्रं स्यान्मंत्रस्योहस्तु नेष्यते ।। १५ ।। गंधपुष्पाणि चैतेषु पात्रेषु प्रक्षिपेदथ ।। स्वधार्घ्या इत्यपोघ्र्यास्ता उपावीती निवेदयेत् ।। १६ ।। अन्या अपः प्रदातव्या विप्रशाणिष्वतः परम् ।। अर्घ्यं सशेषमादाय दक्षिणेनतु पाणिना ।। १७ ।। सव्यहस्तगृहीतेन निनयेत्पितृतीर्थतः ।। त्रिभिः पितरिदं तेऽर्घ्यमिति पाणिष्वनुक्रमात् ।। १८ ।। दत्वा दत्वा निवीतास्ता याद्दिव्यार्चा निमंत्र्यतु ।। पितृपात्रे प्रसिच्यार्घ्यं शेषं पात्रद्वये स्थितम् ।। १९ ।। अनक्ति पुत्रकामस्तं मुखमेकीकृते र्जलैः ।। न्यग्बिलं पितृपात्रं स्यादासमाप्ते तु कर्मणः ।। २० ।। उत्तानं वा तृतीयेन पिहितं तन्नचालयेत् ।। प्राचीनावीत्यथेदानीं गंध माल्यं सधूपकम् ।। २१ ।। दीपं वस्त्रं यथाशक्ति देयं वार्यंतरान्तरा ।। पितृयज्ञचरोरन्नमुध्दृत्याभ्यज्य सर्पिषा ।। २२ ।। अग्नौ करिष्ये तान् पृष्ट्वा तैरुक्तः क्रियतामिति ।। मेक्षणानु प्रहृत्यंतं पितृयज्ञं करोत्यथ ।। २३ ।। अन्नेषु परिविष्टेषु हुतशिष्टं

ददात्यथ ।। उद्दिश्यचान्नं विप्रेभ्यः पितृभ्यः श्रद्धयान्वितः ।। २४।। भुंजानान्छ्रावयेद्विप्रान् राक्षोघ्नान् पितृलिंगकान् ।। पुराणानि पवित्राणि ऋषिगीतां पितृस्तुतिम् ।। २५ ।। अन्नं भोजनपर्याप्तं देयं किंचित्ततोऽधिकम् ।। तृप्तेषु श्रावयेत्तिस्रो मधुवाता ऋतायते ।। २६ ।। अक्षन्निति च तान्विप्रान्संपन्नमिति पृच्छति ।। ते सुसंपन्नमित्येवं प्रतिब्रूयुरतःपरम् ।।२७।। यद्यद्भुक्तं ततः किंचित्पिण्डार्थं चरुमुद्धरेत् ।। पितृयज्ञचरोरन्नमुद्धृतं प्रक्षिपेदथ ।। २८ ।। अन्नं प्रकिरणार्थं च सर्वस्यादन्नमुद्धरेत् ।। ब्राह्मणेभ्यस्ततः शिष्टं सर्वमन्नं निवेदयेत् ।। २९ ।। तेऽपि स्वीकुर्युरिष्टं चेदनुजानन्ति वा पुनः ।। पिण्डदानमनाचांतेष्वाचान्तेष्वथवा भवेत् ।। ३० ।। अंभो निनयनाद्यंतं पितृयज्ञं समापयेत् ।। अन्नं प्रकिरणार्थं यत्तदानीयजलप्लुतम् ।। ३१ ।। आचान्तानां समीपेषुत्वग्रतः प्रकिरेद्भुवि ।। उत्तानं प्रथमं पात्रं कृत्वा यज्ञोपवीत्यथ ।। ३२ ।। दत्वा च दक्षिणां शक्त्या विसृजेदों स्वधोच्यताम् ।। ॐ स्वधेति प्रति ब्रूयुर्याचतेमान्वरान्पितृन् ।। ३३ ।। दक्षिणां दिशमाकांक्षन्नियतो वाग्यतः शुचिः ।। दातारो नोभिवर्धंतां वेदाः सन्ततिरेव नः ।। ३४।। श्रद्धाच नो माव्यगमद्बहुदेयं च नोऽस्त्विति ।। ब्रह्मचारी भवेत्तस्यां रजन्यां ब्राह्मणैः सह ।। ३५ ।। इति पार्वण श्राद्धम् ।।

तत्र योऽनाहिताग्निरौपासनाग्निमान्मृतपितृकः स पार्वणश्राद्धं पिण्डपितृयज्ञं च व्यतिषंगेण कुर्यात् ।। व्यतिषंगो नामद्वयोः कर्मणोरविच्छिद्य सहानुष्ठानात्मकंस्तत्र विशेषः । तत्रामावास्यायामपराह्णे स्नातः सपवित्र आचम्य प्राणानयम्य एवं गुणविशेषण-तिथौ प्राचीनावीती अस्मत्पितृ पितामह प्रपितामहानां अमुकशर्मणाममुकगोत्राणां सपत्नीकानां वसुरुद्रादित्य स्वरूपाणां

अस्मन्मातामह मातुः पितामह मातुः प्रपितामहानां अमुकशर्मणा समुकगोत्राणां सपत्नीकानां वसुरुद्रादित्यस्वरूपाणां पार्वणश्राद्धं पिण्डपितृयज्ञं च व्यतिषंगेण करिष्ये इति संकल्प्याग्नेयाभिमुखोऽग्निं ध्यात्वा ततः समस्त संपदित्यादिभिः प्रदक्षिणादि श्राद्दे क्षणः कर्तव्यः इत्यंतं यथालिंगं कृत्वा विप्रान्संनिवेश्योपवीत्यग्नि परिसमूह्याग्नेयाग्रकैर्दर्भैः परिस्तीर्येत्यादि पूर्वोक्तवदिध्माधानांतं अविकृतं पिण्डपितृयज्ञं कृत्वा ततो विप्रपादप्रक्षालनादि भोजन पात्रं परितो भस्मप्रक्षेप करशुध्यंतं कृत्वा पिण्डपितृयज्ञचरोरन्न मुद्धृत्याभ्यज्य सर्पिषाऽग्नौ करिष्य इति विप्रान् पृष्ट्वा क्रियता मिति प्रत्युक्तो मेक्षणानुप्रहृत्यंतं पिण्डपितृयज्ञं कृत्वा पात्रेऽव्वन्नं परिविष्यान्नेषु परिविष्टेषु हुतशेषं दत्वा गायत्र्याभ्युक्ष्य पृथिवी ते पात्रमित्यादि श्राद्धं संपन्नमित्यंतं कृत्वा सर्वस्मादन्नात् किंचित्किंचित् स्थालीपाकाच्च पिण्डार्थं सर्वस्मादन्नात् विकिरार्थं पृथगुद्धृत्य शेषमन्नं किंक्रियतामिष्टैः सहोपभुज्यतां प्राचीनावीत्येव शुंधंतां पितर इत्यादि ततः शुंधंतां मातामहा इत्यादि पिण्डपितृयज्ञ वत्पात्राण्युत्सृज्यावशिष्टं तृणेन सहेत्यंते परिस्तरणानि विसृज्याग्निमलंकृत्यैवं पितृयज्ञं समापयेत् ॥ ब्राह्मणानाचमय्य सर्वस्मादन्नाद्विकिरदानाद्यासीमांतमनुव्रजेदित्यंतं सर्वं पार्वणश्राद्धं समापयेदिति पिण्डपितृयज्ञ व्यतिषिक्त पार्वणश्राद्धप्रयोगः ॥

अथाहिताग्निस्तु सर्वाधान्यर्धाधानी वा संपूर्णे दर्शे श्राद्धदिन एव श्राद्धाहात्पूर्वं खण्डदर्शे परेद्युरिष्ट्यनंतरं दक्षिणाग्नावेव पिण्डपितृयज्ञं कुर्यात्। ततः श्राद्धदिन एव सायाह्नेऽपि पार्वण श्राद्धं पृथगेव कुर्यान्न तत्र सायाह्ने श्राद्धनिषेधः पिण्डपितृयज्ञ करणदिने सायाह्नेपि पार्वणमनुज्ञायत इति स्मृत्यर्थसारे श्राद्ध-

कालविधि थालोक्तेः ।। आहिताग्निस्तु पिण्डपितृयज्ञं समाप्य ततः पार्वणं करोति पितृयज्ञं तु निर्वर्त्येति मनुः ।। तत्र होमो ब्राह्मणसमीपे भुक्तशेषमात्रेण पिण्डदानं काम्यंचेत् पाणिहोमो भुक्तशेषेण पिण्डदानं चास्त्येव मासि श्राद्धस्य पार्वणस्य चैककालत्वादन्यतरेणैवालमित्युक्तं । तत्र मासिश्राद्धं कृतवांश्चेत्पर्वणि केवलं पिण्डपितृयज्ञः कार्य एव काम्यश्राद्धं कृतं चेत्तेनैवालम् । नपुनर्मासि श्राद्ध पार्वणश्राद्धे कार्ये कामश्रुतिस्तुति तिथिविशेष मपेक्ष्य कृतार्थान् पुनरावर्तयितुं शक्नोति अग्निहोत्र द्रव्यवदिति वृत्तिः । आहिताग्नेरनाहिताग्नेरन्येषांपार्वणश्राद्धादिसर्वश्राद्धप्रयोगः सप्रमाणः सविस्तरोऽस्मत्कृत श्राद्धसागरे उक्तत्वान्नात्र पुनर्ग्रंथविस्तरभयादुक्तः ।।

।। अथाष्टका श्राद्धप्रयोगः ।।

अत्र तावदष्टकाश्राद्धनिर्णयादिकं सर्वं विस्तरेणोक्तं यत्तन्मत्कृते श्राद्धसागरे ज्ञेयम् ।। प्रयोगस्त्वत्रोच्यते ।। सचसप्तपाकसंस्थात्वेन गृह्याग्नौ नित्यत्वेनानुष्ठेयत्वादल्पवक्तव्यत्वाच्चात्राष्टकाश्राद्ध प्रयोग उच्यते । हेमन्त शिशिराख्येषु मार्गशीर्षादि चतुर्षु मासेषु कृष्णपक्षे सप्तम्यादि त्र्यहसाध्यमष्टका श्राद्धं कुर्यात् ।। अत्यशक्तौ माघमास एव कुर्यात् । अत्रैवं कारिका । हेमन्त शिशिराख्यर्त्वोः कृष्णपक्ष चतुष्टये । अष्टमीष्वथवैकस्यामष्टम्यामष्टका भवेत् ।। १ ।। प्रत्यष्टकं च पूर्वेद्युः श्राद्धं कुर्यात्तदुच्यते । कार्यं यत्कर्म सप्तम्यां तत्कुर्यात्पितृयज्ञवत् ।। २ ।। ओदनं कृसरं चैव पायसं श्रपयेदिह ।। गृहसिद्धा उपादेया अपूपाज्जुहुयाद्यदि ।।३।। पूर्वोक्तानां यथासंख्यं द्रव्याणां चेति केचन ।। नैतत्तु वृत्तिकारस्य मतं सह्येवमूचिवान् ।। ४ ।। अष्टका हि चतस्रः स्युः पूर्वाहानि

तथैव च ।। द्रव्यत्रयत्वा द्वैकत्वान्न यथा संख्य संभवः ।। ५ ।। प्रत्यष्टकं हि पूर्वेद्युस्त्रीणि द्रव्याण्यथापि वा ।। अपूप द्रव्यमेकैकं नान्याव्याख्यान कल्पना ।। ६ ।। ओदनस्तु प्रसिद्धःस्यात्पायसः पयसा भृतः ।। ओदनस्तिलमिश्रस्तु कृसरः परिकीर्त्यते ।। ७ ।। तिलकल्कं विनिक्षिप्य शृते वा कृसरो भवेत् ।। कृत्वेध्माधान पर्यंतं पितृयज्ञं विधानतः ।। ८ ।। वासः प्रदान पर्यंतं श्राद्धं पार्वणवद्भवेत् ।। ओदनाद्यन्नमुद्धृत्य पृष्टोक्तः पूर्ववद् द्विजैः ।। ९ ।। सोमायेत्येतयोः स्थाने हुत्वाष्टाभिरुदीरिताम् ।। अन्नदानादि तद्वत्स्यात् उक्तः संपन्नमित्यथ ।। १० ।। उद्धृत्य भुक्त शेषान्नं निदधाति चरुत्रये ।। स्यात्पात्रोत्सर्ग पर्यंतं श्राद्धशेषं समापयेत् ।। ११ ।। तत्र षष्ठ्यां सायं होमोत्तरं सप्तम्यामेव वा प्रातर्होमोत्तरं देशकालौ संकीर्त्य अस्मत्पितृ – सपत्नीकानां मातामह ३ सपत्नीकानां नित्यविधिरूपं श्वोऽष्टकाश्राद्धं कर्तुकामः पूर्वेद्युः श्राद्धं करिष्ये इति संकल्प्य क्षणः कर्तव्य इति द्वितीयसंकल्पान्तं कृत्वा विप्रान्संनिधाप्योपवीती आग्नेयाग्रकैर्दर्भैः परिस्तीर्येत्यादि स्थालीत्रयं शूर्पादीनि च पिण्डपितृयज्ञवत्पात्राण्यासाद्य स्थालीषु व्रीहिपूरणादि तण्डुलप्रक्षेपांतं कृत्वा तण्डुलांस्तिलांस्तिसृषु स्थालीषु विभज्य शुद्धौदनं तिलमिश्रौदनं पायसं च श्रपयित्वाति प्रणयनादि ध्रुवायामाज्यनिषेचनांते चरुत्रयं क्रमेणाभिघार्योदगुद्वास्याति प्रणीताग्नेः पश्चिमतो दक्षिण संस्थं क्रमेणासाद्य तद्दक्षिणतोऽभ्यंजनांजनकशिपूप बर्हणान्यासाद्य दर्शश्राद्धं सप्तम्यादिष्वंगीकृताग्नेः पश्चिमत उपविश्य प्राचीनावीत्यभिघारितमिध्मं पितृतीर्थेनाग्नावाधायै तावत्सर्वत्र यत्र पिण्डपितृयज्ञ प्राप्तिस्तत्रैवेध्माधानांतं कृत्वा विप्रपादप्रक्षालनादिकमिति

वृत्तिः ।। कारिका च भट्टैरपि प्रयोगरत्ने पितृयज्ञांते व्यतिषंग-स्थले एवमेव पाक्षिकालिखितानंतरं सप्तम्यादि श्राद्धेषु विपरीत लेखने किं प्रमाणं दृष्टमिति त एव प्रष्टव्याः ।। ततो विप्रपाद क्षालनादि पात्र परितो भस्मप्रक्षेपोत्तरं करशुध्यंतं कृत्वोदनाद्यन्न मुद्धृत्येति कारिकोक्तेः । चरुत्रयं पात्रांतरेषु पृथगुद्धृत्य घृताक्तं कृत्वा प्राचीनावीत्यग्नौ करिष्ये । क्रियतामित्युक्ते ध्रौवाज्येन मेक्षणे उपस्तीर्य शुद्धोदन मध्यादंगुष्ठ पर्वमात्रमन्नं मेक्षणेनावदाय पूर्वार्धाच्च तथैवावदाय पंचावत्ती चेत्सर्वत्रापि पश्चार्धादप्यवदाय कृसरान्नात्पायसाच्च तथैवावदाय शिष्टमन्नं पृथक् पृथगभिघार्य मेक्षणस्थमवत्तं चैकवारमेवाभिघार्य उदीरतामित्यष्टर्चस्यग्रामायनः शंख ऋषिः पितरो देवताः त्रिष्टुप्छन्दः पूर्वेद्युर्होमे विनियोगः ।। ॐ उदीरता – हवेषु स्वधानम इत्यंतं मेक्षणेन हुत्वा पितृभ्य इदं नममेति सर्वत्र त्यागः ।। पुनः पुनरेवमेव चरुत्रयादवदाय सोमायेत्येतयोः स्थान इत्युक्तेः स्वधानमों ते न होमः ।। १ ।। ॐ इदं पितृभ्यो – विक्षु स्वधानमः ।। २ ।। ॐ आहं पितॄन् – गमिष्ठाः स्वधानमः ।। ३ ।। ॐ बर्हिषदः– दधात स्वधानमः ।। ४ ।। ॐ उपहूताः – ते वंत्वस्मान् स्वधा नमः ।। ५ ।। ॐ आच्याजानु – कराम स्वधा नमः ।। ६ ।। ॐ आसीनासो – दधात स्वधानमः ।। ७ ।। ॐ येनः पूर्वे – प्रतिकाममत्तु स्वधा नमः ।। ८ ।। एवमष्टाहुतीर्हुत्वा सर्वत्रापि विश्वेभ्यो देवेभ्य इदं नममेति वा त्यक्त्वा प्राचीनावीत्येव मेक्षणमनुप्रहृत्य हुतशिष्ट चरुत्रयात्किंचि त्पिण्डार्थं संस्थाप्य चरुत्रय परिवेषणादि संपन्नप्रच-नांतं सर्वं कृत्वा । चरुत्रय शेषं पिण्डार्थं पाकान्नं च पिण्ड षट्-कार्थं उद्धृत्य शेषं निवेद्य शुंधंतां पितर इत्यादि पिण्डषट्कं दत्वा

पात्रोत्सर्गांते परिस्तरणं विसृज्य विप्रानाचमय्य विकिरदानादि पार्वणवत् श्राद्धशेषं समाप्य । सकृन्महालये श्वः स्यादष्टकास्वंत एवहि इति गर्गवाक्यात् तदहरेव श्राद्धांते पितृमातामहवर्गं द्वयस्य श्राद्धांग तिलतर्पणं कृत्वा यथोक्तनियमेन दिनशेषं नयेत् । इति सप्तमी श्राद्धप्रयोगः ।

इदानीं चतुः शरावस्य वा पूपानिति सूत्रे उक्तत्वात् अपूप-पक्षे अनुष्ठान सौकर्यार्थं सप्तमी श्राद्धप्रयोग प्रकार उच्यते: । आहिताग्निस्तु निमंत्रणाद्याच्छादनांतं कृत्वा दक्षिणाग्नौ समि धनादि हविरासादनांतं कृत्वा पूर्ववद् ब्राह्मणाननुज्ञाप्य दक्षिणाग्नाविध्ममुपसमाधायो दीरतामित्यादिभिरष्टाहुतीर्हुत्वा मेक्षणानुप्रहरण होमशेष परिवेषणादि ब्राह्मण विसर्जनांत मनाहिताग्निवत्कुर्यात् । अत्र स्मार्तस्य सप्तम्यादि श्राद्धस्य श्रौत दक्षिणाग्नौ कथंहोम इति तत्रैवं हेमाद्रिणा सिद्धांतितं । तत्र श्राद्धहेमाद्रौ अग्नौकरण प्रकरणे गृह्यपरिशिष्टम् ।। अन्वष्टक्यं च पूर्वेद्युः मासि श्राद्धं च पार्वणम् ।। काम्यमाभ्युदयेऽष्टम्यामेको द्दिष्टमथाष्टमम् ।। चतुर्ष्वाद्येषु साग्नीनां वह्नौहोमो विधीयते ।। पित्र्य ब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपि ।। अत्राखिलाष्टौ श्राद्धानि भवंति । अष्टकानामुपरितना नवम्योऽन्वष्टकाः ।। तन्नि-मित्तं श्राद्धमन्वष्टक्यम् ।। अष्टकापूर्वदिनरूपासु सप्तमीषु क्रिय-माणं श्राद्धं पूर्वेद्युः । मासिमासीति यस्यां कस्यांचित्तिथौ प्रति-कृष्णपक्षं क्रियमाणं श्राद्धम् । अमावास्यादि निमित्तकं श्राद्धं पार्वणम् ।। पुत्रादि कामनया क्रियमाणं काम्यम् ।। पुत्रजन्म विवाहादौ क्रियमाणमभ्युदयम् ।। अष्टकासंज्ञकायामष्टम्यां क्रिय-माणमष्टकाख्यम् ।। मुख्य एकोद्दिष्टेऽग्नौ करणाभावादेकोद्दिष्ट-

पार्वणोभयात्मकत्वात् सपिण्डीकरणस्यैकोद्दिष्टशब्देन लक्षणया सपिण्डीकरणमुक्तम् ।। तत्राद्येषु चतुर्षु श्राद्धेषु साग्नेरग्नावेव होमः । तत्र यद्यपि कस्य चिदाहिताग्नेरष्टकादिषु श्रौतकर्मार्थं विहृत्य दक्षिणाग्नि सन्निधिर्न विद्यते ।। सर्वाधधानिनां औपासनाग्नि सन्निधिश्चनास्ति तथाप्यग्नौ होमनिधानात् तदर्थमेव विहरणं कृत्वा होमः कार्य. । येषामिदं परिशिष्टं तेषामेवायं विधि र्वेदितव्यो न सर्वेषामिति । स्मृत्यर्थसारेतु । अमावास्यायां पार्वण श्राद्धप्रकरणे साधारणेनैवमुक्तम् । अथाग्नौ पाणौ होमः । निरग्नेः पाणावेव । आहिताग्निः सर्वाधानी दक्षिणाग्नौ जुहुयात् । पित्र्यविप्रपाणौ वा अग्न्यभावे पाणौ होम इति । तदप्यत्र पूर्वोक्त हेमाद्र्यनुसारेण साधितं भवतीति प्रतिभाति ।

अथाष्टमी श्राद्धप्रयोगः । अत्रैवं कारिका । पूर्वेद्युः कर्मकथितमष्टमी कर्म कथ्यते । अष्टम्यां पशुना कार्याः स्थालीपाकेन चाष्टकाः ।। १ ।। स्थालीपाकप्रयोगस्तु तत्र तावन्मयोच्यते ।। पूर्णपात्रनिधानांतमन्वाधानादि पूर्ववत् ।। २ ।। मंत्रोक्त देवताभ्यस्तु तूष्णीमेवाथ निर्वपेत् । चतुरश्चतुरो मुष्टीन् प्रोक्षणं च तथाभवेत् ।। ३ ।। सहैव श्रपयेदत्र नास्ति व्युद्धरणं तथा ।। आदिष्टमंत्र होमेतु सर्वत्रैवं प्रतीयताम् ।। ४ ।। कृत्वाज्यभागपर्यंतं जुहुयात्सप्तभिश्चरुम् । अग्ने नयेत्यृचौ पंच ग्रीष्म इत्यादयस्तथा ।। ५ ।। अविज्ञातस्वरो मंत्रः सौत्र एकश्रुतिर्भवेत् ।। ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत् ।। ६ ।। अथाच्छादनपर्यन्तं श्राद्धं पार्वणवद्भवेत् ।। उद्धृत्य भोजनार्थान्नाद् द्वे द्वे हुत्वाथ पाणिषु ।। ७ ।। सोमायेति तु मंत्राभ्यां मेक्षणेन करेण वा ।। एकैकामाहुतिं केचिद्विगृह्यैव प्रजुह्वति ।। ८ ।। प्राशितेषु हुतेष्वन्नेष्वन्यदन्नं ददा-

स्यथ ॥ उदीच्याः प्राहुरत्रैव न प्राश्नीयात्करे धृतम् ॥ ९ ॥ निधाय तद्धुतं पात्रेष्वाचम्योपविशेदिति ॥ संमन्नवचनांतं स्याच्छेषं पिण्डार्थमुद्धरेत् ॥ १० ॥ ब्राह्मणानां समीपेतु पिण्डनिर्वपणं भवेत् ॥ न कार्यमग्निं प्रत्येयादित्याद्यत्रतु कर्मणि ॥ ११ ॥ प्राशयेन्मध्यमं पिण्डं श्राद्धशेषं समापयेत् ॥ अन्वष्टक्यं च पूर्वेद्युः मासि मासि च पार्वणम् ॥१२॥ चतुर्ष्वेष्वग्निहोमः स्यात्पिण्डश्चाग्निसमीपतः ॥ काम्यमभ्युदयेऽष्टम्यामेकोद्दिष्टमथाष्टमम् ॥ १३ ॥ चतुर्ष्वेषु करे होमः पिण्डदानं द्विजान्तिके ॥ पिण्डनिर्वपणं केचिन्नेच्छंत्यस्मिश्चतुष्टये ॥१४॥ तत्र सप्तम्यां सायं होमानन्तरमष्टम्यां वा प्रातर्होमोत्तरं देशकालौ - अत्र कामकालौ विश्वेदेवौ अष्टम्यां कामकालाविति शंखस्मृतेः । अस्मत्पितृ -- सपत्नीकानां मातामह -- सपत्नीकानां नित्यविधिरूमष्टकाश्राद्धं करिष्ये इति संकल्प्य ब्राह्मणनिमन्त्रणादि श्राद्धे क्षणः कर्तव्य इति द्वितीयसंकल्पांतं कृत्वौपासनाग्निं प्रज्वाल्य प्राणानायम्याष्टकाश्राद्धांगहोमं करिष्ये । तत्र देवतापरिग्रहार्थमन्वाधानादि चक्षुष्यंते द्विवारमग्निग्रीष्महेमंतर्तु वर्षा शरत् सर्वसंवत्सराहोरात्रान् पृथिव्यंतरिक्षद्युदिक् प्रदिगुदिक् विद्युतः आपोमरीचि धातृसमुद्रभूतभविष्यद्ब्रह्मणि आदित्य वसु विश्वेदेवरुद्रमरुत्प्रजापतीन् प्रजापतिं च एताः प्रधानदेवताश्चरुद्रव्येण शेषेण स्विष्टकृतमित्यादि पूर्णपात्र निधानांतेऽग्नेः प्रत्यक् सपवित्रे शूर्पे चतुरश्चतुरो मुष्टीन् अहुति संख्यया सप्तवारं तां तां देवतां ध्यायन् तूष्णीं निरूप्य तथैव प्रोक्ष्याऽवहननाद्याज्यभागांतं चरोरभ्युद्धारं सप्तभिमंत्रैः सप्ताहुतीर्जुहुयात् । अग्ने नयेति मंत्रद्वयस्य मैत्रावरुणिरगस्त्योऽग्निस्त्रिष्टुप् । अष्टकाहोमे विनियोगः । ॐ अग्ने नय - विधेमस्वाहा । अग्नय-

इदं ॥ ॐ अग्ने त्वंपारया - शंयोः स्वाहा अग्नय इदं ॥ २ ॥ ॐ ग्रीष्मो हेमंतऋतवः शिवानोवर्षाः शिवा अभयाः शरन्नः ॥ संवत्सरोऽधिपतिः प्राणदोनोहोरात्रे कृणुतां दीर्घमायुः स्वाहा ॥ ग्रीष्म हेमंतर्तुवर्षाः शरसंवत्सरात्रेभ्यइदं ॥ ३ ॥ ॐ शांता पृथिवी शिवमंतरिक्षंद्यौर्नो देव्यभयं नो अस्तु । शिवादिशः प्रदिश उद्दिशोन आपोविद्युतः परिपांतु सर्वतः स्वाहा ॥ पृथिव्यंतरिक्षद्युदिक् प्रदिगुदिक् अप्‌विद्युद्भ्र्य इदं ॥ ४ ॥ ॐ आपो मरीचीः प्रवहन्तु नोधियो धातासमुद्रो वहन्तु पापम् ॥ भूतं भविष्यदभयं विश्वमस्तु मे ब्रह्माधिगुप्तः स्वराक्षराणि स्वाहा ॥ आपो सरीचि धातृसमुद्रभूत भविष्यत् ब्रह्मभ्य इदं ॥ ५ ॥ ॐ विश्व आदित्या वसवश्च देवा रुद्रागोप्तारो मरुतः सदंतु ॥ ऊर्जं प्रजाममृतं पिन्वमानः प्रजापतिर्मयि परमेष्ठी दधातु स्वाहा ॥ आदित्य वसुविश्वे देव रुद्रमत्प्रजापतिभ्य इदं ॥ ६ ॥ एतैरेकश्रुत्या पठितैर्होमः ॥ प्रजापते नेत्यस्य प्राजापत्यो हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् । अष्टकाहोमेविनियोगः । ॐ प्रजापतेनत्वत् — रयीणां स्वाहा । प्रजापतय इदं । एवं सप्ताहुतीर्हुत्वा । स्विष्टकृदादि होमशेषं समाप्य स्वागतोक्त्यादि अर्घशेष समापनांतं कृत्वा । ब्राह्मणसंनिधावाग्नेय्यां दिशि प्रोक्षितभूमौ दर्शवत् प्रथमपात्रं न्युब्जीकृत्यगंधादिना पाणिशोधनांतं कृत्वा भोजनार्थादन्नादुद्धृत्य घृताक्तं कृत्वा पित्र्य समीपे उपविश्य तत्पाणिं पर्युक्ष्य तत्र प्राचीनावीती दक्षिणाग्रान् दर्भानास्तीर्य कारिकोक्तेर्मेक्षणेन करेण वा द्विस्त्रिर्वावदाय । पात्रस्थ मवत्तं चाभिघार्यं । सोमाय पितृमते स्वधानमोऽग्नये कव्यवाहनाय स्वधानम इति दर्शवत् पित्र्यविप्रपाणिषु जुहुयात् किंचिदाभ्यामेव मंत्राभ्यां एकैकामाहुतिं गृहीत्वा विगृह्यैव प्रजुह्वतीति

कारिकोक्तेरेवं हुत्वोद्देशत्यागौ कृत्वा एवं सर्वत्रपित्र्यविप्रपाणिषु जुहुयान्नात्र श्राद्धचतुष्टयेऽग्नौकरणहोमः। काम्यमाभ्युदयेऽष्टम्यामेकोद्दिष्टमथाऽष्टमम् ।। चतुर्ष्वेव करे होमः पिण्डदानं द्विजांतिक इति वृत्तिकारिकोक्तेः। पित्र्यब्राह्मण हस्ते स्यादुत्तरेषु चतुर्ष्वपीति हेमाद्रौ परिशिष्टोक्तेः ।। पाणिहोमे त्विध्ममेक्षणविप्राभ्यनुज्ञा न सन्ति इति स्मृत्यर्थसारः। तत्र पित्र्यविप्रपाणि प्राचीनावीती परिसमुह्य पर्युक्ष्य वामेन दक्षिणमुपस्तीर्य दक्षिणेनावदाय प्रत्यभिघार्य प्रत्युक्षिते सदर्भे विप्रपाणौ प्राग्वद्धुत्वा परिसमूहन पर्युक्षणे नस्त इति स एव। नानुज्ञा पाणिहोमे स्यान्नस्तः पर्यूहनोक्षणे। नाग्नेतमध्याश्वेन च नस्यातामिध्ममेक्षणे ।। इति स्मृति रत्नावल्याम्। पाणिहोमे हेमाद्रौ यमः। अग्नौ करणवत्तत्र होमो विप्रकरे भवेत् ।। पर्युक्ष्य दर्भानास्तीर्य यतोह्यग्निसमो द्विज इति। पाणिहोमप्रकरणादत्रापि सर्वं स्पष्टमुक्तम्। प्राशितेषु हुतेष्वन्नेष्वन्यदन्नं ददात्यथ ।। उदीच्याः प्राहुरत्रैवं न प्राश्नीयात्करे हुतम् ।। निधाय तद्धुतं पात्रे आचम्योपविशेद्भुवि इति कारिकोक्तेः विप्राः हुतमन्नं भाजनेषु निक्षिप्याचम्य पूर्ववदुपविशेयुः। ततः कर्तान्नं परिविष्य हुतशेषमन्नं भोजनार्थेषु पात्रेषु निहितेष्वन्नेषु ददात्यग्निहोमे पाणिहोमे समानमिदमिति वृत्तिः ।। पृथिवी ते पात्रमित्यादि पिण्डदानकाले यत्र स्थालीपाको विहितः तत्र तेन च भुक्तशेषेण पिण्डनिर्वपणं भवति। यत्र तु स्थालीपाकविधिर्नास्ति तत्र भुक्तशेषेणैव केवलेन पिण्डनिर्वपणं भवतीति वृत्तिः। ब्राह्मणानां समीपेतु पिण्डनिर्वपणं भवेत्। नकार्यमग्निप्रत्ययादित्याद्यत्र तु कर्मणीत्युक्तेः। सर्वत्र पाणिहोमेऽग्ने तमद्यापदन्तरिक्षमित्येतद्द्वयमकृत्वैव प्राशयेन्मध्यमं पिण्डं श्राद्धशेषं

समापयेत् । तदहरेव वर्गद्वयस्य श्राद्धांग तिलतर्पणं कुर्यादष्ट-कास्वंत ए वहि इत्युक्तेः । अत्र गृह्यसूत्रे श्वोभूतेऽष्टकाः पशुना स्थालीपाकेन वेति विकल्पाभिधानेऽपि लोकविद्विष्टत्वात् पशुपक्षे प्रयोगो न कृतः । इत्यष्टमीश्राद्धप्रयोगः ।।

आहिताग्निस्तु । अत्र त्रुटितम् ।। अन्वष्टकाख्यनवमी-श्राद्धप्रयोगः ।। अन्वष्टक्ये पितृयज्ञवदित्यत्र वृत्तौ ।। अग्निप्रणयनं पात्रं सोमायेत्यादिमंत्रकौ ।। उपस्थानं प्रवहणं निनयाद्यतिदि-श्यते ।। यमः । नवम्यां विधिवत्कृत्वा संकल्पं नियमव्रतः ।। कुण्डा त्सर्वं समुद्धृत्य स्वीयमौपासनानलम् ।। दक्षिणाप्रवणे देशे स्थण्डिले चोपलेपिते ।। उल्लेखिते प्रतिष्ठाप्य संपूर्णं जातवेदसम् । पात्राण्यासाद्य विधिवद्धोमं कृत्वा प्रयत्नतः ।। ब्राह्मणान् भोजये त्सर्वं पिण्डदानान्तमाचरेत् । पिण्डं पत्न्यै प्रदायाथ श्वासैत्वकेन हुताशनम् । नित्यायतनगं कुर्यात् संस्मरेद्यज्ञपूरुषम् ।। इति ।। तत्र कर्ता पूर्वेद्युः परेद्युर्वा प्राग्वद्वैश्वदेवार्थं वर्गत्रयार्थं च ब्राह्मणा-न्निमंत्र्यापराह्णे प्राणानायम्य देशकालौ संकीर्त्य प्राचीनावीती अस्मत्पितृ-महान् सपत्नीकान् निर्दिश्य अस्मत् मातृपितामही प्रपिता महीनां दान्तानां स्त्रीणामित्युक्तेरमुकामुकदानां गोत्राणां वसुरुद्रा दित्यरूपाणां दर्शवत् - मातामह — सपत्नीकानां नित्यविधि-रूपमन्वष्टक्य श्राद्धं नवम्यां पितृयज्ञवदित्युक्तेः पिण्ड पितृयज्ञ व्यतिषिक्त पार्वण विधानेनान्नेन हविषा सद्यः करिष्य इति संकल्प्य । श्राद्धे क्षणः कर्तव्य इति द्वितीय संकल्पांतं कृत्वा । सूत्रवृत्तिकारिकोक्तेर्नित्यायतनादौपासनाग्निं सर्वं निष्कास्य प्रयत्नेन संपादिते दक्षिणाप्रवणे देशे शुचिस्थण्डिले तमौपासनाग्नि उपलेपनोल्लेखनविधिवत् प्रतिष्ठाप्य प्रदक्षिणमेव परिसमुह्य

प्राक् दक्षिणाग्रैः समूलैर्दर्भैः सूत्राद्युक्तेरकंपयंस्त्रिवारमप्रदक्षिणं परिस्तीर्य पात्रासादनार्थं दर्भानास्तीर्य चरु स्थालीत्रयं शूर्पादि पितृ यज्ञवदासादयेत् ।। तत्र सकृदाच्छिन्न बर्हिस्त्रयमिति विशेषः। तण्डुलप्रक्षालनान्ते स्थालीषु तण्डुलान् विभज्य शुद्धोदनं तिलमिश्रोदनं पायसं च श्रपयित्वा किंचिदोदनाग्रद्रवं मण्डकाख्यं पात्रांतरेणादाय संभृत्याग्निमति प्रणीयाति प्रणीत वर्ह्लेश्च भवेदेवं परिस्तृतिरित्युक्तेस्तमपि पूर्ववत्परिस्तीर्य स्फचेन पित्रादिवर्गत्रयार्थं पश्चिमापवर्ग लेखात्रयमुल्लिख्य प्रत्येकमद्भिरभ्युक्ष्य सकृदाच्छिन्नेनैकैकेनैकैकां रेखामास्तीर्य ध्रुवायामाज्यं कृत्वौपासाग्ने र्दक्षिणतः कुशेष्वासाद्य स्रुवेणाज्यमादाय चरुत्रयं प्रत्येकमभिघार्याग्नेरुदगुद्वास्याग्नेः पश्चिमतो दर्भेषु क्रमेण दक्षिण संस्थमासाद्य दधिमिश्रित भर्जित यवपिष्ट रूपसक्तून् दधिमन्थसंज्ञकान् मधु मिश्र भर्जित यवपिष्टरूप सक्तून् मधुमन्थाख्यान् पात्रद्वये संभृत्य दधिमन्थं सक्तून् औपासनेऽधिश्रित्याभिघार्योदगुद्वास्य पायसा दक्षिणत आसाद्य अभ्यंजनांजनकशिपूपबर्हणानां प्रत्येकमौपास नाग्ने र्दक्षिणत आसाद्य प्राचीनावीतोऽग्निमुपसमाधायाथ पित्रर्थ ब्राह्मणानां स्वागतवचनादि प्राप्नोतु भवान् प्राप्नवानीत्यन्ते। अर्घ्यासादनकाले नवार्घ्यपात्राण्यासादयेत्। तत्र मात्रादिद्वित्वे बहुत्वेवा तावत्संख्याकान्यासाद्य प्रोक्ष्योत्तानानि कृत्वा प्रत्येकं निहित दर्भत्रयाणि जलेनापूर्य शन्नोदेवीरित्येकैकवर्ग पात्रस्थं जलं सकृदनुमंत्र्य तिलोसीति मंत्रावृत्या यथापठितेन पितृमातृ मातामह शब्दोहवर्जितेन प्रतिपात्रं मंत्रावृत्या तिलान्निक्षिप्य गन्ध पुष्पाणि प्रक्षिप्य पितृपात्रं मातृपात्रं संपन्नमित्यादि यथालिंगमभिमृश्य दर्शवत् सनामगोत्ररूपमित्याद्युक्त पूर्वमावाहनार्चने कृत्वोपवीती

सर्वेषां नामगोत्राण्युच्चार्य संपादितापः स्वधार्घ्या इति तत्तत्पात्रं तत्तत्पुरतः क्रमेण संस्थाप्य दर्शवत्पितृवर्गस्यार्घ्यं दत्वा मातरिदं तेर्घ्यं स्वधानमो नममेत्यादिना मातृवर्गस्यदत्वा मातामहवर्गस्य च दर्शवद्दत्वा पितृपात्रे संस्रावपूरणादि पाणिशोधनान्तं कृत्वा। पात्र चतुष्टये क्रमेण चरुत्रयाद्दधिमन्थाच्च पृथग्घविरुद्धृत्य घृतावत्तं कृत्वा अग्नौ करिष्य इति पित्रर्थविप्राननुज्ञाप्य क्रियतामिति तैर नुज्ञातो मेक्षणमुपस्तीर्य तेनांगुष्ठ पर्वमात्रं क्रमेण हविश्चतुष्टयस्य मध्यात्पूर्वार्धाच्च पृथक्पृथगवदाय पात्रस्थं हविश्चतुष्टयं पृथगभि घार्यावत्तं चाभिघार्य सोमाय पितृमते स्वधानम इति प्रथमाहुतिं हुत्वा पुनः पूर्ववदवदानादि पूर्वमग्नये कव्यवाहनाय स्वधानम इति द्वितीयाहुतिं हुत्वा प्रत्याहुत्योद्देशत्यागौ कृत्वा प्राचीनावी-त्येव तूष्णीं मेक्षणमग्नौ प्रहृत्य पूर्ववत्परिविष्य हुतशिष्टं पात्र चतुष्टयस्थितं किंचित् किंचिद्वर्गत्रयस्य विप्रभोजन भाजनेषु परि-विष्यान्नत्यागादि संपन्नवचनान्तं कृत्वा पिण्डार्थोद्धृत श्राद्धीय सर्वान्नमध्ये स्थालीचतुष्टयस्थितं सर्वं हविश्चतुष्टयं मधुमन्थांश्च निक्षिप्य पुनर्विकिरार्थं सर्वान्नात्किंचिदुद्धृत्य शेषं निवेद्य द्विजै रुत्तरापोशने हस्तप्रक्षालने च कृते स्वयमाचम्य पूर्वास्तीर्णेषु बर्हि दर्भेषु शुंधंतां पितरः शुंधंतां पितामहाः शुंधंतां प्रपितामहा शुंधंतां मातरः शुंधंतां पितामह्यः शुंधंतां प्रपितामह्यः शुंधंतां सपत्नीका मातामहाः शुंधंतां सपत्नीका मातुः पितामहाः शुंधंतां सपत्नीका मातुः प्रपितामहाः इति मंत्रैः सतिल कमण्डलुजलं निनीयार्द्रामलकप्रमाणान् मधुसर्पिस्तिलयुतान्नपिण्डान् कृत्वा ध्रुवाज्येनाभिघार्य एतत्त इत्यादि यथालिंगं पिण्डंदत्वा स्त्रीपिण्डेषु पूर्वं संभृतमोदनाग्रद्रवं निषिच्यात्र पितर इत्याद्यग्न्युपस्थानान्तं

कुर्यात् । तत्रात्र पितरोऽमीमदन्त इति पितर इत्यनूहेन मंत्रद्वयेन सर्वेषां पिण्डानामनुमंत्रणं कार्यम् । एतद्वः पितर इत्यानूहेन यथार्थं स्त्रीणां पृथग्वासो दद्यात् असंसर्गित्वादिति वृत्तिः । नमो वः पितरः – । मनोन्वाहुवामहे – । परेतन पितरः सोम्यासः — । इति मंत्रैः यथापठितैः पितृशब्दोह रहितैः तत्तत्कर्म यथाक्रमं कुर्यात् । प्रवाहणं सर्वेषां युगपदेवेति वृत्तिः । वीरं मे दत्त पितर इत्यनूहेन त्रिरावृत्तेन मंत्रेण वर्गत्रयस्य मध्यमपिण्डानादाय आधत्त पितर इत्यनूहेन मंत्रेण पत्नीं प्राशयित्वा पिण्डोद्वासनादि पात्रोत्सर्गं कृत्वा विप्रविसर्जनादि श्राद्धशेषं समापयेत् । तदहरेव वर्गत्रयस्य श्राद्धांगतिलतर्पणं कुर्यात् । मातृद्वित्वे पिण्डदानकाले एतद्वाभस्मन्मातरौ यज्ञदे श्रीदे अमुकगोत्रे अमुकरूपे ये च युवा मत्रानु इत्येकं पिण्डं दद्यात् । अस्मन्मातृभ्यां यज्ञदा श्रीदाभ्यां अमुकगोत्राभ्यां अमुकरूपाभ्यां अयं पिण्डः स्वधानमः । अभ्यंजन दाने यज्ञदे श्रीदे इत्युच्चार्याभ्यंजाथामिति तैलमेव । अंजनदाने अंजाथामिति प्रत्येकं द्विवारमंजनम् । एवं पितामही प्रपितामही द्वित्वे च । मातृबहुत्वेच पिण्डदाने एतद्वोऽस्मन्मातरः यज्ञदे श्रीदे रूद्रदे अमुकगोत्राः अमुकरूपाः ये च युष्मानित्येकं पिण्डम् । अभ्यंजने पूर्ववन्नामान्युक्त्वा अभ्यंग्ध्वमंजने तथैवोक्त्वा अंग्ध्वं । पितामही प्रपितामही बहुत्वेप्येवम् ।। सर्वेषु पिण्डदानादिषु मात्रादीनां द्वित्वे बहुत्वे चैकनामत्वे च द्वित्वे चेद्द्विवचनांतम् नाम निर्देश्यं बहुत्वे बहुवचनांतं भिन्ननामत्वे यावन्ति नामानि तावन्ति निर्देश्यानि । एतच्छ्राद्धाकरणे प्रायश्चित्तमृग्विधाने । एभिर्द्युभिर्जपेन्मंत्रं शतवारं तु तद्दिने ।। अन्वष्टक्यं यदाशून्यं संपूर्णं याति सर्वदेति ।। अन्वष्टक्यादि श्राद्धेऽन्येषु सर्वश्राद्धेषु वा यत्र

कुत्रापि सर्वत्र पिण्डदाने स्त्रीविषये ये च त्वामत्रान्वित्यत्र यच्छ ब्देम यथापाठ पठितेन पुंलिंगेनैव प्रयोगः कार्यो नात्र याश्चत्वेति स्त्रीलिंगेनेति वृत्तिः । केचिन्मते तु याश्चत्वेत्यपि कुर्वंति इति तच्चिंत्यं इत्युक्तं वृत्तौ । इति प्रासंगिकम् । एतत्ते तत ये चत्वामत्रानु एतस्यार्थ एवं हेतत एतत् पिण्डरूपमन्नं तुभ्यं ये चान्ये च त्वामत्रानुयांति तेभ्यश्चेति इत्ययमर्थोवृत्तिकृतान्वष्टक्य स्थले व्याख्यातः । इति श्रीमदारडोपनामक नारायण भट्ट कृते गृह्याग्निसागरेऽन्वष्टक्य श्राद्धप्रयोगः ॥

॥ अथ माध्यावर्ष श्राद्धप्रयोगः ॥

तत्र सूत्रम् । एतेन माध्यावर्षं प्रोष्ठपद्या अपरपक्षे एतेनेति पूर्वेद्युः प्रभृति कृत्स्न कर्मातिदेशः एतदुक्तं भवति । प्रोष्ठपद्याः समीपे योऽपरपक्षः तत्राष्टम्यां माध्यावर्षं नामकर्मकार्यम् । तच्चै तेनाष्टका कर्मणा व्याख्यातमिति । अत्रापि त्र्यष्टहस्सु कार्यमित्यर्थः । माध्यावर्षं नभस्यस्य कृष्णाऽष्टम्यां विधीयते । अष्टकाकर्मवत्कार्यं सप्तम्यादित्र्यहस्सु तत् । माध्यावर्षं नभस्यस्य कृष्णपक्षे हि कुत्रचित् । अन्वष्टक्यवदेव स्यात्पार्वणं नेति केचन ॥ इति माध्यावर्षं । पितृभ्य एव तच्छ्राद्धे अन्वष्टक्य विधानतः । प्रतिमासं भवेत्कृष्ण पक्षे युग्मेऽह्नि कुत्रचित् । इति । प्रतिमासं कृष्ण पक्षे युग्मेऽहनि श्राद्धं । पंचम्यां पुत्रकामस्येत्यादिकाम्यं तदुच्यते । श्राद्धं यदुक्तमष्टम्यां तद्वदेव तदिष्यते ॥ इति काम्यविकल्पः । पर्वणा पार्वणाख्यस्य मासि श्राद्धस्य चेष्यते । काम्यश्राद्धे कृतेनैव कार्ये मासिकपार्वणे ॥ अष्टमी श्राद्धवत्कुर्यात् आहिताग्निस्तु पार्वणम् ॥ पार्वणश्राद्धमासिश्राद्धकाम्य श्राद्धानां मध्येऽन्यतरस्मिन् कृते सति इतरश्राद्धयोस्तेनैव सिद्धिरितीदं दर्शश्राद्ध

प्रकरणान्ते स्पष्टमुक्तम् । पुनरप्यत्रापि सूचितं कारिका पाठवशात् । इति कारिका वृत्तावप्येवमेव । अथाष्टकादि विकृतिभूतं माघ्यावर्षं श्राद्धं । तत्र भाद्रपदापरपक्षे सप्तम्यादि त्रिष्वहस्सु अष्टकाकर्मवत्तत्रं कुर्यादिति वृत्तिः । कारिका च । हरदत्तस्तु भाद्रपद कृष्णपक्षे मघायुक्त त्रयोदश्यां माघ्यावर्षाख्यं श्राद्धं संकल्पित विधानेनैव कुर्यात् । तदेवं संकल्पः । पूर्ववत्पितॄनुच्चार्य श्वो माघ्यावर्षं श्राद्धं कर्तुकामः पूर्वेद्युः श्राद्धं करिष्ये इत्येवं विशेषोऽन्यत्सर्वमष्टकावत् । इति माघ्यावर्षम् ॥ दर्शवत् षट् पितॄननूद्य मघात्रयोदशी निमित्तं माघ्यावर्षं श्राद्धं सदैवं सांकल्पितविधिना करिष्ये इति संकल्प्यावाहनाग्नौ करण पिण्डदान विकिर दान स्वधावाचन वर्जं सर्वं पार्वणवत्कुर्यात् । समंत्रकावाहन वर्ज्यमिति केचित् । तूष्णींतु भवत्येवेति । अक्षय्यवर्ज्यमिति केचित् । विकिरेतु विकल्प इति केचित् । एतत्सर्वं सांकल्पलक्षणस्थले प्रागुक्तं । इति संकल्पविधिः सर्वत्रापि सांकल्पिकश्राद्धे ज्ञेयः ॥ इति माघ्यावर्षं श्राद्धम् । इति प्रतिकृष्णपक्षं प्रतिपदाद्ययुग्मसंज्ञकाष्टतिथिषु पृथक्कर्तव्य मातृश्राद्धवर्ज्यं सपत्नीक पितृत्रयस्य तथा मातामहत्रयस्य च सुरार्चां च वर्जं सर्वमन्वष्टक्य श्राद्धवत्कुर्यात् इति प्रतिमासकर्तव्यापरपक्षश्राद्धप्रयोगः ॥

अथ काम्य श्राद्धम् ॥ तच्च पंचम्यामन्वष्टक्यां वा तिथौ कृत्तिकादि नक्षत्रेषु फलार्थं विहितं यत्काम्याख्यं श्राद्धमष्टमी श्राद्धवत्कर्तव्यमिति वृत्तिकृत् । काम्यश्राद्धे पाणिहोमो भुक्तशेषेण पिण्डदानं चास्त्येवेति पार्वणश्राद्धस्थलेवृत्तिः । अत्र धूरिलोचनौ विश्वे देवौ वृद्धिश्राद्धवत्कर्तव्यमिति शौनकः । आद्य प्रकारः प्रागुक्तः । वृद्धिश्राद्धप्रकारस्तु तत्प्रकरणे वक्ष्यते । काम्य-

रविवारश्राद्धप्रकारस्तु तत्प्रकरणे पार्थक्येनानुष्ठानवैलक्षण्येन। इति श्रीनारायणभट्ट रचिते गृह्याग्निसागरे माघ्यावर्षाद्येतदंतं श्राद्धनिरूपणम् ॥

॥ अथाग्निनाशकप्रायश्चित्तानि ॥

य आहिताग्नेर्धर्मः स्यात्स औपासनिकस्यत्विति पक्षहोमादि प्रकरणांते स्मृत्यर्थसारे उक्तत्वादाहिताग्नेर्यान्यग्निनाशकनिमित्तानि अविरुद्धानि तान्यत्रौपासनिकस्याप्युच्यंते । अनुक्तमन्यतो ग्राह्यमिति वचनात् सर्वशाखापरमेकं कर्मेतिन्यायात् । इष्टापूर्तादिकं कर्म स्वशाखोक्तं न विद्यते । तत्र बौधायनं ग्राह्यं बह्वृचादिभिरादरात् । इत्युक्तत्वाच्च । तत्र बौधायनीयप्रायश्चित्त--प्रदीपोक्तानि कानिचित्प्रायश्चित्तानि विविच्य लिख्यंते । यजमानः पत्नीचोभौ उदयास्तमयवेलायामग्निसकाशे वसतः यजमानस्यान्यपरत्वे पत्न्यप्यवश्यं वसेत् । यदि पत्नी यजमानश्च सहोदयास्तमयवेलायां वास्तुसीमां ग्रामसीमां वा निष्क्रम्य वसेतां तदाग्नयो लौकिका भवन्ति । अविकृतमग्न्याधेयं कुर्वीत । तथा च कात्यायनः । विहायाग्निं सभार्यश्चेत्सीमामुल्लंघ्य गच्छति । होमकालात्यये तस्य पुनराधेयमिष्यते ॥ इति । उदयास्तमयव्यतिरिक्तकालेपि तयोर्महासीमातिक्रमणं केचिन्नेच्छन्ति । अत्र बौधायनसूत्रम् । अथ यदि यजमानश्चैव पत्नीचोभावप्येव निष्क्रामतो ग्रामान्ते ग्रामसीमान्ते वा वसेतेग्निहोत्रमेव लुप्येताविकृतमग्न्याधेयं कुर्वीतेति । श्रौतेऽग्निबहुशब्दः स्मार्ते एकाग्निपरो ज्ञेयः ॥ अत्रास्यैकत्वात् । अग्न्याधेय शब्देन पुनः संधानं ग्राह्यम् । अजस्राग्नीन् हरन्तः शम्याप्रासादादर्वाङ्नोच्छ्वसेयुः ॥ यद्युच्छ्वसेयुस्तदाग्नयो लौकिका भवन्ति तत्राप्यग्न्याधानं प्रायश्चित्तम् ॥

शम्याप्रासादादूर्ध्वं ह्रणे उच्छ्वासे न दोषः। सूत्रेऽप्येवमेव। अजस्रहरणे समारोप्यहरणे च यजमानः पत्नीचान्वारभेयाताम्। तदभावेऽग्नयो लौकिका भवन्ति। तदाग्न्याधानं प्रायश्चित्तम्। अशक्तविषयेऽवश्यमन्यतरान्वारंभः कर्तव्यः। समारोपप्रकारस्तु सभार्यस्य प्रवासस्थले उक्तत्वान्नात्र पुनर्लिखितः। तत्रात्मनि समारूढेष्वग्निषु नाप्सु निमज्जेन्न मैथुनं व्रजेत्। अमेध्य शूद्रादिस्पर्शे अब्रह्मचरणे चाग्नयो नश्यन्ति। अग्निषु दीप्यमानेषु समारूढेषु चारण्योः शूद्रवायसपतित रासभ रजस्वला सूतिकाचांडाल क्षपणामेध्यादिभिः स्पर्शनेऽग्नयो नश्यन्ति। वसाशुक्रमसृङ्मज्जामूत्र विट् कर्णविट् नखाः॥ श्लेष्माश्रुपूतिका स्वेदो द्वादशैते नृणां मलाः॥ एतैश्च स्पर्शनेऽग्नीनां नाशस्तत्राधानं प्रायश्चित्तम्। अग्निं रजस्वला स्त्रीचेत्संस्पृशेदग्निहोत्रकम्। इष्टिरष्टाकपालेन कार्यातु शुचयेऽग्नये॥ इति मतान्तरवचनात्। रजस्वलयाग्निसंस्पर्शे इष्टिरेव नाग्न्याधानमिति केचित्। अग्नये शुचयेत्वेति स्थालीपाको ज्ञेयः। त्रिकाण्ड्याम्। असमाधाय चेत्स्वामी सीमामुल्लंघ्य गच्छति। असमाधायनाम अनुपस्थायेत्यर्थः। अग्न्यंतिके समाधाय तावन्मौनी प्रचक्षते। यावद्धवींषि दृश्यंते हव्यवाहनसद्मनि इति कात्यायनीयदेवयाज्ञिकग्रन्थे प्रवासविषये उक्तत्वादसमाधानमनुपस्थानम्। अनुपस्थायैवगमनेऽग्निनाशः। पुनस्त्वेति समिन्धनं वेत्यग्रे वक्ष्यते। तत्र येषां सूत्रेऽनुपस्थितगमने प्रकारान्तरमुक्तमस्ति तैस्तत्कर्तव्यम्। येषां सूत्रे प्रकारान्तरमुक्तं नास्ति तदाग्निनाशः समिन्धनं वा। तत्राश्वलायनसूत्रेऽनुपस्थिताग्निश्चेत्प्रवासमापद्येतेहैवसन्त वैश्वानरेणोपतिष्ठत इत्युक्तत्वात्। तत्सूत्रेऽण्डविलायश्मनुपस्थिताग्निश्चेत्तदा इहैव समिति

मंत्रेणोपतिष्ठेत प्रत्यागमनादि पूर्ववदित्युक्तम् । एतस्याध्यकरणे त्रिकाण्ड्यामुक्तत्वादग्निनाशः । अथवा तत्रैव मतान्तरात्पुनस्त्वेति समिन्धनं मंत्रस्तु प्रागेवोक्तः । यजमाने ग्रामान्तरं गते पुत्रोंतेवासी पत्नीवा यद्यग्नीन् ग्रामाद्बहिर्नयेयुस्तदाग्नयो लौकिका भवन्ति । यजमानेऽग्निसमीपस्थे पत्न्या अपि ग्रामांतरमाचार्येणोक्तम् । अथ यदि प्रवसति यजमाने पत्न्याः प्रवासनिमित्तं स्यादिति सूत्रात् । पत्न्यां प्रोषितायामपि यजमानेन वा पुत्रादिभिर्वाऽग्नीनां ग्रामाद्बहिर्निनयेल्लौकिकत्वं स्यात् । प्रोषितयजमाने पत्न्यपि ग्रामवास्तु सीम्नोर्बहिर्गत्वाग्नीनां ग्रामाद्बहिर्नयने लौकिकत्वं स्यात् । पत्नीबहुत्वेपि स्वामिन्याविशेषेणान्यतरस्यां ग्रामान्तरं गतायामग्नीनां बहिर्नयने लौकिकत्वं स्यात् । यजमानासन्निधौ एकस्यामपि ग्रामवास्तुसीम्नोर्बहिर्गतायां होमकालात्पूर्वमनागतायामग्नीनां लौकिकत्वं भवेत् । अथवा यदि यजमानश्चैव पत्नी चोभौत्वेन निष्क्रामयतौ ग्रामांते ग्रामसीमान्ते वा वसेते अग्निहोत्रमेव लुप्येताविकृतमग्न्याधेयं कुर्वीतेति इदं बौधायनसूत्रम् ॥ अस्यायमर्थो दीपे । यजमानः पत्नीचाग्निसकाशाद्बहिर्गत्वा ग्रामवास्तुसीम्नोर्बहिर्वसेतां तत्राग्नयो लौकिकाः स्युः । एतेषु निमित्तेषु अग्न्याधेयमेव प्रायश्चित्तम् । यदोभावपि ग्रामवास्तुसीम्नो बहिर्गतौ होमकालात्पूर्वमागतौ चेन्नाग्न्याधेयमिति केचित् । अत्रसर्वत्र सूर्यास्तमयोत्तर मुदयोत्तरं चास्तमिते होम एवं प्रातरुषोदयं व्युषित उदितेचैवेत्यादि आश्वलायनसूत्रद्वयोक्तः सायंप्रातर्होमप्रयोग पर्याप्त एव मुख्यः कालः न पुनः प्रदोषान्तो होम कालः संगवान्तः प्रातरित्याद्याश्वलायन सूत्रोक्तस्तत्सूत्रवृत्तौ तस्य पुनः काल विधानेन गौणत्वावगतेस्तथा प्रातराहुतिकालात्सायमाहुतिकालो

नातीयादित्यादि बौधायनोक्तस्य साक्षात्तत्र गौणत्वाभिधानात् । यजमानः पत्नीचोभौ ग्रामाद्बहिर्यावद्धोमकालं वसेतां तदाग्न्याधानं कर्तव्यं । तथाछन्दोगपरिशिष्टे । विहायाग्नींत्सभार्यश्चेत् सीमा मुल्लंघ्य गच्छति । होमकालात्यये तस्य पुनराधानमिष्यत इति एष पक्षः शिष्टैरंगीकृतोऽनुष्ठीयते च । तथाजस्रपटले । केवलं पत्न्याः सीम्नो बहिर्गमने उदयास्तमये पुनराधानमुक्तम् । तथा च भारद्वाजः । यदिपत्नी सीमान्ते आदित्योऽभिनिम्लोचेदभ्युदियाद्वा पुनराधेयं तस्य प्रायश्चित्तमिति । इदमपिसूत्रं प्रोषिते यजमाने पत्नीसीमातिक्रमणविषयमिति केचिद्वदन्ति । उभौत्वेव निष्क्रमत इति आचार्य वचनेन विहायाग्नीनिति छंदोगपरिशिष्ट वचनेन चैकार्थत्वाय भारद्वाजवचनमुद्धृत्य यजमानपत्न्योः सह प्रवासं प्रकल्प्योक्तम् । यावन्त्यो ग्राममर्यादा नद्यश्च सीमा अति क्रांतौ नदीश्च संतरन्तौ अग्नीनरणी वान्वारभेयाथाम् । यदि नान्वारभेयातां तदाजस्राः समारूढा वाग्नयो लौकिका भवन्ति । अशक्तविषयेऽन्यतरारंभः कर्तव्यः । अन्यतरान्वारंभाभावे आधानमेव प्रायश्चिम् । नदी लक्षणं केचिद्वर्णयन्ति । कूलद्वयान्तरालं यन्नदीशब्देन चोच्यते । किंतु तद्देशयत्योद्य जलसंघो नदी भवेत् ॥ अष्टौ धनुः सहस्राणि न प्रस्रवति यज्जलं । नदी शब्दाभिधेयत्वं न तस्येच्छंति सूरयः ॥ एकेन नामधेयेन दशयोजनगामियत् । उदकं तन्नदीशब्दवाच्यमित्यपरे जगुः ॥ इति । प्रवासादन्यत्रापि - विनाग्निभिर्यदापत्नी नदीमंबुधि गामिनीं । अतिक्रमे त्तदाग्नीनां विनाशः स्यादिति श्रुतिः ॥ नदीसंतरणे ग्रामयोः परस्परसंक्रमणे सर्वत्राद्यंतसीम्नोर्वा पत्नी यजमानावग्नीनरणीं वान्वारभेयाताम् । अनन्वारंभणेऽग्नीनां लौकिकत्वं स्यात् । तथा

च त्रिकाण्डी । नदीसंतरणेऽग्नीनां सीमासंक्रमणे तथा । सर्वत्रा-द्यंतसीम्नोर्वा स्वामिस्पृष्टाः स्युरग्नयः । प्रत्यक्षं चारणीद्वारमन्य-थाग्नि विनाशनम् ।। आत्मारोपणपक्षे च नान्वारंभणमिष्यते ।। इत्येतदंतं प्रायश्चित्तप्रदीपोक्तम् । अत्रत्योऽग्निबहुत्व शब्दः स्मार्ते एकएव ज्ञेयः । अविकृतमग्न्याधेयं पुनराधानं पदत्रयस्याप्येकए-वार्थः । स्मार्ते पुनःसंधान पदो ज्ञेयः ।।

अथत्रिकाण्डमण्डनोक्तानि अग्निनाशननिमित्तानि लिख्यंते। केषुचिदग्निनाशकेषूक्तेष्वपि पौनरुक्त्यमनादृत्यैव तत्तदर्थं दृढीकर्तुं पृथक्त्वेनान्यसंमतमप्युच्यते । त्रिकाण्डमण्डने । अग्निहोत्रणरहितः पंथानं शतयोजनम् । आहिताग्निः प्रयायाच्चेदग्निहोत्रं विन-श्यति ।। अब्दं स्वयमजुह्वानो ह्रावयेदृत्विगादिना । तस्य स्यात्पु-नराधेयं पवित्रेष्टिमथापि वा ।। हुतेषु पक्षहोमेषु पक्षत्रयमनन्त-रम् । कर्तव्यं पुनराधेयं एतदेव तद्विषयकम् ।। वैधं काष्ठं विनि-र्मथ्य प्रागेवाग्न्युदकादिके । विन्यस्तेऽप्यग्निनाशः स्यादुदयेऽस्त-मये सति ।। नाशभ्रांत्या मथित्वाग्निं पूर्वाग्निं यदि पश्यति। मथित्वाग्नि समारोप्य पूर्वाग्नौ वर्तयेत्क्रियाः ।। मंत्रं विना समा-रूढेऽरण्योरात्मनि वा यदि । तत्र ज्वलनशांतिः स्यादसमारूढ-शांतिवत् ।। एतस्यैवमर्थः ।। समारोपमंत्रेण विना समारोपे कृतेऽ-पि तत्राग्नित्वं नास्ति । तदापूर्वं समारोपार्थेऽग्नौ पुनर्मंत्रेण समा-रोपः कर्तव्यः । एतस्यान्यथात्वेऽग्निनाशः । अकृते समारोपे तस्मिन्नग्नौ नष्टे यथाग्निनाशस्तथात्रापि । अन्यदपि समारोप मंत्रेण समारोपोत्तरमावरोपमंत्रेण विना समारोपित समिदारोपणं कृतमरणीमन्थनं वाकृतं पाणिसमारोपविहितं वाकृतं तत्र च त्रिष्वपि नाग्नित्वं । तत्र समिधि दग्धायां नष्टायां वाग्निनाशः।

अंत्ययोः पक्षयोस्तु अविधिनोत्पादितमग्निं समारोपित मंत्रेण समारोप्य पुनर्मंत्रेणावरोपः कर्तव्यः ।। अत्रार्थे तत्रैव मूलम् । आरूढो पि यथाशास्त्रमवरूढो न शास्त्रतः ।। इति याज्ञिकानुष्ठानमप्येवमेव । तत्रान्योपि विशेषः । एवमविधिनोत्पादितेऽग्नौ होमकाल द्वयोत्तर तृतीय होमकाले प्राप्ते तस्याकृतप्रायश्चित्तत्वात्पुनराधेयं कर्तव्यम् । तदुक्तं तत्रैव । तृतीयहोमकालेतु संप्राप्ते पुनराहितिः । अत्र विशेषः प्रायश्चित्त प्रदीपे - अग्निषूद्वातेषु विधानेनोत्पादितेष्वप्युक्त प्रायश्चित्ताकरणे सति हूयमानेऽप्यग्नि होत्रे अष्टमाग्निहोत्रहोम कालादूर्ध्व मकृतसमत्वादाधानं कर्तव्यं । चतुरात्रमहूयमानोऽग्निः लौकिकः संपद्यत इति वचनात् । अष्टमाग्निहोत्र होमकालात्पूर्वं मेवान्यथा कृतमिति ज्ञातं चे द्विधानेनाग्निमुत्पाद्य यथोक्तं प्राय श्चित्तं कृत्वा कृतानामग्निहोमानामकृतप्रायश्चित्तत्वाद्धोमकाल विच्छेद प्रायश्चित्तं मनस्वतीं हुत्वा प्रतिहोमं च कुर्यादित्युक्तः । अत्राश्वलायनानां यदितूपशाम्येत्पत्न्युपवसेदित्येके एतत्सूत्रवृत्तौ गृहीतोऽपि वा नष्टो द्वादशरात्रमतिक्रान्तस्तत उक्तया क्रियया पश्चाद् गृहीतो भवतीति लिखनादविधानेनोत्पादितेऽपि हूयमानेऽप्यौपासनहोमे द्वादशरात्रादूर्ध्वमकृतसमत्वात्पुनः सन्धानं कर्तव्यं । द्वादशदिन होमकालात्पूर्वमेवान्यथा कृतमिति ज्ञातं चे द्विधानेनाग्निमुत्पाद्य यथोक्तं प्रायश्चितं कृत्वा कृतानामप्यौपासन होमाना मकृतप्रायश्चित्तत्वाद्धोमकालप्रायश्चित्त मनुक्तत्वात्सर्वप्रायश्चित्त मथवानुक्तमन्यतो ग्राह्यमिति वचनात् बौधायनोक्तां मनस्वतीं तदीयपाठेनैव हुत्वा होमविच्छेदप्रायश्चित्तं मनस्वतीं स्वकीय पाठेन चतुर्गृहीतं जुहुयात् । प्रतिहोममेके इत्युक्तत्वात्प्रतिहोमा अत्र कृताकृताः । अत्राग्न्युत्पादनादि प्रायश्चित्तप्रकारोऽग्रे प्राय-

श्चितत्रप्रकरणे वक्ष्यते । पुनस्त्रिकाण्डचाम् । भार्यायां प्रोषितायां चेदुदेत्यर्कोऽस्तमेति वा । तत्र स्यात्पुनराधेय मन्ये त्वाहुरिहान्यथा ॥ ज्येष्ठा चेदग्निसंयुक्ता गच्छंत्यन्या यथारुचि । यजमानेन सहिता यद्वा ता एवकेवलाः ॥ एकस्यामप्यतिष्ठंत्यामग्निहोत्र समीपतः । पतिस्तिष्ठति चेदग्निनाशो नेत्यपरे विदुः ॥ अन्यग्रामान्तरं गत्वा नश्यति क्रमात्रतः । सीमान्तरातिक्रमादेव केवलान्नाशमब्रुवन् ॥ यदोभावप्यतिक्रम्य सीमां प्रत्यागतो पुनः ॥ उदयास्तमयात्पूर्वं न नाशोऽत्रेति केचन ॥ अत्र प्रायश्चित्त प्रदीपेऽप्येवमेवोक्तम् । पुनस्त्रिकाण्डचामेव । छन्दोग परिशिष्टोक्त होमकालात्यये नरः ॥ सीमातिक्रान्तयोर्नश्येन् नोदयास्तमयादिति ॥ विनाग्निभिर्यदा पत्नी नदीमंबुधिगामिनीम् । अतिक्रामेतदाग्नीनां विनाशः स्यादिति श्रुतिः ॥ यदि सीमामतिक्रामेद्विना भर्त्राग्निभिः सह । तत्र नाशं परेत्वाहुर्भयाद्यानेन दुष्यति ॥ किन्तु साग्निर्विना भर्त्रा गत्वा संस्कृतपर्पिषा ॥ हावयेच्चतुरात्तेन प्राप्ते देशे मनस्वतीम् ॥ सायं प्रातस्तनौ होमावेवं यावद्गमनेन्वहम् ॥ वास्तोष्पतीय होमेज्या भवत्यत्राप्यशेषतः ॥ आपद्यपि विनष्टायां विना पत्नी नरान्तरैः ॥ सीमातिक्रमणेऽग्नीनां न कथंचिदनुग्रहः ॥ प्रत्यक्षेण नयन्नग्नीनुच्छ्वसेच्चेद्विनश्यति ॥ यदि नानुच्छ्वसन् हृत्वानिधायोच्छ्वस्यते पुनः ॥ हरेदनुच्छ्वसन्नेव नश्येन्निर्हरणेऽनलः ॥ शकटेनाति दूरं वा हरेद्देशं यथाविधि ॥ स्वांगे नैवाथवा शम्या परासात्प्राङ् नयेच्छ्वसन् ॥ कर्मार्थं हरणेऽग्नीनां नानुच्छ्वासादि चोद्यते ॥ नदीसंतरणोऽग्नीनां सीमातिक्रमणे तथा । सर्वत्राद्यंतसीम्नोर्वा स्वामिस्पृष्टाः स्युरग्नयः । प्रत्यक्षमरणि द्वारं चान्यथाग्नि विनाशनम् । आत्मारोपणपक्षेतु नान्वारंभणमिष्यते ॥

नत्वाप्यारंभणं केचिल्लौकिकार्थं निबन्धनात् ।। जलेन हेतुना वह्निरुपशान्तो यदा भवेत् । कर्तव्यं पुनराधेयं यज्ञपार्श्वे निरूपितं । तदेव पुनराधेयमग्नावनुगते सति ।। असमाधाय चेत्स्वामी सीमामुल्लंघ्य गच्छति ।। असमाधानमनुपस्थानमिति प्रागेवोक्तं ।। श्वपूकर रासभकाक श्रृगालैः कुक्कुटमर्कट शूद्रैः अंत्यजपातकिभिः कुणपैर्वा सूतिकयारजस्वलया । रेतोमूत्रपुरीषैर्वा पूत्यश्रुश्लेष्मशोणितैः ।। दुष्टास्थि मांसमज्जाभिरन्यैर्वातिजुगुप्सितैः ।। आरोपितारणि स्पर्शे कृतेऽग्नेः स्पर्शनेऽपिवा ।। आत्मारूढेषु मज्जेद्वा वदेद्वा पतितादिभिः ।। अथवा योषितं गच्छेदनृतौ काममोहितः ।। वदंत्येषु निमित्तेषु केचिदग्निविनाशनं ।। तत्रारणि गते वह्नौ दुष्टे स्यात्पुनराहितिः ।। पुनराहितिः पुनराधेयं ।। इतरेषु निमित्तेषु त्वग्न्याधेयं प्रचक्षते ।। अग्न्याधेयं पुनराधानं स्मार्ते तदेव पुनः सन्धानम् ।। यद्वा सर्वोपघातेषु पुनस्त्वेति समिन्धनं ।। द्रव्यस्थाद्युपघातेतु द्रव्यशुद्धिः समिन्धने ।। इति त्रिकाण्डमण्डनोक्तानि ।। इदानीं कानिचित्संग्रहोक्तानि लिख्यन्ते । अग्नावनुगते यस्य होमकालद्वयं व्रजेत् ।। उभयोर्विप्रवासे वा लौकिकोग्निर्विधीयते ।। इति यज्ञपार्श्व शौनकयोर्वचनार्थं तत्प्रायेण वृत्तिकारस्यासंमतं । गृहीतोपि वानष्टो द्वादशरात्रमतिक्रान्तस्तत उक्तया क्रियया पश्चाद्गृहीतो भवतीति वृत्तावुक्तत्वात् । एतदीयो विशेषोऽग्न्यनुगमनप्रायश्चित्तस्थले वक्ष्यते । अतो विनासमारूढ ऊर्ध्वं शम्यापरासनात् । हृतोऽग्निर्लौकिको ज्ञेयः श्रुतौ सर्वत्र दर्शनात् । कुरुक्षेत्रादितीर्थानां गमने देशविप्लवे । समारोपं विनैवाग्निं नोद्वहेयुर्विपश्चितः ।। आरोप्याग्नीनरण्योस्तु स्वानुदस्येत्सहाग्निभिः ।। शिक्येनोद्वाहयेदग्नीन् पुनरा-

धानमर्हति ।। ज्येष्ठा चेद्बहुभार्यस्य ह्यतिचारेण गच्छति ।। पुनराधानमत्रैके इच्छन्ति नतु सूरयः ।। विनाग्निभिर्यदापत्नीति कारिकं पूर्वमुक्तम् ।। तत् पत्न्यंतरेऽथ वापत्यौ हुताशनसमीपगे । तदा पत्नी यथाकाम मतिक्रामेन्नदीमपि ।। पत्नी सीमामतिक्रान्ता यजमानो गृहे यदि । आहोमाद्यदि नागच्छेत्पुनराधानमर्हति ।। बौधायनी ० एकत्री ० एकाकिनी यदापत्नी वह्नीनादाय गच्छति । तन्नाशमपरे त्वाहुर्भयाद्यानेन दुष्यति ।। रजोदोषे समुत्पन्ने सूतके मृतकेऽपिवा । प्रवसन्नग्निमान् विप्रः पुनराधान मर्हति ।। बह्वीनामपि चैकस्यामुदक्यायां नतु व्रजेत् । एकादशे चतुर्थेह्नि गन्तु मिच्छन्निमित्ततः ।। त्रयीं मुक्त्वातु योलोभात्प्रवसेत्पर्वसन्धिषु ।। त्रयीमग्नित्रयं । करोति पुनराधानं प्रायश्चित्त मृणादृते ।। नाग्निकार्यस्य वेलायां प्रवसेन्न च पर्वणि ।। न विनाच निमित्तेन क्रीडाद्यर्थं नतु व्रजेत् ।। पूर्वमन्वारंभणमुक्तं ।। लौगाक्षिमते एवं तदभावोऽप्युक्तो नविकल्पः । प्राप्तस्तत्रविशेषतः । उदक्या चेद्भवेत्पत्नी प्रसूता प्रवसत्यपि ।। अन्वारंभविकल्पत्वात्पुनराधिर्न तन्मतात् ।। ज्येष्ठान्वारभते वह्निं बहुभार्यस्यनेतराः ।। नरुच्यैकाकिनी पत्नी प्रयायादग्निभिः सह । राष्ट्रभ्रंशादि संप्राप्तमुचितं यानमीदशम् ।। अन्यथाहि प्रवसंत्यां वह्नयो लौकिकाः खलु ।। राष्ट्रभ्रंशादिगमने प्राप्ते देशे मनस्वतीम् ।। जुहुयाच्चतुरात्तेन स्मार्तेऽग्नौ सर्वसंज्ञिकां ।। सायं प्रातर्हुतेत्सर्वमेवंस्याद्गमनेऽन्वहम् ।। होमद्वयात्यये दर्शपूर्णमासात्यये तथा । पुनरेवाग्निमादध्यादिति भार्गवशासनमितीदं यत्तदाश्वलायननामसंमतम् ।। नित्यहोमे त्वति क्रान्ते संस्कृताज्यं चतुर्गृहीतमाद्वादशदिनान्मनस्वत्या जुहुयादिति कारिकायामुक्तत्वात्तदूर्ध्वं विच्छिद्यतेऽनलः इत्युक्तत्वात् ।

दर्शपूर्णमासात्यये पथिकृच्चरोराम्नानाच्च । पचनाग्नौ पचेदन्नं सूतके मृतकेऽपिवा । अपक्वत्वातु वसेद्रात्रिं पुनराधानमर्हतीति । इदं प्रायेण कात्यायनादि विषयकं नपुनराश्वलायनीयसूत्रकारिकादावनुक्तत्वात् कात्यायनादीनामेवं विधानुष्ठान दर्शनाच्च ॥ भार्यायां चेदित्यादि पूर्वमुक्तं तत्र । पत्न्याः प्रवासविषयं पुनराविरुदाहृता । वाक्यैर्मनीषिभिः प्रोक्तैरेकभार्यस्य नेष्यते ॥ बहुभार्यस्य ज्येष्ठा चे त्प्रवसेत्पुनराहितिः ॥ अथकारिकोक्तम् । तृतीयप्रभृतीनांतु पर्वणामतिपातने । पुनराधानमिच्छंति केचिद्गृह्यविदो जनाः ॥ अत्र मेंगभट्टीयाम् । केचिद्गृह्यपदात्पर्वद्वयात्ययेपि पुनराधेयमुक्तं तन्निर्मूलं । अन्यशाखीयं वा । तत्रैव कारिकायाम् । उभयातिक्रमे कार्यश्चरुः पथिकृतो भवेदित्युक्तत्वात्प्रजापतिवचनेन पर्वद्वयातिक्रमेऽर्धकृच्छ्रप्रायश्चित्ताम्नानात्स्वसूत्रे । आपस्तंब सूत्रे च दर्शपूर्णमासात्यये पथिकृच्चरोराम्नाना च्च केचित्पदस्यैवमर्थः । पर्वद्वयातिक्रमे केचिदग्निनाशमिच्छंति केचिन्न । कारिकायामेव समारूढ समिन्नाशे पुनराधानमिष्यते इति ॥ इत्यारडोपनामक नारायणभट्ट कृते गृह्याग्निसागरे गृह्याग्नि नाशकनिमित्त निरूपणम् ॥

येनकेनापि निमित्तेनाग्निनाशे सति निमित्तानन्तरमेवोक्त प्रकारेण अग्निनाशप्रायश्चित्तं पुनः संधानं वा यद्यद्विहितं तत्तत्कर्तव्यं तत्रकालो नावेक्ष्यः । अग्निविच्छेदकालगणनायां स्मृत्युक्तं प्राजापत्यादि प्रायश्चित्तं च कुर्यात् होमद्रव्यं च दद्यादित्युक्तं प्रागेव । विध्यपराधे प्रायश्चित्तमिति सूत्रात् अनुक्तमन्यतोग्राह्यमिति वचनात् । अप्रायश्चित्तिको यज्ञो ह्यसुरैः संभुज्यत इति बौधायनीयसूत्राच्च । सूत्रवृत्तिकारिकाभ्यः आपस्तंब बौधायन-

सूत्रादिभ्यश्च विविच्य कानिचित्प्रायश्चित्तानि लिख्यन्ते ॥ तत्र विध्यपराधे प्रायश्चित्तिरिति आश्वलायन । सूत्रम् एतद्व्याख्यादिक मापस्तंबीय भाष्यादुक्तं । तदेव विधिशब्देन विहितमुच्यते । विहितस्याकरणेऽन्यथाकरणे च प्रायश्चित्तिः कर्तव्या । प्रायो विनाशः चित्तिः सन्धानं । विनष्टसंधानं प्रायश्चित्तिरित्युक्तं भवति । तथा च विध्यपराधे सति विहितमस्ति चेत्तदेव कर्तव्यम् । नास्ति चेद्व्याहृति होमः कर्तव्यः । एतदेवभूर्भुवःस्वः स्वाहेत्येवं रूपं सर्वप्रायश्चित्त मुच्यते । एवं च सति यथा कथंचिद्विधि संपादने प्रायश्चित्ताभाव उक्तो भवति । प्रायश्चित्तकालस्तु निमित्तानंतरमेवेत्युत्सर्गः । विहितस्य द्रव्यस्य स्वरूपतोऽभावे प्रतिनिधिः स्वीकार्यः । क्वचित्स्वरूपसत्तायामपि प्रकृतकार्याशक्तौ प्रतिनिधिरेव स्वीकार्यः । तथाचार्थद्रव्ययो विरोधेऽर्थो बलीयानिति सूचितं भवति । इदं चापरं सामर्थ्ये सति गुणसंपादनार्थं न प्रतिनिधिरूपा दातव्याः । द्रव्यगुणविरोधे द्रव्यं बलवत् एतदुक्तं भवति । यत्कार्यार्थतया यद्विहितं तस्य तत्कार्याशक्तौ तत्प्रतिनिधिरूपं तत्कार्यकरणाय स्वीकर्तव्यम् । तथा च प्रतिनिधि प्रयोगेऽपि विहितस्वरूपा पराविध्यपराधशंकया प्रायश्चित्तं न कर्तव्यम् । तत्र सएव विध्यर्थः फलितो भवतीति । तथा विनष्ट संधानं द्विविधम् । प्रत्यक्षमतींद्रियं च । तत्राद्यं यथा । आयतनादपगतस्य वह्नेः पुनः स्थापनं । स्कन्नस्य हविषो ग्रहणयोग्यस्य पुनर्ग्रहणम् । द्वितीयंतु होमजपादिभिर्यत्रातींद्रियसंधाने होमादि न विहितं तत्र सर्वप्रायश्चितमवश्यं कर्तव्यमिति । वृत्तिकृतोक्तेयं नीतिः । स्थालीपाकं च जुहुयाद्दधि सक्तून्जुहोति इत्यादिष्टे द्रव्ये तेन तेन होमः । अंजलिना जुहुयात् शूर्पेणेत्यादिष्टे तेन तेन

होमः । अत्र स्मार्ते कर्मणि अनादेशे । द्रव्यानादेशे आज्यं द्रव्यं । अनुक्त साधने स्रुवः साधनं । यद्वो देवा ऋचा ब्रह्मा जुहुयाच्च स्रुवाहुतिमित्यादिष्टे कर्तरि तेन तेन होतव्यम् । अनादिष्टे कर्तरि ब्रह्माभावे च यजमान एव जुहुयात् । स्मार्ते कर्मण्यनादेशे स्वयं कर्तेत्युक्तत्वात् । यजमानस्तु जुहुयाद्ब्रह्माभावे स्रुवाहुतिमित्युक्तत्वाच्च । यत्र यत्र ग्रहणोक्तिः तत्र तत्र ग्रहणसंख्ययादाय जुहुयात् । चतुर्गृहीतेन द्वादशगृहीतेनेत्यादि ग्रहणं संख्ययोक्तिः । अनादिष्टग्रहणसंख्यास्थाने स्रुवगृहीतेनैव होमः । एवं विचार्य विलोक्य प्रारब्ध करिष्यमाणं वा कर्म यथा सांगफलदं च भवति तथा कर्तव्यम् । तत्र वक्ष्यमाणे प्रायश्चित्तादौ प्रधानयागात्पूर्वमुत्तरं वा हविर्दोषादावित्यादिषु सर्वत्र यागशब्देनाग्नय इदं नमम । अग्नीषोमाभ्यामिदं नमम सूर्यायेत्येवं रूपो याग उच्यते । देवतोद्देशेन् द्रव्यत्यागो याग इति मीमांसकानां सिद्धान्तात् । याज्ञिकानुष्ठानमप्येवमेव । एतादृशे यागे देवतोद्देशेन त्यक्तस्य द्रव्यस्य योऽग्नौ प्रक्षेपः स एव होमो यागोपलक्षकः । तस्मिन् यागोपलक्षकहोमे येन मंत्रेण होमः क्रियते तस्य मंत्रस्य होमांगत्वं न पुनः प्रधानत्वं । एतेन वृत्यादि सर्वश्रौतग्रन्थेषु आग्नेयपुरोडाशादाग्नेय याज्यानुवाक्याभ्यां होमे कृतेऽपि अग्नीषोमाभ्यामिदं नममेत्येवं रूपे त्यागे कृते सति सोऽग्नीषोमीयको यागो भवतीति न पुनराग्नेययागः । इदं सर्वं श्रौतसूत्र तृतीयाध्याये । अथाग्नेय्य इष्टय इति खण्डवृत्तौ देवतेऽनुवाक्ये एतस्मिन् स्थले स्पष्टमेव । अन्येष्वपि श्रौतसूत्रग्रन्थेष्वप्येवमेव । तस्मात्सर्वत्राप्यनेनैव न्यायेन यस्यै च देवतायै हूयते तस्या अन्यस्यै देवतायै त्यज्यते अथवा कस्या अपि भ्रमादज्ञानाद्वा न त्यज्यते एतादृशे सर्वत्रापि स्थले केवलेन होम-

भात्रेणैव स यागो न भवति तत्र सर्वत्र तत्र तत्रोक्तप्रकारेण पुन र्यागस्तत्रत्य होमांगे मंत्रे विगुणे सति सम्यक्कृतेन त्यागेन ज्ञाते यागे तत्र पुनः पाठादिरूपप्रायश्चित्तेनैव सिद्धिः। न पुनर्यागः होमांगमंत्र विगुणत्वात्पुनरवदानादिरूपा यागावृत्तिः। प्रधानस्या- वैगुण्यत्वात्। गुणानुरोधेन प्रधानावृत्तिरन्याय्येति न्यायाच्च। उक्तगुणकेन मंत्रेणोक्तगुणकेन द्रव्यादिना वा कृतेपि होमे त्याग- वैगुण्ये सति पुनस्तेनैव मंत्रेण द्रव्यादिना च पुनर्मंत्रेण होमादि- गुणोपेतो याग आवर्तनीयः प्रतिप्रधानं गुणावृत्तिरिति न्यायात्। एतादृशस्य प्रधान यागस्य अग्निसमिंधनार्थमन्वाधानेध्माहरणा- द्यंगमाज्यभागादिहोमरूपं। अपिच तदंगजातं द्विविधम्। आरादुप- कारकं सन्निपत्योपकारकं च। तत्रारादुपकारकस्यांगस्य लोपे कर्मसमाप्तेः प्राक्प्रायश्चित्तं विधाय तत्तदंगं कुर्यात्। कर्मसमाप्तौ प्रायश्चित्तमेव नांगावृत्तिः॥ संनिपत्योपकारकस्य द्रव्यसंस्का- ररूपस्य लोपे प्रधाननिष्पत्तेः प्राक् सर्वस्यापि करणम्। प्रधान- यागोत्तरं प्रायश्चित्तमेव नावृत्तिः। कर्ममध्ये पतितानि प्रायश्चि- त्तानि संस्कृताज्येन कर्तव्यानि। तदभावे स्मार्तवदाज्यसंस्कारः स्रुक्स्रुवसंमार्गश्च परिसमूहन पर्युक्षण परिस्तरणानि तथांतः पाति प्रायश्चित्ते कर्तव्यानीति केचित्। तत्र स्मार्तवदाज्यसंस्का- रमेव। अमुकनिमित्तं प्रायश्चित्तं करिष्ये इति संकल्प्य अग्नि प्रज्वाल्य परिसमुह्य परिस्तीर्य पर्युक्ष्य सपवित्रे आज्यपात्रे आज्य- मानीयोदगंगारेष्वधिश्रित्योल्मुकेनावज्वल्य द्वे दर्भाग्रे प्रत्यस्य त्रिः पर्यग्निकृत्वोल्मुकं निरस्याप उपस्पृश्याथान्यदपि आज्यपात्रे आज्य मानीय सवितुष्ट्वेत्युत्पूय पवित्रे पोक्ष्यानलेक्षिपेदग्नेः पश्चादाज्यं संस्थाप्य स्रुक्स्रुवौ संमृज्य स्रुवश्चेत्स्रुवमेव। तदुक्तं प्रायश्चित्त

कृत्वा परिस्तरणानि विस्रस्य परिसमुह्य पर्युक्ष्य विष्णुस्मरणं च ।।

अथाग्नीनामुद्धरणस्य कालः ।। पुरादित्यस्यास्तमयात्पुरादित्यस्योदयादिति बौधायनाचार्येणोक्तत्वात् विहरणानंतरमेवास्तमयोदयौ यथा भवतस्तथा विहरेत् । अर्धवृक्षसूर्ये आविः सूर्ये वेत्यापस्तंबेनोक्तं । उदयास्तमयात्पूर्वं उद्धरणस्य कालः । स एव प्रादुष्करणस्येत्यवगम्यते । आश्वलायन सूत्र वृत्तौतु उत्सर्गेऽपराह्णे गार्हपत्यं प्रज्वाल्येत्यत्रापि अपराह्णशब्देनाह्नः चतुर्थो भागो गृह्यते विहरणकालत्वेन गार्हपत्यं तंप्रादुष्कृत्य प्रज्वाल्येत्येवेत्युक्तं । तस्याग्निहोत्रेण प्रादुष्करण होमकालौ व्याख्यातौ । इत्यत्र प्रादुष्करण कालः अपराह्णे गार्हपत्यं प्रज्वाल्येत्यनेन व्याख्यात एव । प्रातर्व्युष्टायामुपस्युदितायामादित्योदयात्तस्मिन् काले सर्वशाखा प्रत्ययमेकं कर्मेति वचनात् बौधायनोक्तेः आपस्तंबोक्तेर्वा कालेऽग्नेः प्रादुष्करणं कार्यम् । प्रादुष्करणं प्रबोधनं । तदकरणे सर्वप्रायश्चित्तं कर्तव्यं । प्रायश्चित्त विशेषाम्नानात् उद्धरणतुल्यत्वादनुद्धरणप्रायश्चित्तं कर्तव्यं । प्रायश्चित्त विशेषाम्नानात् उद्धरणतुल्यत्वादनुद्धरणप्रायश्चित्तं वा कार्यम् । तच्च पृथक्त्वेन कर्तव्यं ।। होमेन सह वा कर्तव्यं। होमेन सह पक्षे प्रयोगः । होमकाले प्रादुष्करणाकरण निमित्त प्रायश्चित्तपूर्वकं सायंप्रातर्होमं करिष्ये इति संकल्प्य होम द्रव्यसंस्कारात्पूर्वं संस्कृताज्येन सर्वप्रायश्चित्तं स्रुवेण हुत्वा होम द्रव्यसंस्कारादि प्राप्तहोमं समापयेत् । अथवा अथैकेषां यस्याग्नि मनुद्धृतं सूर्योभिनिम्लोचेदभ्युदियाद्वा मनोज्योतिर्जुषता - त्रय स्त्रिꣳशतं तव इति द्वे चतुर्गृहीतेन जुहुयादितिआ पस्तंबसूत्रात्। ॐ मनोज्योतिर्जुषता-घृतेन स्वाहा । मनसे ज्योतिष इदं ।। ॐ त्रयस्त्रिꣳशत्तंतवो—प्येत्वस्मात्स्वाहा ।

देवेभ्य इदं। एवं वा हुत्वा पूर्ववत्कुर्यात्। दीपे — अग्निहोत्रहोमस्योदयानन्तरं मस्तमयानंतरं च मुख्यः सायं प्रदोषांतः प्रातः सगवान्तोत्रा मुख्यः कालः। सायं होमस्य निशा सर्वा गौणकालः। प्रातर्होमस्यसर्वमहर्गौणकालः॥ आप्रातराहुतिकालात्सायमाहुतिकालो नातीयादासायमाहुतिकाला- त्प्रातराहुतिकाल इति बोधायनसूत्रं। आपत्सु गौणकालेऽपि कुर्वन् प्रायश्चित्त नाचरेत्। अनापदि गौणकाले न कुर्यात्। कुर्याच्चेद्य- थोक्तं प्रायश्चित्त कुर्यात्। रजन्याः सायं चतुर्थो भागः प्रदोषः। दिवसस्याद्यश्चतुर्थो भागः सगव इति दीपिकोक्तं। अस्तमिते होम इत्याश्वलायन सूत्रं। अस्तमिते होमः कर्तव्यः अंगान्यपि प्रधान काल एव कर्तव्यानि। यत्पुनरंगविहरणं स्वकालविशिष्टं तत्स्वकाल एव कर्तव्यं। विहरणशब्देनात्र प्रादुष्करणं। एवं प्रात- रुपोदयं व्युषितउदिते वा उपोदयमादित्योदय समीप इत्यर्थः। उषिते उषस्युदिते इत्यर्थः। उदिते आदित्ये आदित्यमण्डले कृत्स्न उदित इत्यर्थः। एते त्रयः प्रातर्होमप्रधानकालाः। तत्र यद्युपोदय उदित इत्युच्यते उदित आदित्ये सत्युदयसमीप इति द्वाभ्यामेक एव कालो विहितः स्यात्तद्भ्रांति निवृत्यर्थं व्युषितशब्दात्पूर्वमुपो- दयशब्दं पठितवानाचार्यः॥ एतेषु त्रिषु कालेषु प्रधानं यथासंप- द्यते तथांगानामेवोत्कर्षो द्रष्टव्यः॥ प्रदोषान्तो होमकालः संग वांतः प्रातरित्यत्र प्रदोषांतो नाम फलितोऽर्थः। अष्टौनाडिकाः संगवान्तः। प्रातरित्यत्र दशनाडिकाः इत्यर्थः। अतोऽस्तमिते उदिते च विहितो होम एतावति काले क्रियमाणोऽतीतकालो न भवतीति पुनः पुनः कालावधिः तमतिनीय चतुर्गृहीतमाज्यं जुहु- यादित्यत्र उक्तहोमकाले त्वतिक्रमे प्रायश्चित्तं स्वसूत्रोक्तं औपासन

प्रयोगस्थले लिखितं बौधायनसूत्रोक्तं वा कुर्यात् । तत्र स्वसूत्रे यदि सायं दोषावस्तर्नमः स्वाहेति यदि प्रातः प्रातर्वस्तर्नमः स्वाहेति ।। अत्रैवं प्रयोगः ।। उक्त कालातिक्रमनिमित्त प्रायश्चित्त पूर्वकं सायमौपासन होमं करिष्ये । इति संकल्प्य । होमद्रव्य संस्कारात्पूर्वं स्मार्तवदाज्यं संस्कृत्य स्रुक् स्रुवौ संमृज्य दर्व्यां चतुर्गृहीतं गृहीत्वा ॐ दोषावस्तर्नमः स्वाहा । अग्नय इदं । हौम्य संस्कारादि होमं समापयेत् । एवं प्रातरुक्त कालातिक्रमनिमित्त प्रायश्चित्त पूर्वकं प्रातरौपासन होमं करिष्ये इति संकल्प्य पूर्ववच्चतुर्गृहीत्वा ॐ प्रातर्वस्तर्नमः स्वाहा । अग्नय इदं । पूर्ववद्धौम्यं समापयेत् । बौधायन सूत्रोक्तं कालातिक्रम प्रायश्चित्तं प्रयोगस्थल एवोक्तं । यद्यनस्तमितेऽस्तमित भ्रांत्याऽग्निहोत्रं जुहोत्यकाले हुतस्याहुतसमत्वात् तस्मिन्नेवाग्नौ पुनः सांगो होमः कर्तव्यः । प्रादुष्करणस्यकाले कृतत्वान्नपुन स्तत् । होमानंतरं यजमानः – भवतं नः समनसौ समोकसावरेपसौ । मायज्ञ ँ हि ँ सिष्टं मायज्ञपतिं जातवेदसौ शिवौ भवतमद्यनः । इत्यग्निमुपतिष्ठते । यदि प्रातरुदयात्पूर्वमुदित भ्रांत्या चेदेवमेव प्रायश्चित्तं दीपिकोक्तमिदं ।। अत्रापस्तंबसूत्रं । यदि प्रागस्तमया ज्जुहुयात्पुनरेवास्तमिते हुत्वा भवतंनः समनसावित्युपतिष्ठेतेति प्रादुष्करणादूर्ध्वं होमात्पूर्वं यदि यजमानोऽश्नीयाद्भक्षयेद्वा तस्मिन्नैवाग्नौ – यत्ते वयं पुरुषत्रा यविष्ठा विद्वाँसश्चकृमा कच्चनागः । कृधीष्वस्माँअदितेरनागाव्येनाँसिशिश्रथो विष्वगग्नेस्वाहा ।। १ ।। यथाह तद्वसवो गौर्यंचित्पदिषितामपुंचता यजत्राः । एवात्वमस्मत्प्रमुंचाव्यँहः प्रातार्यग्ने प्रतरान्न आयुः स्वाहा ।। २ ।। इति द्वेस्रुवाहुतीजुहुयात् । उभयत्राप्यग्नये स्विष्ट-

कृत इदं ।। समिधावादध्याद्वा ऋचौ जपेत् । उपसमिंधनादूर्ध्वं सायमाहुतेऽग्निहोत्रेनाश्नीयादिति कात्यायन वचनात् । दीपानुसारेणेदमुक्तं । अत्रापस्तंब सूत्रं । अहुतेष्वग्निषु यजमानोनाश्नीयाद्यत्ते वयं यथाहृतदित्याहुती जुहुयात् समिधावादध्याज्जपेदित्येके । इति । येनकेन चिन्निमित्तेन प्रातर्होमो नलब्धश्चेत्तदा तस्मिन्दिने भोजनं त्यजेत्तथा सायं होमो नलब्धश्चेत्तस्यां रात्रौ भोजनं त्यजेत् । अत्र एतावदेव प्रायश्चित्तं । अत्र त्रिकाण्डयां । सायं होमो न लब्धश्चेत्तस्यां रात्रावभोजनं । प्रातर्होमो न लब्धश्चेत्तदहर्भोजनं त्यजेत् । तावता होमसिद्धिः स्यान्नप्रायश्चित्त मिष्यते । छंदोगानां हि केषांचित् गृह्ये कथितमीदृशं ।। इति । प्रायश्चित्तप्रदीपेऽप्येवमेव । अग्न्यनुगमनोत्तरमविधानेनाग्नावुत्पादिते उक्तप्रायश्चित्ताकरणे सति हूयमानेपि औपसन होमे द्वादशदिन होमकालादूर्ध्वमकृतसमत्वात्पुनः संधानं कर्तव्यं ।। आद्वादशदिनादेवमूर्ध्वं विच्छिद्यतेऽनलः इति कारिकावचनात् । द्वादशदिनात्पूर्वमेवान्यथा कृतमिति ज्ञातं चेद्विधानेनाग्निमुत्पाद्य यथोक्तं प्रायश्चित्तं कृत्वा कृतानामौपासनहोमानामकृत प्रायत्वाद्धोमविच्छेदप्रायश्चित्तं मनस्वतीं हुत्वा प्रतिहोमं कुर्यान्नवा प्रतिहोमंकुर्यात्प्रतिहोममेके इति सूत्रात् । इदं सर्वं बौधायनसूत्र दीपानुसारेणोक्तम् । तत्र चतुरात्रमहूयमानोऽग्निर्लौकिकः संपद्यत इति स्थितम् । अत्र स्वगृह्य कारिकायां – आद्वादश दिनादित्युक्तो विशेषः सोत्र लिखितः सतु सद्भिर्युक्तायुक्तो विचारणीयः ।। औपासनहोमे आहुत्योः संसर्गे जाते सति । यत्र वेत्थ वनस्पते देवानां गुह्या नामानि । तत्र हव्यानि गामयेति समिधमाधायेत्येतत्प्रायश्चित्तं ।। अत्रापस्तंब सूत्रं । यदि चोत्तरया पूर्वामभि

जुहुयात् यत्र वेत्थ वनस्पत -- गामयेति वानस्पत्ययर्चा समिधमाधायेति । पूर्वस्यामाहुत्यां हुतायामुत्तराहुतिस्कन्दने प्येतदेव प्रायश्चित्तं । यदि पूर्वस्यामाहुत्यां हुतायामुत्तराहुतिः स्कन्देदिति सूत्रं ।। यत्नं विना स्वयमेव प्रज्वलितेऽग्नौ वक्ष्यमाणं कारिकोक्तं प्रायश्चित्तं ज्ञेयम् ।। होमविषये समारूढेऽग्नौ नप्रादुष्करण प्रायश्चित्तं । अग्निषु समारूढष्वनुद्धरण प्रायश्चित्तं नेष्यत इति दीपे उक्तत्वा दुद्धरण तुल्यं प्रादुष्करणमिति प्रागेवोक्तं । सर्वत्र समारोपे कृते सति अवरोपोत्तरं होमकाले समारोपनिमित्तं प्रायश्चित्तं बौधायनमतान्मनस्वतीं हुत्वा कालप्राप्तं होमं कुर्यात् । होमविषयेऽनापदि पक्षहोमकरणे अग्नये तन्तुमते स्थालीपाकं । अशक्तौ पूर्णाहुतिं वाजुहुयात् इत्येतत्प्रायश्चित्तं ।। अनापदिपक्ष होमकरणे तन्तुमतीष्टिः प्रायश्चित्तमिति दीपे उक्तत्वात् । आत्मा रोपपक्षे ये नियमाः प्रागुक्ता स्तत्र मज्जनमैथुने विहायान्यनियमातिक्रमे मनस्वती मंत्रजपः प्रायश्चित्तमुक्तं दीपे । मज्जनमैथुनकरणे त्वग्निनाशः प्रागेवोक्तः । तत्र पुनः सन्धानं प्रायश्चित्तं ।। अग्नेरन्याग्निना संसर्गे वक्ष्यमाण कारिकोक्तं प्रायश्चित्तं ज्ञेयं । तत्र विशेषो बौधायनमतात्केवल परस्पर संसर्गे मनस्वत्येव प्रायश्चित्तमित्युक्तं दीपे । अग्नीनां विष्ठादिभि रत्पो पहतौ येन केनापि कारणेनाग्नीनां दौर्बल्ये सति समारोप्य मथित त्वात् त्रिहविः पवमानेष्टिः कर्तव्येति दीपे उक्तवात् अग्नेर्विष्ठा द्युपहतौ अग्नये पवमानायाग्नये पावकायाग्नये शुचय इति प्रधान देवतात्रयस्यैक स्थालीपाकः । पूर्णाहुतित्रयं वा प्रायश्चित्तं कुर्यात् । सर्वत्राग्ने रत्पोपहतौ पुनस्त्वेति समिदाधानमेतयैव स्रुवाहुतिश्चाग्ने कारिकाप्रकरणोक्तस्थले वक्ष्यते । यजमानः पत्नीवाग्नीन् विहाय

संवत्सरमतिक्रम्य प्रवसेद्यदि तदा तयोः पवित्रेष्टिः प्रायश्चिमिति सूत्रे दीपे चोक्तत्वान् । पवित्रेष्टि देवताकः स्थालीपाकः कर्तव्यः। यएवाहिताग्नेः पुरोडाशास्त एवौपासनिकस्य चरव इत्युक्त-त्वात् । तत्र प्रधानादि दश । अग्नये पवमानाय । तत्र प्रथम तृतीय पंचमसप्तम नवमाः पृथक्पंच चरवः ।। अथवा पंचदेवताको विंशति मुष्टि निर्वापात्मक एक एव चरुः । द्वितीय चतुर्थ षष्ठा ष्टमदशमान्याज्य देवताकानि । तत्रान्वाधाने क्रमः । आज्य-भागांतेऽग्निं पवमानं चरुद्रव्येण सरस्वतीं प्रियामाज्येनाग्निं पावकं चरुद्रव्येण सवितारं सप्तप्रसवमाज्येनाग्निं शुचिं चरुद्रव्येण वायुं नियुत्वंत माज्येन अग्निं व्रतपतिं चरुद्रव्येण विष्णुं शिपिविष्ट-माज्येनाग्निं वैश्वानरं चरुद्रव्येण दधिक्रावाणमाज्येन अग्निं स्विष्ट कृतं हुतशेषेणेत्यादि । निर्वापकाले । अग्नये पवमानाय त्वा जुष्टं निर्वपामि ।। अग्नये पावकाय जुष्टं निर्वपामि । अग्नये शुचये जुष्टं । अग्नये व्रतपतये जुष्टं । अग्नये वैश्वानराय जुष्टं ।। प्रोक्ष णमप्येवमेव । प्रधानहोमकाले क्रमः ।। ॐ अग्नये पवमानाय-स्वाहा ।। सरस्वत्यै प्रियायै स्वाहा । अग्नये पावकाय । सवित्रे। सप्तप्रसवाय । अग्नये शुचये । वायवे नियुत्वते । अग्नये व्रतपतये। विष्णवे शिपिविष्टाय । अग्नये वैश्वानराय । दधिक्राव्णे स्वाहा । यथालिंगं त्यागः । चरुहोमेऽवदानधर्मेणाज्यहोमोक्त दर्व्या चतु-र्गृहीतेन । स्विष्टकृति उपस्तरणाभिघारणेनैवाज्यावदानसिद्धि रापस्तंबीय दर्शपूर्णमासयो रुपांशुयागे दृष्टत्वात् । बौधायनीय दर्शपूर्णमासयोरुपांशुयागे दष्टत्वात् । तथा पवित्रेष्टौ अध्वर्युर्जु-ह्वामुपस्तीर्य दक्षिणपुरोडाशस्योत्तरार्धात् सकृदवद्य ध्रौवाज्या देकवारमवद्यति नपंचशः । अनेकयागसाधनद्रव्यस्य स्विष्टकृदव-

दानमेकवारमेवंकार्यमिति भगवता जैमिनिनोक्तत्वात्। ततः पुरोडाशानामेव उत्तराधादवद्यद्विरभिघारयति इत्युक्तत्वात् अत्रापि तन्मते पूर्वंदर्व्यामुपस्तीर्य प्रथमचरुभागोत्तरार्धात् सकृदवदायाज्यस्थाल्या एकवारमेवाज्यमादाय शिष्टानां चतुर्णां चरुभागानां सकृत्सकृदवदाय द्विरभिघार्य होमः। युक्तमयुक्तं वा सद्भिर्विचारणीयमेतत्। इति पवित्रेष्टिस्थालीपाकः॥

समारोपस्थले अवरोपोत्तरमकृते समारोपेऽग्निनाशश्चेत् होमकालद्वयमध्ये चेत्स्मरणं तदा कारिकोक्तं वक्ष्यमाणमग्न्यनुगमनप्रायश्चित्तं कुर्यात्। तृतीये होमकाले चेत्स्मरणं तदा पुनः संधानं कर्तव्यं। तत्र ज्वलनशांतिः स्यादसमारूढशांतिवत्। तृतीये होमकालेतु संप्राप्ते पुनराहितिरिति त्रिकाण्डचामुक्तत्वात्। अवरोपोत्तरकृते समारोपे जातो योऽग्निनाशः एतस्य प्रमादादिकमग्निनाशत्वं परिकल्प्य प्रयोगरत्ने- प्रमादादिकाग्निनाशे पुनःसंधानमुक्तं। तदत्र कृतं चेत्तदा सर्वाण्यप्यग्निनाशकानि प्रामादिकान्येव जातानि। तदा समाधानं समारूढशांतिवज्जलेन वह्निरुपशांतो यदा भवेत्। होमकाले धार्योऽनुगतश्चेत् इत्यादीनां अग्निनाशनिमित्तानां न कोपि विशेषः। तथा समारूढशांतिवदित्यत्र - तृतीये होमकालेतु संप्राप्ते पुनराहितिः। समारूढसमिन्नाशे पुनराधेयमिष्यते॥ इत्यादीनां प्रायश्चित्तानामपि न प्रयोजनं। तत्रापि प्रयोगरत्ने। अयाश्चेत्याहुतिः पत्न्युपवासश्चेदं यत्तत् चिंत्यं॥ द्वयोर्मध्येऽन्यतरत् कर्तव्यमिति प्रतिभाति। होमकालेंऽतरागमने वक्ष्यमाणं दुर्गागणप्रायश्चित्तं ज्ञेयं। वह्नीनामेकदेशापहारे मनस्वतीत्युक्तं प्रायश्चित्तचंद्रिकायां। इदं सर्वत्रापि ज्ञेयं। सर्वत्रापि प्रयत्नं विना प्रज्वलितेऽग्नौ स्वयमग्निज्वलन

निमित्तं प्रायश्चित्तं। ॐ उद्दीप्यस्व —— दिश स्वाहा। ॐ मानोहि ७ सीज्जातवेदो गामश्वं पुरुषं जगत्। अबिभ्रदग्न आग हि श्रियामापरिपालयस्वाहा।। द्वयोरप्यग्नयइदं। केचिन्न स्वाहा कारं कुर्वंति। स्वयंज्वलेच्चेदुद्दीप्यस्वेति द्वाभ्यां समिद्द्वयमिति कारिका दीपेप्येवमेव।। अग्निनाशस्थले ये उपघाता उक्ता स्त-त्राग्न्युपघातनिमित्तं पुनस्त्वेति समिधमाधारये।। ॐ पुनस्त्वा दित्या रुद्रा वसवः समिधतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः।। घृतेन त्वं तनुवो वर्धयस्व सत्याः सन्तु यजमानस्य कामाः स्वाहा। आदित्येभ्यो रुद्रेभ्यो वसुभ्यो ब्रह्मभ्य इदं।। आधेयस्योपघातेतु पुनस्त्वेतया समिदिति कारिका। बौधायनसूत्रमतादेतयैवर्चा स्रुवाहुतिरधिका। कानिचिद्धोमविषयकानि प्रायश्चित्तानि स्था-लीपाकादि विषयक प्रायश्चित्तमध्ये लिखितानि कारिकाक्रमभंग भयात्।। इत्यारडोपनामक नारायणभट्टकृते गृह्याग्निसागरे औपासन होमविषयक प्रायश्चित्त निरूपणं।।

इदानीं स्थालीपाकादि विषयक प्रायश्चित्तानि।।

तत्र येनकेनापि निमित्तेन दर्शपूर्णमास स्थालीपाकयोः स्व-कालेऽनारंभे यएवाहिताग्नेः पुरोडाशस्त एवौपासनिकस्य चरव इति न्यायात्। विभ्रष्टेष्टिवत् स्थालीपाकं पूर्णाहुतिपक्षं स्रुवा-हुतिपक्षं वा कृत्वा कालांतरे स्वकाले वा आरभेत् इष्टिपूर्णाहुति स्रुवाहुतीनां पूर्वं पूर्वं विधि बलीयांसमिति बौधायनसूत्रात्। तत्रा ग्निरिन्द्रः सोम इति देवतात्रयम्।। अन्वाधानानन्तरं तिलरहितं कोशीधान्यं न भक्षयेत्। निश्यधः शयीतां दंपती मैथुनं नव्रजेन्मा-षादि न भक्षयेत्।। स्मृतिचन्द्रिकायां पुलस्त्यः।। सकृत्पर्वणि सर्पींषि हविष्यं लघुभोजनम्।। न सायं नोपवासः स्यात्तैलामिष

विर्वाजितमिति ।। अत्र विशेषमाहापस्तंबः ।। अतृप्तिश्चान्नस्य यथैतयोः प्रियं स्यात्तदेतस्मिन्नहनि भुंजीयातामधश्च शयीयातामा त्मानमिति ।। अत्रवर्ज्यान्याह हारीतः ।। माषं मसूरं मधु मांसं परान्नं मैथुनान्यहनि वर्जयेदिति ।। व्रत्यमहरन्वाधानदिनं ।। भरद्वाजोऽपि । वर्जयेत्पर्वकालेतु स्त्री तैलामिषगृंजनं । सांख्यायनोऽपि । कलहं क्रीतविक्रीतं प्रहासं बहुभाषणं । तौर्यत्रिकं वृथाशय्यां यक्ष्यमाणो विवर्जयेत् ।। जाबालिरपि ।। कथंरकान्कुलित्थांश्च वर्जयेत्कोद्रवांस्तथा ।। अनृतं बहुवादं च क्रयं विक्रयमेवच । दन्तशौचं च पूर्वेद्युर्यागस्यैतानि वर्जयेत् ।। मसूरं लवणं क्षारांश्चणका न्कोरदूषणान् । माषान्मधु परान्नानि वर्जयेदौपवस्तके ।। गृह्य परिशिष्टेऽपि ।। शाकं मांसं मसूरांश्च वरकान्कोरदूषकान् ।। माषान्मधुपरान्नानि वर्जयेत्पर्वणि द्विजः ।। बौधायनोऽपि । सर्वमेतदध.शायी कौशीधान्यं च वर्जयेत् ।। अन्यत्र तिलेभ्य इति ।। एतन्नियमातिक्रमे । कारिकोक्तमग्नये व्रतपतये स्थालीपाकं कुर्यात् ।। अन्वाधानानंतरं प्रधानभागात्पूर्वं ग्रहणं चेत्तदा प्रधान यागात्पूर्वमाज्यभागोत्तरं ।। ॐ उदुत्यं जातवेदसं — सूर्यं स्वाहा । सूर्यायेदं ।। चित्रं देवानां–तस्थुषश्चस्वाहा । सूर्यायेदं ।। एतद्द्वयं सूर्यग्रहे ।। नवो नवो भवति — दीर्घमायुः स्वाहा ।। चन्द्रमस इदं ।। यमादित्या अᳪशुमाप्याययंति यमक्षितमक्षितयः पिबन्ति ।। तेननो राजा वरुणो बृहस्पतिराप्याययन्तु भुवनस्य गोपाः स्वाहा ।। चन्द्रमस इदम् ।। इत्युक्तमापस्तंबीय भाष्यम् ।। अत्र स्रुवेणा ज्येन होमः । अत्र बौधायनीय सूत्रतो दीपतश्च विशेषः ।। सर्वत्र हविर्यज्ञे वितते सूर्याचन्द्रमसोर्ग्रहणेप्युद्वयंतमस - उदुत्यं- चित्रं देवानामिति त्रिभिः स्रुवाहुतीर्जुहुयात् । इत्युक्तत्वादुभयोर्ग्रहणेऽ-

ष्येकमेव प्रायश्चित्तं । न सूर्यस्येदं न चन्द्रमसइदमिति व्यवस्था ।। उद्वयं तमसस्परि — रुत्तम० स्वाहा ।। सूर्यायेदं । उदुत्यं — चित्रंदेवानामिति द्वयंतु प्रागेवोक्तं ।। सर्वत्रवितते यज्ञकर्मणि यजमानश्च ऋत्विजश्च स्वप्ने रेतोविसर्गश्चेदिमंमेवरुण तत्वायामीति द्वेस्रुवाहुती हुत्वा गंधपुष्पोपहारादिभिः सूर्यमभ्यर्च्य पुनर्मामैत्विन्द्रियमित्यृचं जपेत् ।। तृचेन स्रुवाहुतीर्जुहुयाद्वा समिधो वाभ्यादध्यादिति बौधायनसूत्रदीपयोरुक्तत्वात् अन्वाधानानन्तरं यजमानस्य स्वप्ने रेतो विसर्गे प्रधानयागात्पूर्वं इमंमे वरुण तत्वायामीति मंत्राभ्यां स्रुवाहुती जुहुयात् । गंधपुष्पादिभिः सूर्यमभ्यर्च्य पुनर्मामै त्विन्द्रियं पुनरायुः पुनर्भगः ।। पुनर्द्रविणमैतुमां पुनर्ब्राह्मणमैतुमाम् ।। यन्मेद्यरेतः पृथिवी नमस्कारान् यदोषधीरस्य सरघ आपः । इदं तत्पुनराददे दीर्घायुत्वाय वर्चसे ।। यन्मे रेतः प्रसिच्यते यन्म आजायते पुनः ।। तेनमाममृतं कुरु तेनमासुप्रजसं कुरु । इति । बुद्धिपूर्वे रेतउत्सर्गे अग्नये व्रतपतये स्थालीपाकं कुर्यात् । अन्वाधानानंतरं । अथरज्जुं प्रकुर्वीतेत्यादि निधायोपरि चान्यांश्च परिस्तृत्यादि सिद्धये इत्येतदन्तेन कारिकायामुक्तेन । इध्माबर्हिषी सन्नह्योपरि निदध्यातां तच्चोपरि निधानं श्रौते मंत्रेण स्मार्ते तूष्णीं दर्शपूर्णमासादिषु मंत्रेण । उपरि निहितं शाखाबर्हिरिध्मादि यद्यधो निपतेत् । ब्रह्मप्रतिष्ठाइत्येतया पुनः स्वस्थाने तत्प्रतिष्ठाप्य तयैव स्रुवाहुतिं जुहुयात् ।। हुत्वा वा प्रतिष्ठापयेदिति सूत्रे दीपेचोक्तत्वात् । बर्हिरिध्मादि उपरिनिहितं यद्यधो निपतेत्तदा । ब्रह्मप्रतिष्ठा मनसो ब्रह्मवाचो ब्रह्मयज्ञाना० हविषामाज्यस्य । अतिरिक्तं कर्मणो यच्चहीनं यज्ञः पर्वाणि प्रतिरन्नेतिकल्पयन्स्वाहाकृताहुतिरेतु देवान्स्वाहा ।। इत्येतया पुनः

स्वस्थाने तत्प्रतिष्ठाप्य एतयैव स्रुवाहुतिं जुहुयात् ।। ब्रह्मण इदं त्यागो हुत्वा वा प्रतिष्ठापयेत् ।। एवमन्येष्वपीति सूत्रं एतस्यार्थो दीपे एवमन्येष्वपि नैमित्तिकेषु सर्वत्र व्यापन्नमतिक्रांतं कर्म पुरस्तादुपरिष्टाद्वा प्रायश्चित्तानंतरं कर्तव्यं ।। सामान्यमेतत् । अस्यापवादः । अतिक्रान्तं कर्म नाद्रियेत यद्यर्थं लुप्तं भवतीति सूत्रं एतस्यार्थो दीपे - प्रमादात्पूर्वमंगमकृत्वोत्तरस्मिन्नंगे कृते पुनः पूर्वमंगं न कर्तव्यं। यदि प्रयोजन शून्यं भवति तत्र प्रायश्चित्तमेव । यथा शाखाछेदनमकृत्वा छिन्नशाखया वत्सापाकरणे कृते पुनः शाखाछेदनं न कर्तव्यं प्रयोजनाभावात् । एवं लूनस्य लवनं खातस्य खननं अवहतस्यावहननं । पिष्टस्यपेषणं । दग्धस्य दहन मित्यादिवचनादृतेन कर्तव्यं । केचिदर्थलुप्तेष्वपि मंत्रोच्चारण मिच्छन्ति । छिन्न लूने तथापिष्टे सान्नाये मार्तिके तथा । पश्चान्मंत्राः प्रयोक्तव्या मंत्रा यज्ञार्थ साधका इतिवचनात्येतान्युदाहरणान्यवलोक्य तथास्मार्तेष्वानीयंते । यथावहतांस्तण्डुलान्गृहीत्वा तेषां कर्मणि स्वकाले संस्कारार्थमवहननं कर्तव्यं । तद कृत्वोत्तरं कर्म कृतंचेत्तदाप्रायश्चित्तमेव कर्तव्यं ।। नपुनरवहन नस्यावहननं ।। श्रवणाकर्मणि पुरोडाशस्थले पिष्टस्य पेषणं । दग्धस्य दहनं । यथा वा इध्माधानमकृत्वा प्रधानहोमे कृते तदुत्तरं तस्य स्मरणे कृते सइध्मः प्रयोजन शून्यो जातस्तत्र प्रायश्चित्तेनैव सिद्धिर्नपुनरिध्माधानं तस्य प्रधानयागार्थमग्निसमिंधनार्थत्वात् । आज्यभागोत्तरं तस्य स्मरणेतु विपर्यासप्रायश्चित्तपूर्वकमिध्माधानं कृत्वा प्रधानयागः कर्तव्यः । तत्राथ ब्रह्मणो होत्राचमनेत्यस्मिन् खण्डे विपर्यसेंतरिते मंत्रे एतत्सूत्र वृत्तौ सर्वप्रायश्चित्तं कर्तव्यमिति उक्तत्वात् सर्वप्रायश्चित्तमत्र कर्तव्यमथवा

वक्ष्यमाणं बौधायनोक्तं बिपर्यासप्रायश्चित्तं कर्तव्यं ।एतादृश स्थले सूत्रवृत्ति कारिकोक्तं यद्वोदेवा इति व्युत्क्रमनिमित्त प्रायश्चित्तं भवति निमित्तानां परिमितत्वात् । सर्वत्र द्रव्यै दर्वीकूच प्रस्तर विधृति परिधिर्बर्हि पवित्र वेदोपवेषेध्म द्रव्यसंभारगणां छेददाहोपघातेषुविनाशेवान्थालिंगं कृत्वा यथालिंगमुपसाद्यत्वमग्ने अयासि प्रजापते इति द्वाभ्यां स्रुवाहुती जुहुयादिति सूत्रात्प्रयोगाच्च । बर्हिरिध्मादि छेदे दाहे विण्मूत्राद्युपहतौ नाशेवान्यं तद्रूपं तज्जातीयं तत्परिमाणाहँ कृत्वा तथासदयित्वा स्रुवाहुती जुहुयात् । ॐ त्वमग्ने अयास्ययासन्मनसा हितः । अयासन्हव्यमूहिषे यानोधेहि भेषज९स्वाहा । अग्नये अयसइदं ।। प्रजापते नत्वदे — रयीणा९ स्वाहा । प्रजापतय इदं ।। पवित्रनाशे मिंदा दिगणो वा प्रायश्चित्तमित्युक्तं दीपे सतु मिंदादिगणो नात्र लिखितः ।। कारिकायां । पवित्रनाशे स्यात्पवित्रवते चरुरिति प्रायश्चित्ताम्नानात् । सर्वत्रेध्माबर्हिरादीनां संभाराणां प्रयाजादीनामंगानां चन्यूनकरणे वचनादृते वर्धनेच यत्पाकत्रेति स्रुवाहुतिं जुहुयादिति । सूत्रदीपाभ्यामिध्माबर्हिषो र्न्यूनातिरेके — यत्पाकत्रा मनसा दीनदक्षा — जाति स्वाहा । अग्नयइदं । इध्माबर्हिषो रधिकं त्याज्यं न्यूनं संपाद्यं । सर्वत्रप्रणीता प्रोक्षण्यादिविध्युपात्त जलानां ह्रियमाणानां मादितानां वा बिंदुपातेच चमसादिस्रावे आपोहिष्ठा इति तृचमुक्त्वा तत्पात्रं पूरयित्वा ततंम आपस्तदु — तर्भुवः स्वाहा । ऋभुभ्यइदं ।। अत्रापस्तंबसूत्रं । यदि प्रणीतास्कंदेयुरुपदस्येयुर्वा आपोहिष्ठा इति तिसृभिः पुनर्गृहीत्वा ततंमइत्याहुतिं जुहुयादिति ।। बोधायनमतस्य सुगमत्वात् । अग्निहोत्रेऽधिश्रिते मार्जार वाराहपिकादिभिरंतरागमने द्वादशगृहीतेन स्रुचं पूरयित्वा जात-

वेदसे मनोज्योतिरिति द्वाभ्यां महाव्याहृतिभिस्तिसृभिरिति पंचभिर्दुर्गादिगणं जुहुयात् मनस्वतीं च । पुरुषादिभिरंतरागमनेप्येतदेव प्रायश्चित्तमित्युक्तमग्निहोत्रस्थले प्रायश्चित्तदीपे उक्तत्वात् । प्रायश्चित्तदीपे एवं दर्शपूर्णमासस्थले सूत्रेच — हवींषि यत्रकुत्रचित् स्कन्नछिन्नभग्ननष्टदुष्ट विपरीत क्षरणस्यंदन स्रावित पतित स्फुटितादि निमित्तेषु । आव्यजश्वानबिडालकाकखरमृगपशुपक्षि सरीसृपादिष्वग्नीनामन्तरागमने ऋत्विजांत्रांतरागतेषु द्वादशगृहीतेन स्रुचं पूरयित्वा दुर्गा मनस्वती महाव्याहृतिभिश्च तिस्रो जुहुयादित्युक्तत्वात् । स्मार्तेऽपि संभावित निमित्तेषु ऋत्विगग्न्योरंतरागमने द्वादशगृहीतेन स्रुचं पूरयित्वा दुर्गादिगणं जुहुयात् । नात्र पुनरिष्टिर्मनस्वती सात्वौपासन स्थल एव अग्निहोत्र प्रकरणे लिखितत्वात् ।। ॐ जातवेदसे — त्यग्निः स्वाहा ।। दुर्गाया इदं ।। मनोज्योति — घृतेनस्वाहा मनसेज्योतिषइदं ।। भूरग्नयेच पृथिव्यै च महते च स्वाहा ।। अग्नये पृथिव्यै महत इदं ।। भुवो वायवे चान्तरिक्षायचमहते च स्वाहा ।। वायवेऽन्तरिक्षाय महत इदं ।। सुवरादित्यायचदिवेच महते च स्वाहा ।। आदित्याय दिवे महत इदं ।। दुर्गागणोऽयं ।। औपासन होमकालेऽन्तरागनेपीदं ज्ञेयं ।। तत्र पुनर्मनस्वतीष्टिरिति विशेषः । अत्र पारिजाते विशेषः । पाराशर प्रायश्चित्त काण्डे — । द्वौ विप्रौ ब्राह्मणाग्नीवा दंपती गोद्विजोत्तमौ । अंतरेण यदा गच्छन् कृच्छ्रं सांतपनं चरेदिति एतत्कर्मकालविषयं ।। कर्मकालेतु विशेषस्तत्रैव ।। होमकाले तथादोहे स्वाध्याये दारसंग्रहे ।। अंतरेण यदागच्छेद्विजश्चांद्रायणं चरेत् । दोहे सान्नायाद्यंगभूते एतच्चाभ्यासविषयं ।। आज्याधिश्रयणार्थाग्नावुद्वाते योनित उत्पाद्या

हवनीये मनस्वतीं जुहुयादिति दीपे उक्तत्वादग्नेः पुनरंगारानपोह्याग्नौ मनस्वतीं जुहुयाद्यजुः पाठेन ।।

गृह्याग्निकारिकायां तृतीयाध्यायोक्तानि स्मार्तप्रायश्चित्तानि ।। एवंगुण — पुण्यतिथौ व्याधितत्वपरिहारार्थं षडाहुति चरुहोमं करिष्ये । तथंबाहुतरत्वपरिहारार्थं यक्ष्मगृहीतत्व परिहारार्थं षडाहुति चरुहोमं करिष्ये इति संकल्प्याग्निमुपसमाधाय तदंगमन्वाधानं करिष्ये । अस्मिन्नन्वाहिनेऽग्ना वित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वाऽत्रप्रधानं यक्ष्महणं पंचवारं चरुद्रव्येण शेषेण स्विष्टकृत मित्यादि सद्यो यक्ष्ये । परिसमूहनादि पूर्णपात्र निधानांतं कृत्वाऽग्नेः प्रत्यक् पवित्रवति शूर्पे चतुरश्चतुरोमुष्टीं स्तूष्णीं निरूप्य तथैव प्रोक्ष्यावघातादि चरुश्रपणांतं कृत्वाऽज्यसंस्काराद्याज्यभागांतेऽवदान धर्मेणावदाय मुंचामित्वेति पंचर्चस्यसूक्तस्य प्राजापत्यो यक्ष्मघ्नो महेंद्र स्त्रिष्टुप् अंत्यानुष्टुप् राजयक्ष्मनाशन प्रधानचरुहोमेविनियोगः । ॐ मुंचामि त्वा — ।। १ ।। यदि क्षितायुः — ।। २ ।। सहस्राक्षेण — ।। ३ ।। शतं जीव शरदो — ।। ४ ।। आहार्षंत्वा — ।। ५ ।। पंचसु यक्ष्मनाशनायेद ।। षष्ठं स्विष्टकृतं ।। ततः स्विष्टकृदादि होमशेषं समापयेत् ।।

अथाशुभस्वप्न दर्शन सूचितारिष्ट परिहारार्थं प्रायश्चित्तं करिष्ये ।। अद्यान इति मंत्रद्वयस्य आत्रेयः श्यावाश्वः सविता गायत्री । दुःस्वप्न दर्शन सूचितारिष्ट परिहारार्थे सूर्योपस्थाने विनियोगः ।। ॐ अद्यानो देवसवितः — ।।१ ।। विश्वानि देव — आसुव ।।२।। यच्चगोषु दुःस्वप्न्यं — ।। १ ।। निष्कं वाघा कृणवते — ।। २ ।। तदन्नाय तदपसे — ।। ३ ।। यथाकलां यथाशफं — ।। ४ ।। अजैष्मा द्या सनामचा — ।। ५ ।। यद्वा ।

योमेराजन्नित्यस्य शौनको गृत्समदो वरुणस्त्रिष्टुप् । दुःस्वप्न दर्शनारिष्ट निरासार्थे सूर्योपस्थाने विनियोगः ।। ॐ योमेराजन्युज्यो - ।। १ ।। क्षुतादिनिमित्तकदोषपरिहारार्थं सुचक्षा इति मंत्रजप करिष्ये । स्नात्वा पीते क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे ।। आचान्तः पुनराचामेद्वासो विपरिधाय च ।। इति याज्ञवल्क्यवचनात् ।। द्विराचमनपूर्वकं मंत्रं जपेदिति । क्षुते जृंभितेतु जृंभादिनिमित्तकादि दोषपरि — ।। अमनोज्ञदर्शननिमित्तक — ।। पाप गंधाघ्राण निमित्तक । अक्षिस्पंदन निमित्तक — ।। कर्णध्वनि निमित्तक दोष — ।। तस्मिंस्तस्मिन्निमित्ते संकल्पा ज्ञेयाः ।। सुचक्षा अहमक्षीभ्यां भूयासं सुवर्चा मुखेन । सुश्रुत्कर्णाभ्यां मयि दक्षक्रतू इति ।। षण्णां निमित्तानामयमेव मंत्रः ।। अगमनीयागमने ।। अगमनीयागमन निमित्तकदोषपरिहारार्थं पुनर्मामैत्विति द्वाभ्यां आज्याहुती होष्यामीति आज्यहोमपक्षे । समिदाधानपक्षे तु समिधौ होष्यामीति । जपपक्षेतु जपं करिष्ये । अगमनीयागमनं तु रजस्वलाभार्यागमनं निषिद्धतिथ्यादौ स्वभार्यागमनं वा ।। अयाज्ययाजननिमित्तकदोषपरि — ।। अयाज्ययाजने अयान्यस्तु न्यस्तार्तिज्यः ।। अभोज्यभोजने । अभोज्यभोजननिमित्तक दोष — ।। अभोज्यभोजनं तु लशुनादि गणकान्नादिच ।। अप्रतिग्राह्येतु । अप्रतिग्राह्य प्रतिग्रहनिमित्तक — ।। अप्रतिग्राह्यं शस्त्र विषादि ।। चैत्ययूपोपघातेतु ।। चैत्ययूपोपघातनिमित्तक — ।। चैत्ययूपोपघातः ।। अग्निचयनस्थयूपस्पर्शः ।। — । एतेषुनिमित्तेषु पुनर्मामैत्विन्द्रियं पुनरायुः पुनर्भगः ।। पुनर्द्रविणमैतुमां पुनर्ब्राह्मण मैतुमां स्वाहा ।। इमेये धिष्ण्यासो अग्नयो यथास्थानमिह कल्पतां ।। वैश्वानरो वावृधानोंतर्यच्छतु मे मनो हृद्यंतरमृतस्य केतुः

स्वाहेति ।। अव्याधित स्वापकालीनादित्यास्तमयनिमित्त कर्मणि
तु । अव्याधितस्वापकालीनादित्यास्तमयजनितप्रत्यवाय परिहा-
रार्थं प्रायश्चित्तं करिष्ये इति संकल्प्य । विहितकर्मा श्रांतस्वा-
पकालीनादित्योदयनिमित्त कर्मणि तु । विहितकर्माश्रांतस्वाप-
कालीनमादित्योदयजनित प्रत्यवाय परिहारार्थं प्रायश्चित्तं करि-
ष्ये । येन सूर्येति पंचर्चस्यसौर्योऽभितपाः सूर्यं आद्या जगती
द्वितीया त्रिष्टुप् अंत्यास्तिस्रो जगत्यः । सूर्योपस्थाने विनियोगः ।।
उदितेतुयस्यते विश्वेति चतुर्णां सौर्योऽभितपाः सूर्यो जगती सूर्यो
पस्थाने विनियोगः ।। आगारोपरि कपोतोपवेशनादि निमित्तक
कर्मणि तु । आगारोपरिकपोतोपवेशनसूचितारिष्टपरिहारार्थं
देवाः कपोत इति सूक्तेन प्रत्यृचमाज्याहुजीर्होष्यामीति होम
पक्षेतु । जपपक्षे देवाः कपोत इति सूक्तजपं करिष्ये इति विशे-
षः । देवाः कपोत इति पंचर्चस्य सूक्तस्य नैर्ऋतः कपोतो विश्वेदेवा
जगती । आगारोपरि कपोतोपवेशन सूचितारिष्टनिरासार्थं होमे
जपेवा विनियोगः । कपोतस्यागारसमीपगमने तु कपोतागारसमीप
गमन सूचितारिष्टपरिहारार्थंमिति विशेषः ।। ।गारं गृहं ।
अर्थार्थंगमननिमित्त कर्मणि तु अर्थसिध्यर्थं वयमुत्वा पथस्यत
इति प्रत्यृचमाज्याहुतीर्होष्यामीति । जपपक्षेतु वयमुत्वापथः
सूक्तजपं करिष्ये । इति विशेषः । वयमुत्वेति दशर्चस्य सूक्तस्य
बार्हस्पत्यो भारद्वाजः पूषागायत्री । अष्टम्यनुष्टुप् अर्थसिध्यर्थ
होमे — ।। पूषणइदमिति त्यागः । अथ नष्टलाभार्थं कर्मणि तु ।
नष्ट लाभार्थं संपूषन्विदुषेति दशर्चस्य सूक्तस्य बार्हस्पत्यो भार-
द्वाजः पूषागायत्री । नष्ट लाभार्थं होमे । प्रज्ञाहीनत्वेतु प्रज्ञा-
कामोऽहं संपूषन्नित्यादि होमो जपोवा पूर्ववत् ।। महाध्वादि गमन

निमित्तकर्मणि तु । महाध्वादि गमन संभावितानेकदुःखपरिहा-
रार्थं संपूषन्नध्वन इत्यादि पूर्ववत् ।। संपूषन्नध्वन इति सूक्तस्य
घोरः कण्वः पूषागायत्री महाध्वगमन भयपरिहारार्थे जपे -- होमे
विनि — ।। ॐ संपूषन्नध्वनः ।। भयंकरमार्गगमने तु मार्गे भय
निवृत्यर्थमिति विशेषः ।। व्याधितत्वपरिहारार्थं चरुहोमाद्येतदंतानां
प्रयोगाणां मूलकारिका तृतीयाध्याये आदित आरभ्य ज्ञेयं ।। सूत्र
तृतीयाध्यायेऽप्येवमेव ।।

अथाग्न्यनुगमन प्रायश्चित्तं ।। तत्राग्न्यनुगमनोत्तरमाचम्य
प्राणानायम्यौपासनाग्नेरनुगमन निमित्त प्रायश्चित्तं करिष्ये इति
संकल्प्य ।। अत्र प्रायश्चित्तस्य पक्षत्रयं पत्न्युपवासः यजमानो
पवासः आज्याहुतिश्चेति । तत्र सुगमत्वादादावाज्याहुतिरेवोच्यते ।
आयतनाद्भस्मापोह्य आयतनमुपलिप्योल्लिख्य श्रोत्रियागारादग्नि
मादाय भूर्भुवः स्वरोमिति प्रतिष्ठाप्य परिसमुह्य परिस्तीर्य
पर्युक्ष्याज्यं संस्कृत्य स्त्रुवं संमृज्याऽ याश्चेति विमदोयाळग्निः
पंक्तिः औपासनाग्न्यनुगमन निमित्तप्रायश्चित्ताज्यहोमे विनियोगः ।
ॐ अयाश्चाग्ने — भेषजं स्वाहा अग्नये अयस इदं सर्वप्रायश्चित्तं
करिष्ये भूर्भुवःस्वः स्वाहा प्रजापतय इदं ।। परिस्तरणानि विसृ-
ज्य पर्युह्य कालप्राप्तहोमं कुर्यात् ।। इदं प्रायश्चित्तमेकादशदिन
पर्यंत मग्निनाशेपि समानमेव तदूर्ध्वं लाजाहोमादियुक्तं पुनःसंधा
नमेव । पत्न्युपवास पक्षेतु औपासनाग्न्यनुगमननिवृत्तमुपशांत
मौपासनाग्नि पत्न्युपवास प्रायश्चित्तेन पुनरुत्पादयिष्ये ।। इति
संकल्प्य पूर्ववदग्नि प्रतिष्ठाप्य कालप्राप्तं होमं कुर्यात् ।। तत्प-
त्नीतु तस्माद्धोमकालादारभ्यान्यहोमकालपर्यंतमुपवसेत् । यज-
मानोपवासपक्षे प्येवमेव ।। अत्र द्वादशरात्रपर्यंतमिदमेव प्राय-

श्चित्तमित्युक्तं । नन्मूलं तु सूत्रं । नित्यानुगृहीतः स्याद्यदितू पशाम्येत्पत्न्युपवसेदित्येके । एतत्सूत्रवृत्तौ यदि प्रादुष्करण उद्वासयेत्तत्रान्यस्माद्धोमकालात्पत्न्युपवसेदित्येके । एकग्रहणाद्यजमान उपवसेदित्येके । अयाश्चाग्ने इत्येकामाज्याहुतिं जुहुयादित्येके । अतः शास्त्रांतरदर्शनात् ।। अन्येतु पूर्वसूत्रमेवं व्याचख्युः नित्य शब्द उक्तार्थः नित्यमाचमनमिति यथा । अनुशब्दः पश्चाद्वचनमेतदुक्तं भवति । यदि वैवाह्यो नगृहीतः दायविभागकालेगृह्यते । गृहीतो पि नष्टो द्वादशरात्र मतिक्रान्त. तत उक्तयः क्रियया पश्चाद्गृहीतो भवतीति ।।

तत्र विवाहाज्याहुतयो लाजाहुतयो गृहप्रवेशनीयाज्याहुत यश्च हृदयांजनं भवति नान्यत् ।। कन्यासंस्कारत्वात् । होमद्वयं चात्र समानतंत्रं स्यात् । लाजाहोमोत्र पत्न्यंजलिना कार्यः तद्धोमे तस्य सान्नतरत्वेन दृष्टत्वात् । लाजावपनं तु स्वयमेव करोति न भ्रात्रा ।। प्रायश्चित्त विषये कारिकापि ।। औपासनोनुगच्छेच्चेदुपलेपादि पूर्ववत् ।। आहृत्य श्रोत्रियागारात् प्रतिष्ठाप्य हविर्भुजं ।। अन्यस्माद्धोमकालात्स्त्री नाश्नीयाद्यदिवा गृही ।। पर्यूहनादि वा शक्तौ संस्कृत्याज्यं च पूर्ववत् ।। अयाश्चेत्यनयाहुत्या यथापूर्वं जुहोत्यथ ।। इति । सर्वप्रायश्चित्तंतु परिभाषा प्राप्तं ।। सर्वत्र समस्तव्याहृतिभिरेकाज्याहुतेः सर्वप्रायश्चित्तमिति संज्ञा ।। अग्नावनुगते यस्य होमकालद्वयं व्रजेत् । उभयोर्विप्रवासे वा लौकिकोग्निर्विधीयत इति ।। यद्यज्ञगार्ग्व शौनकयोर्वचना त्पूर्वार्धं तत् प्रायेण वृत्तिकारस्य नाभिमतं । गृहीतोऽपि वानष्टो द्वादशरात्रस्तत उक्तया क्रियया पश्चाद्गृहीतो भवतीति वृत्तावुक्तत्वात् । उक्तया क्रियया नाम लाजाहोमादियुक्त पुनःसन्धानेनेत्यर्थः ।

औपासनाग्नेरनुगमन प्रायश्चित्तं वृत्तिकृदभिप्रायेणेदं लिखितं ॥ अथ ग्रंथांतराभिप्रायेणतु स्वयुक्त्या चान्यदेवात्र विचार्यंते । तदेवौपासनाग्नेरनुगमनस्थले नित्यानुगृहीतः स्याद्यदि तूपशाम्येत् पत्न्युपवसेदित्येके । इत्येतत्सूत्रवृत्तौ गृहीतोऽपि नष्टो द्वादशरात्रमतिक्रान्तः ततउक्तया क्रियया पश्चाद्गृहीतो भवतीति । अनया वृत्तिकृदुक्त्या द्वादशरात्रपर्यंतमयाश्चाग्नेत्यनेनैव पक्षेण यत्प्रायश्चित्तमुक्तं तदग्नावनुगते यस्य होमकालद्वयं व्रजेत् । उभयोर्वि प्रवासे वा लौकिकाग्निर्विधीयते इति स्मृतिचन्द्रिकायां शौनक वचनस्य ऋषिदृष्टत्वादेव तस्यैव वचनस्य यज्ञपार्श्वे लिखितत्वात् बहूनामनुग्रहो न्याय्य इति न्यायात् । वृत्तिकृदुक्तिकाया पौरुषत्वेन दुर्बलत्वात् गृह्यकारिकायामेकरात्रादिदिनमर्यादानुक्तत्वात् । द्वादशरात्रमनेनैव प्रायश्चित्तेन सिद्धिरित्यतिप्रसंगेन लोकविद्विष्टत्वाच्चोपेक्षणीयम् ॥ अत्र कश्चिदापस्तंबीयानां सुदर्शनभाष्य कारमते सार्वकालिकमयाश्चेति पाक्षिकं प्रायश्चित्तमुक्तं तदेव शाखांतरीयत्वादिदमस्त्विति चेद्रुदिष्यति तर्हि सर्वदा एतावदेव प्रायश्चित्तं भवतु द्वादशरात्रमित्येव मर्यादा नकार्येति ममतु प्रतिभाति ॥ सद्भिर्युक्तमयुक्तं विचारणीयमेतत् । अस्मिन्पक्षेऽग्न्यनुगमनोत्तरं होमकालद्वयपर्यन्तमेवायाश्चेति प्रायश्चित्तं तदूर्ध्वं लाजाहोमादियुक्तं पुनःसंधानं कार्यमिति विशेषः । पत्न्युपवास स्वयमुपवास पक्षयोस्तु सुतरामयं नियम इत्यलं प्रसंगेन ॥ इत्यौपासनाग्न्यनुगमन प्रायश्चित्तम् ॥

अन्वाहिताग्न्यनुगमनप्रायश्चित्तम् ॥ अन्वाहिताग्नेः प्राग्यागादनुगमने तु पूर्ववदग्निमुत्पाद्य अन्वाहिताग्नेः प्राग्यागादनुगमननिमित्तं पुनरन्वाधानं करिष्ये इति संकल्प्य व्याहृतिभिः समि-

धावाधाय भूर्भुवःस्वरित्युपस्थाय सर्वप्रायश्चित्तं हुत्वा स्थालीपाकं कुर्यात् । अत्र कारिका अन्वाधाने कृतेयागात् प्राक्चेदनुगतो भवेत् प्रायश्चित्तमिदं कृत्वा पुनरन्वादधात्यथ ।। व्याहृत्याख्यै रुपस्थेय इति बौधायनाशयः ।। आज्याहुतिं च जुहुयाद्भूर्भुव स्वरितीह तु इति ।। अन्वाधानोत्तरं प्रयाणनिमित्तकर्मणि तु ।। अन्वाहिताग्नि प्रायाणनिमित्तं तुभ्यंता इत्याज्याहुतिं करिष्ये । तुभ्यंता इत्यस्यांगिरसो विरूपोऽग्निर्गायत्री ।। अन्वाधानोत्तर प्रयाणनिमित्तकाज्याहुतिहोमे विनि - ।। ॐ तुभ्यं ता अंगिरस्तम विश्वाः सुक्षितयः पृथक् । अग्नेकामाययेमिरेस्वाहा ।। अग्नय इदं ।। इति हुत्वोक्तविधिनाग्नि समारोप्य गच्छेत् ।। अत्र सूत्रं ।। अन्वाहिताग्नेः प्रयाणोपपत्तौ पृथगग्नीन्नयेयुः तुभ्यंता अंगिरस्तमेति वा आज्याहुतिं हुत्वा समारोपयेत् ।। अत्र कारिका ' अन्वाधाने कृते पश्चादग्निमारोपयेद्यदि ।। तुभ्यंता इत्यृचाहुत्वा वह्निमारोपयेत्ततः ।। इत्येवमन्वाहिताग्निः प्रयाणोपपत्तौ तुभ्यंता इत्यृच हुत्वा समारोप्य गच्छेत् ।। एवन्मवाहिताग्निरहुत्वेति सूत्रात् । सर्वत्राज्यहोमे आज्यसंस्कारः स्रुवसंमार्गश्च ज्ञेयः ।। श्रौतसूत्रे प्रवासोपस्थाने खण्डवृत्तावाज्याहुतिं जुहुयादित्यत्राज्यग्रहणादाज्यसंस्कारस्योक्तत्वात् ।। औपासनहोमलोपनिमित्तेतु औपासनहोमलोप जनित प्रत्यवाय परिहारार्थं मनस्वत्या चतुर्गृहीतंहोष्यामीति संकल्प्य स्रुचि चतुर्गृहीतं गृहीत्वा । ॐ मनोज्योति — मनसे ज्योतिष इदं ।। सर्वेषां जातानां होमलोपानामेकैकाहुतिः ।। वृत्तौ केचित्प्रतिहोमौ वा । अत्राप्यतीत होमानामनुष्ठानं कृताकृतं ।। द्वादशरात्रपर्यंतमेवेदं । तदूर्ध्वं चेदग्निनाशः । तत्र नित्यहोमेत्वतिक्रान्ते संस्कृत्याज्यं च पूर्ववत् ।। चतुर्गृहीत्वाचाज्यं च मन-

स्वत्या जुहोत्यथेति कारिका ।। अग्निहोत्र होमे च प्रतिहोममेके इति सूत्रात् । आद्वादशदिनादेवमूर्ध्वं विच्छिद्यतेऽनलः ।। प्रायश्चित्तं तु यत्प्रोक्तमग्नित्यागोपपातके ।। मनुना तत्प्रकुर्वीत तत्तत्कालानुसारतः ।। त्रैमासिकं गोवधोक्तं त्यक्त्वाग्नेर्निष्कृतिर्भवेत् ।। चांद्रायणं वा होमस्य दानं वापि समाचरेत् ।। संवत्सरं तु त्यक्ताग्निः कुर्याच्चांद्रायणं व्रतमित्यादि कारिका ।। विच्छन्नाग्नौतु तत्र यावत्कालविच्छिन्नाग्नि दोषजनित प्रत्यवायपरिहारार्थं तद्दिन संख्योक्तं प्रायश्चित्तं हौम्यदानं च कृत्वाविच्छन्नस्य गृह्याग्नेः पुनः संधानं करिष्ये इत्यादि पुनःसन्धानप्रकरणे उक्तमपि प्रकरणादत्रोक्तम् ।।

स्थालीपाकत्रयातिपातननिमित्तेतु । स्थालीपाकत्रयातिपातेन विच्छिन्नस्य गृह्याग्नेः पुनरुत्पत्यर्थं पुनराधेयं करिष्ये । तथा समारूढसमिन्नाशेऽपि समारूढसमिन्नाशेन विच्छिन्नस्य गृह्याग्नेः पुनरुत्पत्यर्थं पुनराधेयं करिष्ये इति संकल्प्य । उभयत्रापीदं पुनराधेयं पुनःसंधानात्कर्मांतरं तस्य विधिर्जयन्तमतेनोच्यते ।। पूर्वोक्तवत्संकल्प्याग्न्याधेयिक संभारान् यथासंभवमाहृत्य तेषु संभारेषु श्रोत्रियादिगृहादाहृतमग्निं प्रतिष्ठाप्य पर्यूहनादिकं कृत्वोक्तवदाज्यं संस्कृत्य स्रुवेणायाश्चेत्यनयैकयाज्यं जुहुयात् । अत्र कारिका । तृतीयप्रभृतीनां तु पर्वणामति पातने ।। पुनराधेयमिच्छंति केचिद्गृह्यविदो जनाः ।। एतन्मूलं हिरण्यकेशी गृह्यसूत्रे । यदि पार्वणो विच्छिद्येत तस्मिन् पथिकृतेन याजयेद्यदि द्वौ वैश्वानरेण पथिकृतौ यदि बहून्पुनराधेय इति । समारूढ समिन्नाशे पुनराधेयमिष्यते ।। वक्ष्यामि पुनराधेयं जयंतस्वामिनो मतं । अग्न्याधेयक संभारान् यथासंभव माहरेत् ।। उपलेपादिकं कृत्वा

संभारान्निदधाति तान् ।। संभारेष्वादधात्यग्निं श्रोत्रियादिगृहाहृतं ।। पर्युहनादिकं कृत्वा संस्कृत्याज्यं च पूर्ववत् ।। स्रुवेण जुहुयादाज्यमयाश्चेत्यनयैकया ।। इति ।। तत्रोभयातिक्रमे उभयातिक्रमनिमित्तं अग्नये पथिकृते स्थालीपाकं करिष्ये इति संकल्प्य। अग्नये पथिकृते त्वा जुष्टं निर्वपामि । इति सर्वं स्थालीपाकवत् । तत्र कारिका । उभयातिक्रमे कार्यश्चरुः पथिकृतो भवेदिति । स्थालीपाकातिक्रमेण तु पौर्णमास स्थालीपाकातिपत्तिजनित दोषपरिहारार्थं पथिकृन्मुखस्थालीपाकं करिष्ये । तथादर्शे तु दर्शस्थालीपाकातिपत्तिजनितदोषपरिहारार्थमिति विशेषः ।।

अन्याग्नौ स्वयं यजने तु अन्याग्नौ स्वयं यजननिमित्तमिति विशेषः ।। स्वाग्नावन्ययजने तु स्वाग्नावन्ययजननिमित्तमिति विशेषः । चतुर्ष्वपिनिमित्तेषु अग्नये पथिकृते स्थालीपाकमिति सर्वमुभयाति क्रमवत् । तत्र कारिका । स्थालीपाके त्वतिक्रान्ते यद्यन्याग्नौ स्वयं यजेत् ।। स्वाग्नावन्यो यजेद्वापि कार्यः पथिकृतश्चरुरिति ।। यद्यमावास्यायां पौर्णमास्यां वा तीयाद्यदि वान्यस्याग्निषु यजेत यदि वा स्वान्योग्निषु यजेतेति सूत्रम् ।। अग्नि पथिकृतस्थालीपाकस्थाने पूर्णाहुति पक्षे तु पथिकृतस्थालीपाकस्थाने पूर्णाहुतिं होष्यामीति संकल्प्य स्रुचि द्वादशगृहीतेनाज्येनाग्नये पथिकृते स्वाहेति पूर्णाहुतिं जुहुयात् । स्रुवपूर्णाहुति पक्षे तु स्रुव पूर्णेनाज्येन अग्नये पथिकृते स्वाहेति जुहुयात् । तत्र कारिका । आज्यं द्वादशकृत्वस्तु गृहीत्वा पूरयेत् स्रुचं । तयावाज्याहुतिः कार्या सा पूर्णाहुतिरिष्यते ।। स्रुवपूर्णाहुतिर्वास्यादिहैके याज्ञिकाविदुरिति ।। इष्टिपूर्णाहुति स्रुवाहुतीनां पूर्वं पूर्वं विधिं बलीयांसमिति बौधायन सूत्रम् ।। अत्रान्यत्रापिवा प्रायश्चित्तेष्टीनां

स्थाने तस्यै तस्यै देवतायै पूर्णाहुतिं जुहुयादिति विज्ञायते इति सूत्रम् । एतस्य सूत्रस्य वृत्तिकारमतेऽनारब्ध दर्शपूर्णमासस्यैव पूर्णाहुतिः ।। अन्यग्रंथकारमते तु यथाश्रुत एवार्थः अनुष्ठानमप्येव मेव। आलस्यादिना पूर्णाहुतौ हुतायामिष्टिपर्यान्तमाज्यं व्रीहयश्च तत्रोक्ता दक्षिणाचावश्यं देयमिति सायं प्रातरित्युक्तं भाव्यम् ।। अर्वाक् शम्या परासादग्नेरायतनाद्बहिर्गमनेऽर्वाक् शम्या परासा दग्नेरायतनाद्बहिर्गमन निमित्तं प्रायश्चित्तं । इदं त इत्यस्य वाम देवो बृहदुक्थो विश्वेदेवास्त्रिष्टुप् ।। अग्नावग्निक्षेपणे विनियोगः ।। ॐ इदं त एकं पर ऊत एकं तृतीयेन ज्योतिषा संविशस्व । संवे शने तन्व १ श्चारुरेधि प्रियो देवानां परमे जनित्रे । इत्यग्नौ प्रक्षिप्य सर्वप्रायश्चित्तं जुहुयात् । तत्र कारिका । अर्वाक् शम्या परा सा तु बहिरायतनाद्गतम् । प्रायश्चित्त समाप्त्यर्थं समर्थो जीवितुं यदि ।। इदं त इत्यृचा तस्य स्थानेऽग्निं प्रक्षिपेत्पुनः ।। आज्याहुतिं च जुहुयाद्व्याहृत्याख्यैश्च पूर्ववदिति ।। आवहनीय मवदीप्यमानमर्वाक् शम्या परासादिदं त एकं परऊत एकमिति संवपेदिति सूत्रम् ।। शम्या परासो नाम उपविष्टेन पुरुषेण क्षिप्ता शम्या यावद्दूरं गच्छति तावान्देश इति हौत्रालोकेनोक्तम् । तस्मिन् स्थितेऽध्वर्युराहवनीय समीपे स्थित्वाभ्यस्तं शम्यां प्रास्य-तीति श्रुतावुक्तत्वात् ।। शम्यापरासात्परस्तात् बहिर्गमने तु शम्यापरासात्परस्ताद्बहिर्गमननिमित्तं प्रायश्चित्तं —।। इदं त एक मित्युक्तया ऋचाऽग्निप्रक्षेपं कृत्वाग्नये पथिकृते स्थालीपाकं कुर्यात् । पूर्णाहुतिर्वाग्नये पथिकृते स्वाहेत्येवं रूपम् ।। अत्र कारिका । अतिक्रान्तो यदा शम्या परासादनलोभयेत् । चरुः पथिकृतः कार्यः पूर्णाहुतिरथापि वा ।। यदि त्वतीयादिति सूत्रम्

इध्माधानोत्तरं हविर्दोषे दुष्ट हविः स्थाने आज्यं प्रतिनिधिं कृत्वा स्थालीपाकं समाप्य दुष्टं हविरप्सु क्षिप्त्वा अन्वाधानादि यागः पुनः कर्तव्यः तत्रेध्माधानोत्तरं तद्देवता स्थालीपाकहविर्दोष निमित्तं तद्देवता स्थालीपाकेन यक्ष्ये इति सङ्कल्प्य तद्देवताकं स्थाली पाकं कुर्यात् ।। अत्र कारिका ।। इध्माधाने कृते दुष्ट प्रधानं हविरत्रचेत् । तत्स्थाने जुहुयादाज्यमदुष्टं चेज्जुहोत्यथ ।। एवं समाप्य यद्दुष्टं तदप्सु प्रक्षिपेदथ ।। अन्वाधानादिको यागः पुनः कर्तव्य एव तु इति । प्रागाहवनाच्च दोषेपीति सूत्रम् ।। अत्रत्यो विशेषोऽग्रे वक्ष्यते । इध्माधानात्पूर्वं तद्देवताक हविर्दोषे तु ।। इध्माधानात्पूर्वं तद्देवताक हविर्दोषनिमित्तं तद्देवताकं हविः पुनरुत्पादयिष्ये इति सङ्कल्प्य तद्धविः पुनरुत्पाद्य पूर्ववत्तत्समापयेत् । अत्र कारिका । प्रागिध्माधानतो दुष्टे प्रधान हविषि त्वथ ।। तद्धविः पुनरुत्पाद्य पूर्ववत्तत्समापयेत् । इति । नात्र पुनः स्थाली पाकः । अत्र पूर्वोक्तमेव सूत्रम् ।। अंगहविर्दोषे तु अंगहविर्दोष निमित्तमंगहविः पुनरुत्पादयिष्ये इति सङ्कल्प्याज्यं पुनरन्यद्गृहीत्वोत्पूय अंगहोमं समापयेत् ।। अत्र कारिका ।। अंगानां चेद्धविर्दुष्टं तदा व्युत्पादयेत्पुनररिति अत्यन्तं गुणभूतानामिति सूत्रं । स्विष्टकृदर्थं दोषे तु स्विष्टकृदर्थदोषनिमित्तमाज्येन स्विष्टकृद्यागं करिष्ये इति सङ्कल्प्याज्येन स्विष्टकृतं जुहुयात् । स्विष्टकृद्धविषो दोष आज्येनैव समापयेत् ।। इति कारिका दोषास्तु प्रच्युतैस्तु नखैः केशैः कीटैर्वामिध्यसेविभिः ।। वसासृक् शुक्रमज्जास्थिमूत्र स्वेदपुरीषकैः ।। श्लेष्माद्यैरपि बीभत्सैर्दुष्टानि स्युर्हवींषि तु ।। भिन्नानि चैव सिक्तानि दुष्टानि स्युः क्षिपेज्जलैः । स्रुक् भेदे तु अन्यां स्रुचमाहृत्य तया जुहुयात् । भिन्नां स्रुचं प्राक् दण्डां प्रत्य-

वपुष्करामग्नौ क्षिपेत् । एवमन्यान्यपि वानस्पत्यानि प्राग्दण्डान्यग्नौ क्षिपेत् । अत्र कारिका ।। स्रुक् चेद्भिद्येत तर्ह्यन्यामाहृत्य जुहुयाद्धविः ।। वानस्पत्यानि भिन्नानि प्राग्दण्डान्यनले क्षिपेत् ।। अन्यगृह्याग्निना स्वगृह्याग्नि संसर्गेतु अन्यगृह्याग्निना स्वगृह्याग्नि संसर्गदोष परिहारार्थं । अग्नये विविचये स्थालीपाकं करिष्ये इति सङ्कल्प्य अग्निद्वयस्वामिनौ युगपद् द्वे समिधौ गृहीत्वा तस्मिन् संसृष्टेऽग्नौ समारोप मन्त्रेण प्रत्याप्य अथांगारान्विभज्य लौकिकाग्निद्वयं प्रतिष्ठाप्य स्वां स्वां समिधं प्रत्यवरं हेति निक्षिप्य अग्नये विविचये स्थालीपाकं करिष्ये । अग्नये विविचये त्वा जुष्टं निर्वपामि । इति सर्वं स्थालीपाकवत् । पूर्णाहुति र्वा स्रुवाहुति र्वा । अत्र कारिका । संसृष्टो यस्य गृह्याग्निरन्यगृह्याग्निना यदि । चरुर्विविचये कार्यो यद्वा पूर्णाहुतिर्भवेत् । अग्निर्गुणी भवेदेष विविचीत्यादिको गुण इति ।। आथाग्नेय्य इष्टय इति सूत्रम् ।। मिथश्चे द्विविचय इति सूत्रम् ।। गृहदाहे तु । गृहदाहनिमित्तमग्नये क्षामाय स्थालीपाकं करिष्ये । इति सङ्कल्प्य । अग्नये क्षामाय त्वा जुष्टं निर्वपामि । सर्वं स्थालीपाकवत् । अत्र कारिका । चरुः क्षामाय कर्तव्यो गृह दाहेषु वै भवेदिति । अग्नये क्षामायागार दाह इति सूत्रम् ।।

शवाग्निना गृह्याग्निसंसर्गे तु । शवाग्निना गृह्याग्निसंसर्ग निमित्तं अग्नये शुचये स्थालीपाकं करिष्ये । अग्नये शुचये त्वा जुष्टं निर्वपामि । सर्वं स्थालीपाकवत् । पूर्णाहुति र्वा । अत्र कारिका ।। शवाग्निना तु संसर्गे कुर्वीत शुचये चरुम् । प्रायश्चित्त चरुस्थाने पूर्णाहुतिरिहेष्यते । इति । अत्र संसर्जनेऽग्निना नान्येनेति सूत्रम् ।। अन्येनेत्यत्र अन्य इति शवाग्निरुच्यत इति वृत्तिः । पचनाग्निना तु संसर्गे । पचनाग्निना स्वगृह्याग्नि संसर्गनिमित्त-

मग्नये संवर्गाय स्थालीपाकं करिष्ये । अग्नये संवर्गाय त्वा जुष्टं निर्वपामि । सर्वं स्थालीपाकवत् । अत्र कारिका । ग्राम्याग्निना तु संसर्गे संवर्गाय चरुर्भवेदिति । ग्राम्येण संवर्गायेति सूत्रम् । ग्राम्यः पचनाग्निरिति वृत्तिः । वैद्युतेन संसर्गे तु । वैद्युतेन स्वगृह्याग्नि संसर्गनिमित्तमग्नयेऽप्सुमते स्थालीपाकं -।। अग्नयेऽप्सुमते त्वा जुष्टं - ।। सर्वं स्थालीपाकवत् ।। अत्र कारिका । वैद्युतेनाथ संसर्गे कुर्यादप्सुमते चरुमिति । वैद्युतेनाप्सुमत इति सूत्रम् । अन्य गृह्याग्निना स्वगृह्याग्निसंसर्गादि वैद्युतांतेषु पञ्चस्वपि निमित्तेषु सङ्कल्पोत्तरन्तमग्निं समिधि समारोप्य लौकिकाग्नौ प्रत्यवरोह्य तत्तन्निमित्तं प्रायश्चित्तं कुर्यात् ।। अत्रार्थे मूलं प्रायश्चित्त प्रदीपे । याज्ञिकानुष्ठानं च । पर्वण्यश्रुपातेतु पर्वण्यश्रुपातनिमित्तं अग्नये व्रतभृते स्थालीपाकं करिष्ये । अग्नये व्रतभृते त्वा जुष्टं निर्वपामि । सर्वं स्थालीपाकवत् । अत्र कारिका । पर्वण्यार्याश्रुपाते तु कुर्याद्व्रतभृते चरुमिति ।। पर्वणि व्रतलोपे तु । पर्वणि व्रतलोपनिमित्तमग्नये व्रत पतये स्थालीपाकं -।। अग्नय व्रतपतये त्वा जुष्टं । अथवा तत्स्थालीपाकेन सह समानतन्त्रं वा कुर्यात् ।। तत्र सङ्कल्पः । पर्वणि व्रतलोपनिमित्तमग्नये व्रतपतये स्थालीपाक प्रायश्चित्तपूर्वकं दर्श स्थालीपाकेन पौर्णमास स्थालीपाकेन वा यक्ष्ये इति सङ्कल्प्य । पूर्वमग्नये व्रतपतये निर्वापस्ततः पर्वप्रधान देवतायाः । अत्र कारिका । पर्वणि व्रतलोपे तु कुर्याद्व्रतपतिं चरुं । समानतन्त्रं कुर्वीत पार्वणे न तु कर्मणेति । व्रतातिपत्तौ व्रतपतय इति सूत्रम् ।। पवित्रनाशे तु । पवित्रनाशनिमित्तमग्नये पवित्रवते स्थालीपाकं - ।। अग्नये पवित्रवते त्वा । सर्वं स्थालीपाकवत् ।। स्याच्चेत्पवित्रयोर्नाशः स्यात्पवित्रवते चरुरिति ।। सर्वत्र विध्यपराधे

तत्तद् विध्यपराधनिमित्तं सर्वप्रायश्चित्तम् ।। तच्च भूर्भुवः स्वः स्वाहेति ।। प्रायश्चित्त विशेषस्तु यत्र नोक्तो भवेद्यदि ।। होतव्याज्याहुतिस्तत्र भूर्भुवः स्वरितीह तु ।। पूर्वं लिखितमपि कारिकाक्रमादत्र लिखितम् ।। स्वयमग्नि प्रज्वलने ।। स्वयमग्नि प्रज्वलन निमित्तं उद्दीप्यस्वेति द्वाभ्यां समिधावाधास्ये इति संकल्प्य । उद्दीप्यस्व जातवेदो - दश ।। मानो हिꣳसी - पातयेति मंत्राभ्यां द्वे समिधावादध्यात् । जुहोति चोदनाभावान्नात्र स्वाहाकारः । केचित् स्वाहाकारमपि पठित्वाग्नय इति त्यजन्ति । तत्र कारिका । स्वयं ज्वलेच्चेदुद्दीप्यस्वेति द्वाभ्यां समिद्द्वयमिति । अग्न्युपघातेतु । अग्न्युपघातनिमित्तं पुनस्त्वेति समिधावाधास्ये। पुनस्त्वादित्या रुद्रा वसवः समिंधतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेन त्वं तनुवो वर्धयस्व सत्याः सन्तु यजमानस्य कामाः । इति । केचित्तु स्वाहेति हुत्वा । आदित्येभ्यो रुद्रेभ्यो वसुभ्यो ब्रह्मण इदमिति त्यजंति ।। आधेयस्योपघाते तु पुनस्त्वेत्येतया समित् ।। अग्न्युपघातकानि तु । त्रिकाण्डमण्डने ।। श्वसूकररासभकाक सृगालैः कुक्कुटमर्कटशूद्रैः अंत्यजपातकिभिः कुणपैर्वा सूतिकयापि रजस्वलया वा रेतो मूत्रपुरीषैर्वा पूयाश्रुश्लेष्मशोणितैः । दुष्टास्थिमांस मज्जाभिरन्यैर्वातिजुगुप्सितैः ।। आरोपितारणि स्पर्शे कृतेऽग्नेः स्पर्शनेऽपि वा ।। आत्मारूढेषु मज्जे द्वा वदेद्वा पतितादिभिः ।।अथवा योषितं गच्छेदनृतौ काममोहितः ।। वदंत्येषु निमित्तेषु केचिदग्निविनाशनम् ।। तत्रारणिगते वह्नौ नष्टः स्यात्पुनराहितिः ।। इतरेषु निमित्तेषु अग्न्याधेयं प्रचक्षते ।। यद्वा सर्वोपघातेषु पुनस्त्वेति समिंधनं इति । यदि हविः प्रोक्षन्नाग्निमभिप्रोक्षे घृतेन यज्ञेन यजने पुनस्त्वादित्या रुद्रा वसव इति

पुनरग्निमुप समिंधनमिति ।। ध्यायेदेवं सर्वेष्वग्न्युपघातेषु इत्याप-स्तंबसूत्रम् ।। अथ बौधायनमते तु पुनरग्नेरयेतयैव स्रुवाहुतिर-धिका ।। अकृताग्रयण नवान्नप्राशनेतु ।। अकृताग्रयण नवान्न प्रा-शन निमित्तं अग्नये वैश्वानराय स्थालीपाकंक – ।। द्विषदन्न भोजनेतु ।। द्विषदन्नभोजननिमित्तमग्नये वैश्वानराय स्थालीपाकं – ।। श्रवणाकर्मणि पुरोडाशश्रपणमारभ्य कपालोद्वासन पर्यंतं कपालनाशेतु । हविः श्रपणात्पूर्वं कपालभेदनिमित्तं प्रायश्चित्तम् । गायत्र्यात्वा शताक्षरया संदधामीति मन्त्रेण नष्टं कपालं संधान द्रव्येण संधाय । अभिन्नोघर्मो जीरदानुर्यत आर्तस्तदगन्पुनः ।। इध्मोवेदिः परिधयश्च सर्वे यज्ञस्यायुरनुसंतरंतु ।। त्रयस्त्रिंशत्तं-तवो यान्वितन्वत इमं यज्ञं स्वधया ये यजन्ते । तेभिश्छिद्रं प्रति दध्मो यजत्र स्वाहा यज्ञो अप्येतु देवान्। द्वाभ्यां अप्सु कपालं प्रक्षिपेत् । ततः कपालांतरं प्रोक्षणादि कृत्वा योजयेत् ।। कपालो-पधानकाले निहितांगारे पुरोडाशे पधानात्पूर्वमनुगते सत्याज्यं संस्कृत्य मनस्वतीं हुत्वा पुनः कपालेंगारं निधाय प्रत्यूहेदिति दीपो क्तः। तत्रैवोद्वासनकालादन्यत्र पुरोडाश पतने दुर्गादिगणः प्रायश्चित्तं सतु प्रागेवोक्तः ।। कपालस्याशुचिसंसर्गे तु । कपालस्याशुचि संसर्ग निमित्त प्रायश्चित्तम् ।। अशुचि संसृष्टं कपालं अभिन्न इति पू-र्वोक्ताभ्यां मन्त्राभ्यां अप्सु प्रक्षिपेत् ।। अत्रोक्तानां प्रायश्चित्तानां कारिका ।। अकृताग्रयणोऽश्नीयान्नवान्नं यदि वै ततः । वैश्वानराय कर्तव्यश्चरुः पूर्णाहुतिस्तु वा ।। द्विषदन्नं यदा भुंक्ते तत्राप्येष विधि र्भवेत् ।। कपालनाशेऽप्येषः स्याच्छ्रवणाकर्मणामपि ।। कपालं तद्भु-वेद्भिन्नं प्रागेव श्रपणाद्यदि ।। तदा तत्रोक्त मन्त्रेण कपालं संदधात्यथ ।। अभिन्नोधर्म इत्याभ्यामप्सुवै प्रक्षिपेदथ ।। तच्चेद-

शुचिसंबंधमाभ्यामेव क्षिपेज्जले ।। सूत्रमप्येवमेव ।। मृन्मयांतरः स्याशुद्धि संसर्ग निमित्तं प्राय – ।। तस्यैव भेदने तु भेदनिमित्तं प्रायश्चित्तम् ।। भूमिर्भूमिमगान्माता मातामातरमप्यगात् ।। भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि सभिद्यताम् । इति मन्त्रेण अशुचि संसृष्टं मृन्मयांतरं भिन्नं वाप्सु निक्षिपेत् ।। पात्रांतरं योज येत् । अत्र कारिका ।। अन्यत्राशुचि संबंधं मृन्मयं भिन्नमेववा । भूमि र्भूमीति मंत्रेण प्रक्षिपेदेव तज्जले ।। सूत्रमप्येवमेव ।। श्रवणाकर्मणि पुरोडाशस्फुटने तु ।। पुरोडाशस्फुटननिमित्त प्राय -- ।। तस्यैवोत्पतने तु । उत्पतननिमित्तं प्राय – ।। किमुत्पतसि किमुत्प्रेष्ठाः शांतः शांते रिहागहि ।। अघोरो यज्ञियो भूत्वा सीदसदनं स्वमा सीद सदनं स्वम् ।। उभयत्राप्यनेनैवं बर्हिषि निधाय । मार्हिंसी र्देव प्रेरित आज्येन तेजसा स्वज्यमानः किंचन रीरिषः ।। योग क्षेमस्य शांत्या अस्मिन्नासीद बर्हिषि ।। उभयत्राप्यनेनाभि मन्त्र येत् ।। अत्र कारिका । भिद्येद्यदि पुरोडाशः उद्गच्छेद्दथवा यदि । किमुत्पतसि मन्त्रेण बर्हिष्येनं निधाय च ।। अभिमन्त्रयते तंच मार्हिसीरिति मन्त्रतः ।। सूत्रमप्येवमेव ।। यजमाने जीवति मृत शब्द श्रवणे तु । जीवतः स्वस्य मृतश्रवणनिमित्तमग्नये सुरभिमते स्थाली – ।। पक्षे पूर्णाहुतिं करिष्ये ।। अग्नये सुरभिमते त्वा जुष्टं – ।। अग्नये सुरभिमते स्वाहेति होमः ।। श्रूयते मृतशब्दश्चेद्यजमाने तु जीवति । अग्नये सुरभिमते चरुः पूर्णाहुतिस्तु वा ।। इति कारिका ।। सूत्रमप्येवमेव ।। यमलजननेतु ।। भार्या वा गौर्वा । यमलजनननिमित्तं मरुद्भ्यः स्थालीपाकं ।। मरुद्भ्यस्त्वा जुष्टं निर्वपामि । मरुद्भ्यः स्वाहेति पूर्णाहुति र्वा ।। अत्र कारिका । अथ यस्य वंधूर्गौर्वा जनयेद्यमलौ ततः ।। मरुद्भ्यश्च चरुं

कुर्यात् पूर्णाहुतिमथापिवा ।। सूत्रमप्येवमेव ।। हूयमानाहुति स्कंदने तु । बहिराहुति स्कंदननिमित्तं प्राय । देवान्जनमगन् यज्ञ स्तस्य माशीरवतु वर्धताम् । भूतिर्घृतेन मुंचतु यज्ञो यज्ञपति मंहसः । भूपतये स्वाहा । भुवनपतये स्वाहा । भूतानां पतये स्वाहा । यज्ञस्य त्वा प्रमयाभिमया प्रतिमया द्रप्सश्च स्कन्द इत्य-नेन मन्त्रेण । तामाहुतिमभिमृश्य तूष्णीमग्नौ प्रक्षिप्य सर्वप्राय-श्चित्तं जुहुयादिति वृत्तिकृन्मतम् ।। कारिका मतेन देवान्जन मित्यादि प्रतिमयेत्यंतेन मन्त्रेण तामाहुतिमभिमृश्य द्रप्सश्च स्कंद प्रथमां — होत्रा इति आहुतिमग्नौ प्रक्षिपेत् नात्र स्वाहाकारः । कारिका आहुतिर्हूयमाना तु बहिः स्कन्देत वै यदि । देवान्जनम -गन् यज्ञ इत्यन्तेनाभिमृश्यताम् ।। द्रप्सश्चेत्याहुतिं हुत्वा प्रक्षिपे-दनले पुनः ।। वृत्तिकृन्मतंतु वृत्तौ ज्ञेयम् ।। सूत्रमप्येवमेव ।। अनाहुति रूप हविः स्कन्दनेतु । स्कन्दननिमित्त प्रायश्चित्तं । देवा न्जनमगन्यज्ञ — प्रतिमया द्रप्सश्चस्कन्देति मन्त्रेण स्कन्नं हविरा-भिमृश्य सर्वप्रायश्चित्तं जुहुयात् नान्यत् । अविशिष्टेन प्रचरेच्छेषा भावे पुनर्मंत्रवन्निर्वापणादि कुर्यात् । सर्व प्रायश्चित्तं च । देवा-न्जनेति सर्वत्र स्कन्नं त्वभिमृशेत् हविः । निमित्तानन्तरं सर्व प्रायश्चित्तं भवेदिह । आज्यसंस्कारात्प्रागेव यदा दोष उत्पद्यते तदाज्य संस्कारांतं प्रायश्चित्तं कुर्यात् । प्रागेवोत्पद्यते दोष आज्य संस्कारतो यदि ।। प्रायश्चित्तं भवेदाज्य संस्कारानंतरं ततः ।। सर्वत्राहुति मात्रस्य स्कंदने प्रायश्चित्तमिष्यते । आहुति प्रमाणं च द्रव्याणां स्रुवबिलपूरण पर्यंतम् । स्रुवबिलं चांगुष्ठ पर्व प्रवेशन पर्याप्तं । कठिण द्रव्याणां त्वंगुष्ठपर्वमात्रस्कंदने प्रायश्चित्तम् । यदनाहुतिमात्रं तद्विप्रुडेव यदनाहुति मात्रंतद्विप्रुडेव सेत्यापस्तंब

सूत्रम् । भस्मन्यग्नौ हविर्धाने वेद्यास्तीर्णे च बर्हिषि । कूर्चे विप्रस्य पाणौ च स्कन्नदोषो नविद्यते इति दीपिकोक्तेः ।। अग्नौ स्कन्नदोषापवादः सपाकसमयेतर विषयः । तत्र तापादुत्सेक निस्रावादौ प्रायश्चित्ताम्नानात् । कूर्चः अग्निहोत्रे प्रसिद्धः । देवताव्युत्क्रमेषु तु । देवता व्युत्क्रम निमित्तं प्राय — ।। यद्वो देवाइत्यस्याभितपा मरुतस्त्रिष्टुप् । तत्तद्व्युत्क्रमनिमित्तमाज्य होमे विनियोगः । ॐ यद्वोदेवा — तनस्वाहा ।। इति ब्रह्मास्रुवेणाज्यं जुहुयात् ।। यजमानः स्वगृहे मुख्यं द्रव्यं ब्रह्मणेदक्षिणां दद्यात् । ब्रह्माभावे यद्वोदेवेति स्वयं हुत्वाऽन्यस्मै ब्राह्मणाय द्रव्यं दद्यात् ।। इदमेव प्रायश्चित्तं मंत्रव्युत्क्रमे द्रव्यव्युत्क्रमे अवदानव्युत्क्रमे निर्वापव्युत्क्रमे यागव्युत्क्रमे इत्यादि तत्तद्व्युत्क्रमे ज्ञेयम् । देवतेऽनुवाक्य इत्यादि सूत्रम् । कारिकायामपि । व्युत्क्रमे देवतानां तु संकल्पादौ भवेद्यदि । मध्यात्पूर्वार्धतश्चैव व्युत्क्रमश्च भवेद्यदि द्रव्याणां व्युत्क्रमः स्याच्चेत्तथा निर्वापणादिषु । यद्वोदेवा ऋचा ब्रह्मा जुहुयाच्च स्रुवाहुतिम् । यन्मुख्यं स्वगृहे द्रव्यं होमकर्त्रे ददाति तत् ।। यजमानस्तु जुहुयात्ब्रह्माभावे स्रुवाहुतिम् ।कस्मैचिद् ब्राह्मणायास्मिन् पक्षे द्रव्यं ददातितत् ।। होतव्यैकाहुतिश्चात्र व्याहृत्याख्यैः समुच्चयात् । यागात्प्राक् व्युत्क्रमे ज्ञाते यद्वोदेवा इत्याद्युक्तं प्रायश्चित्तं कृत्वा यागं कुर्यात् । प्राग्यागाद् व्युत्क्रमे ज्ञाते इदं कृत्वा यजेत्ततः । विहितदेवता यागोत्तरं व्युत्क्रमे ज्ञाते सति यद्वोदेवा इत्यादि प्रायश्चित्तमेव कुर्यात् । न पुनर्यागावृत्तिः ।। अविज्ञाते विपर्यासे विहितां देवतां स्मरन् । इष्टवांस्तत ऊर्ध्वंतु व्युत्क्रमावगते सति । प्रायश्चित्तमिदं कृत्वा

यागं नावर्तयेत्तदा ।। यदाऽविहितदेवतायागोत्तरं विहितदेवताया ग्राकरणे ज्ञाते यद्वा देवा उक्तप्रायश्चित्तं कृत्वा विहितदेवता यागः पुनः कर्तव्यः । यदात्वविहितां देवतां स्मरन्निष्टवांस्तदा प्रायश्चित्तमिदं कृत्वा यागं चावर्तयेत्तदा ।। यागात्प्रागित्यादौ वृत्तिरप्येवमेव ।। हविषोऽपाकेतु । अपक्वेन हविषा यागं समाप्य यागसाधनी भूत हविरपक्वतानिमित्तं चतुः शरावपरिमित व्रिहिनिष्पादितौदनेन चतुरो ब्रह्मणान् भोजयिष्ये ।। इति संकल्प्योक्तमोदनंकृत्वा चतुरो ब्राह्मणान् भोजयेत् ।। एकभोजन पर्याप्तमन्नं शराव इति । करिका यदाहविरपक्वं स्यात्तेनैव हविषा यजेत् । चतुः शरावमात्रं तुपचेद्व्रीहिभिरोदनं । भोजयेत्तेन चान्नेन चतुरो ब्राह्मणानथ । हविषि दुःश्रृत इति सूत्रम् ।। यद्वा बौधायनमतात् पुरोडाशादौ हविष्यश्रृते रुद्राय स्वाहेति स्रुवाहुतिं जुहुयात् । तेनैव हविषा यजेत हविषो द्रव्यं वायवे स्वाहेति स्रुवाहुतिं हुत्वा ततस्तेनैव जुहुयात् । सूत्रमप्येवमेव ।। हविर्दाहे तु ।। यदावदान पर्याप्तमदग्धं लभ्यते तदा ।। तेनैव यागो नतु वैशेषिकं प्रायश्चित्तम् ।। यदात्ववदानापर्याप्तमदग्धं लभ्यते । तदा तावन्मात्रेणैव यागं कृत्वा तंत्र शेषं समाप्य । हविर्दाहनिमित्तं पुनर्यागं करिष्ये इति संकल्प्यान्वाधानादि पुनर्यागं कुर्यात् । बहुदग्धंमदग्धं वा किंचिदेव यदाहविः । शिष्टेनेष्टवा पुनर्यागः स्यादारभ्यादितस्तदा । सूत्रमप्येवमेव । यद्वा बौधायनमतात् स्रुवाहुतिः निर्ऋतये स्वाहा निर्ऋतय इदं । शिष्टेन प्रधानं कुर्यात् आज्येन स्विष्टकृत् । प्रतिपत्तेर्लोपः । बौधायन सूत्रमप्येवमेव ।। सर्वहविर्दाहेतु । सर्वहविर्दाहनिमित्तं पुनर्हव्यंतरोत्पत्तिं करिष्ये इति संकल्प्य तस्मिन्नेव यागे पुनर्निर्वापादि

हृव्यंतरोत्पत्तिं कृत्वा स एव यागः समापनीयः नपुनः पूर्वोक्तरीत्या यागावृत्तिः सूत्रमप्येवमेव। कृत्स्नं दग्धं यदातु स्यात्पुनरुत्पादयेद्धविः । स एव यागः कर्तव्यः पुनर्यागस्तु नेष्यते ।। इति कारिका । सूत्रमप्येवमेव । यद्वा बौधायनमताद्धिदग्धं जले प्रास्याज्यभागानंतरं मिंदादिगणेन स्रुवाज्याहुतीर्जुहुयात् ।। ॐ यन्म आत्मनो मिंदाभूदग्निस्तत्पुनराहार्जातवेदा विचर्षणिः स्वाहा। अग्नये जातवेदस इदं । ॐ पुनरग्निश्चक्षुरदात्पुनरिंद्रो बृहस्पतिः। पुनर्मे अश्विनायुवं चक्षुराधत्तमक्ष्योः स्वाहा। अग्नींद्र बृहस्पत्यश्विभ्यइदं ।। भूः स्वाहा अग्नयइदं । भुवः स्वाहा वायव इदं । स्वः स्वाहा सूर्यायेदं भूर्भुवः स्वः स्वाहा प्रजापतयइदं । ॐ स्वाहा ब्रह्मणइदं । ॐ यच्चिद्धिते । यत्किंचेदं । कितवासो - यासः स्वाहा । त्रिष्वपि वरुणायेदं इति तिस्रः । तंतुं तन्वन् उद्बुध्यस्वाग्ने । त्रयस्त्रिंशत् — अप्येतु स्वाहा । त्रिष्वप्यग्नये तंतुमतइदं ।। तृतीयं देवेभ्य इदं वा ।। अन्वग्निरुषसा — ।। ततान स्वाहा । अग्नये जातवेदस इदं मनोज्योतिः - तेन स्वाहा। मनसे ज्योतिषइदं । भूरग्नये च पृथिव्यै च - ।। अग्नये पृथिव्यै महत इदं ।। भुवोवायवेचांतरिक्षाय ।। वायवे चांतरिक्षाय महत इदं । सुवरादित्यायचदिवेच ।। अदित्यायदिवे महत इदं ।। भूर्भुवः सुवश्चंद्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च । चन्द्रमसे नक्षत्रेभ्यो दिग्भ्यो महत इदं ।। सप्तते अग्ने - घृतेन स्वाहा । अग्नये सप्तवत इदं। प्रजापतेनत्वदेता - यीणां स्वाहा । प्रजापतय इदं । अयं मिंदादिगणः ।। सूत्रमप्येवमेव । मिंदाहुती च होतव्ये व्याहृत्यः प्रणवादिकाः वारुण्यस्तंतुमत्यश्च अन्वग्निश्च मनस्वती ।। महाव्याहृतयः सप्त प्राजापत्यं तथैव च ।। सप्तेति सप्तते अग्ने

इति मंत्रोक्तिः । एकविंशतिमंत्रो मिंदादिगण इति प्रायश्चित्तप्रदीपोक्तं ।। एवं हुत्वा पुनरन्यद्धविर्निरूप्य यजेदाज्येन वायजेत् ।। काम्यनैमित्तिकयोः पुनर्निर्वाप एवेत्युक्तं प्रायश्चित्तंचन्द्रिकायाम् ।। अत्र बौधायनसूत्रम् ।। अथ यदि सर्वमेव दग्धः स्यादापो ऽभ्यवहृत्य मिंदाहुतीर्हुत्वाऽ थान्यं निर्वपेदन्येनवा प्रचरेत्तसैव तत्र प्रायश्चित्तिरिति ।। चरौ श्रप्यमाणे प्राग्दिशि तावदुत्सिक्ते अग्नये स्वाहेति स्रुवाहुतिः । यदि दक्षिणतः यमायस्वाहेति यदि पश्चाद्वरुणायस्वाहेति यद्युत्तरतः सोमायस्वाहेति। युगपत्सर्वत उत्सेके सर्वाहुतीर्जुहुयात् ।। विदिक्षूत्सेके व्याहृतीर्जुहुयात् । उत्सिक्तं चरुमाज्येनाप्याययति । आप्यायस्व – । सन्तेपयांसि इति द्वाभ्यां ।। तत्प्रयोगः । श्रप्यमाणस्य चरोर्दिक्षु विदिक्षु सर्वतो वा तापादुत्सिक्त जनितप्रत्य – माज्याहुती होष्ये इतिसंकल्प्य प्रधानहोमात्पूर्वं जुहुयात् । जुहुयादिति बौधायनः ।। मिंदाहुतीच द्वे यन्म आत्मनः पुनरग्निरिति जुहुयात् ।। चर्वादीनां निःस्रावे दुर्गादिगणः प्रायश्चित्तम् । दुर्गादिगणः प्रागेवोक्तः । इति दीपिकोक्तं । अत्र बोधायनसूत्रम् । यस्यां यस्यां दिश्युत्सेकं तस्यै तस्यै देवतायै स्रुवाहुतिं जुहुयात् । यदि प्रागग्नये यदि दक्षिणतो यमाय यदि पश्चाद्वरुणाय यद्युत्तरतः सोमाय यदि सर्वतएवोत्सिच्यते सर्वाभ्यो देवताभ्यः स्रुवाहुती जुहुयात् । तमाज्येनाप्याययति आप्यायस्व समेतुते संते पयांसीति ।। तत्पाकात्पूर्वं हविषां केशाद्युपहतौ प्रक्षालनेन प्रोक्षणेन वा शुद्धिः । इत्युक्तमापदेव्याम् । अवदानं दुष्टंचेत्ततएव पुनरवदाय जुहुयात् । मध्यात्पूर्वार्धतोऽवत्तं यदि दुष्टं हतिर्भवेत् ।

तस्यैव हविरावद्येत् मध्यात्पूर्वार्धतः पुनरितिकारिका । अवदान दोषे पुनरायतनादवदानमिति सूत्रम् । सर्वत्र हविर्देवता याज्यानु वाक्यानां हुताहुत भ्रेषेष्वंतरिते विपर्यासे च त्वंनो अग्ने सत्वंनो अग्ने इत्येताभ्यां स्त्रुवाहुती जुहुयात् । अस्य बोधायन- सूत्रे विस्तारः । हुतस्य भ्रेषो नाशः अनग्नौ पतनम् । अहुतस्य भ्रेषो नाशो वा तस्य नाशः । तत्र त्वंनः सत्वंनः इत्याहुती हुत्वा पुनः स्थानादवदाय यजेत् । एकावदानाद्यकरणे यागात् पूर्वं ज्ञाने सति त्वंनः सत्वंन इति आहुती हुत्वा पुनर्यागः कार्यः । हविषामंतरायः एकावदानाद्यकरणम् । बहु हविष्कर्मणि एकस्य हविषोऽकरणं वा हविषां विपर्यासः व्यत्यासः देवता याज्या नुवाक्यानां एकस्य विस्मरणमंतरायः विपर्यासस्तु व्यत्यासः । आहुतिभ्रेषो आहुतेर्नाशः । यथा अविज्ञातदेवताहुतीर्नश्यति इति । अयमाहुतेर्हुतभ्रेषः । आहुतेरहुतभ्रेषस्तु यावत्प्रयोगसमाप्तिस्ता- वदाहुतेरकरणम् । तत्र सर्वत्र त्वंनो अग्ने सत्वंनो अग्ने इति द्वे स्त्रुवाहुती जुहुयात् । हविर्देवता धर्माणां याज्यानुवा- क्यानां पार्वणाद्यंगहोमानां च व्यत्यये द्वे स्त्रुवाहुती जुहु- यात् । याज्यानुवाक्ययोः परस्परव्यत्यासे तथा तद्दैवत्यान्य याज्यया यागे कृतेपि त्वंनः सत्वन्न इत्याज्याहुती एव न पुन- र्यागः । अन्तरितामृचं जपेत् । भिन्नदेवत्य याज्यया यागे कृते पि त्वंनः सत्वंन इत्याहुती हुत्वा पुनर्यागं कुर्यादिति दीपो- क्तम् । अत्रापस्तंबसूत्रमपि त्वंनो अग्ने सत्वंनो अग्ने सर्व- त्रांतराये विपर्यासे चैते आहुती इत्येके । पार्वणाद्यंगहोमाना मित्यत्र स्मार्ते अयाश्चेत्यादय आज्यभागादयो वा । पौर्णमास स्थालीपाके अग्निरग्नीषोमौ प्रधानदेवते तयोर्द्वौ बहु सहश्रपण

पक्षे द्वौ चरुभागौ वा। तत्राग्नेयचरुभागेन अग्नीषोमीययाग कृते भ्रेषो ज्ञायते तदा अग्नीषोमीय चरुभागेन आग्नेययागः कर्तव्यः। तत्र वृत्तौ सन्निहितत्वात्तस्य द्रव्यस्य कार्यांतरस्य चाभावात्तस्मिन् संन्निहिते सति द्रव्ये द्रव्यांतरत्वोपपादनम-शक्यमिति ॥ तस्मादेवं कृत्वा यद्वो देवा इति प्रायश्चित्तमेव कुर्यात्। अत्र व्याहृतिहोमश्च कार्यः। एतद्विपर्यासांतरित इत्यत्रैवोक्तमिति वृत्तिः ॥ एवं दर्शादिस्थलेपि ज्ञेयम्। अत्र दीपोक्तम्। सर्वत्र हविषि स्थिते भागे नष्टे स्थानादवदाय पुनर्यागः कार्यः। हविष्यविद्यमाने हव्यंतरं निरूप्य यागः कार्यः। प्रक्रांतमाज्येन समाप्य पुनर्यागो वा। सर्वत्रावदाने-अहुते हविषि दोषदर्शने अवत्तं हविरप्सु शीत भस्मनि वा प्रक्षिप्य त्वंनः सत्वंन इत्याहुती हुत्वा पुनरायतनादवदाय यजेत्। अवदानानंतरं पुरोडाशादौ दोषदर्शने अवत्तेन हविषा प्रधानयागं कृत्वा दुष्टमप्सु प्रक्षिप्य त्वंनः सत्वंन इति द्वे स्रुवाहुती हुत्वा ध्रुवाज्यात् स्विष्टकृदादि कुर्यात् न पुन-र्यागः ॥ श्रौते ध्रुवाज्यात् स्मार्ते आज्यस्थाल्याः अवदान काले पुरोडाशादौ केशादिदोष दर्शने दुष्टं हविरप्सु प्रक्षिप्य शूर्पादानादि हव्यंतरं निरूप्य त्वंनः सत्वंन इति हुत्वा तेन यागं कुर्यात्। प्रधानहविषां परस्परं विपर्यासे मिंदादिगणः त्वंनः सत्वंन इति द्वयोः समुच्चयः। मिंदादिगणः प्रागेवो-क्तः। प्रधानहविर्धर्म विपर्यासे त्वंनः सत्वंन इति द्वयं मिंदा हुतिद्वयं वा प्रायश्चित्तम्। मिंदाहुतिद्वयं यन्मआत्मनो-पुनरग्निः। अंगहोमानामकरणे कर्मण्यसमाप्ते सति पुन-र्यागः। समाप्ते कर्मणि त्वंनः सत्वंन इति आहुतिद्वयमेव

न पुनर्यागः ।। प्रधानदेवतांतराये स्विष्टकृतः प्राक् स्मरणे त्वंनः सत्वंन इत्याहुती द्वे च मिंदाहुती हुत्वा शूर्पादानादि पुनर्हविरुत्पाद्य यागं कुर्यात् । स्विष्टकृदूर्ध्वं स्मरणे तत्समाप्य पुनर्यागं कुर्यादित्येतदन्तं प्रायश्चित्त प्रदीपोक्तम् । प्रयाजाद्यंगयज्ञाकरणे इष्टेभ्यः स्वाहेत्यादिभिरष्टौ स्रुवाहुतीर्जुहुयात् व्याहृतीश्चेति दीपोक्तत्वात् । स्मार्ते आज्यभागाद्यंगयज्ञानामकरणे स्रुवेणाज्याहुतीर्जुहुयात् । इष्टेभ्यः स्वाहा । वषडनिष्टेभ्यः स्वाहा । भेषजं दुरिष्टयै स्वाहा । निष्कृत्यै स्वाहा । दौराध्यैं स्वाहा । दैवीभ्यस्तनूभ्यः स्वाहा । ऋध्यै स्वाहा । समृध्यै स्वाहा । भूः स्वाहा । भुवः स्वाहा । सुवः स्वाहा । भूर्भुवः सुवः स्वाहा ।। अंगयज्ञानामकरणे प्रायश्चित्तमेव न पुनर्यागः । प्रधानयज्ञभ्रेषे प्रायश्चित्तं कृत्वा पुनर्यागः कर्तव्यः ।। ऋत्विजां मंत्रोच्चारणकाले उपांशुप्रभृति वाचस्थानानां भ्रेषे उदात्तादिस्वरभ्रेषे अक्षर पदमात्र भ्रेषे चाभिर्गीर्भिरिति स्रुवाहुतिं जुहुयात् । आभिर्गीर्भि - स्याम स्वाहा ।। इन्द्राय हरिवते वर्धमानायेदम् । सर्वत्र इदमत्र-कर्तव्यमिति । अनाज्ञातप्रायश्चित्तेषु । अनाज्ञातं पुरुषसंमित इति द्वे स्रुवाहुती जुहुयात् । अनाज्ञातं — तथ॰स्वाहा । अग्नयइदम् । पुरुषसंमितो - तथ॰स्वाहा । अग्नयइदं । दोष दुष्टेन स्कन्देनवा हविषा अज्ञानात्प्रधानयागे प्रणवव्याहृती जुहुयात् ।। केचन कारिकोक्ता हविर्दोषाः प्रागुक्ताः । तथापि बोधायनसूत्रोक्ता हविर्दोषा दीपानुसारेण लिख्यन्ते । अथ सूत्रम् । अथ हविर्दोषान्व्याख्यास्यामः । यैर्हविर्दुष्यति तान्व्याख्यास्यामः । अश्वदेहवर्तिनी नीलमक्षिका गवामंगव-

र्तिनी शांतिकाल तल्पवर्तिर्मत्कुण: चैलशिरोवर्तिनी यूका मल-पिण्डकारि कीटश्च मार्जाररतकुलमर्कटाः प्रसिद्धाः ध्वांक्षः काकः आखुर्मूषकः तेषामन्येषां च पुरीषं मलः केशः प्रसिद्धः सिकः परिहित वसनांचलः पदं पादः मृतनखश्छिन्ननखः कुनखो दुष्टनखः पुरीषः पूतिर्दुष्टगंधवहः द्रप्सः मुखजविप्रुषः स्वेदः प्रसिद्धः असृक् रुधिरं स्नेहो नासिका कफः अश्रु नयनांबु कासः श्लेष्माक्षव पथक्षांत आर्द्रव्रणं चेति एतैरुपहतं ।। वसा-शुक्रमसृङ्मज्जा मूत्रविट् कर्णविट् नखाः ।। श्लेष्माश्रु पूतिका स्वेदा द्वादशैते नृणां मलाः । इत्येतैश्चोपहतम् ।। रजस्वला सूतिकाभ्यां स्पृष्टं दृष्टं । अप्रपतनाशुचिना स्पृष्टं दृष्टं च भ्रूणघ्ने न वा भ्रूणाः पंच शिशुर्यज्वा गर्भिणी ब्राह्मणो नृप इति ।। एतेषामन्यतेमं यो हन्ति स भ्रूणघ्न: तेन दृष्टं स्पृष्टंच । अपात्रेण ग्रामचाण्डालादिना दृष्टं स्पृष्टं च । ध्वजीच रजको लोह कारकश्च शुनाधिपः । तक्षको वागुरुरिति ग्रामचाण्डालकाः स्मृताः ।। अमेध्यदेशे स्कन्नं । यत्र प्रसूयते नारो म्रियते दह्यतेऽपिवा । चाण्डालाध्मुषितं यत्र यत्र विष्ठादि संगतिः ॥ एवं कल्मषभूयिष्ठा भूरमेध्या प्रकीर्तिता ।। एवं भूताना ममेध्यदेशे स्कन्नंच । एवं दुष्टं हविरप्सु शीतभस्मनिवा प्रक्षिप्य मिदाहुती व्याहृतयश्च हुत्वा शूर्पादान प्रभृति हव्यं-तरमुत्पाद्य यजेत् ।। अशक्तौ क्षिप्रकर्तव्यताप्राप्तौ आज्येन वा यजेत् ।। आज्यपक्षे मनस्वती च प्रायश्चित्तम् । क्षुद्र-कीट मक्षिकापिपीलिका वर्ज्यम् । क्षुद्रकीटो घुणादिः मक्षिका पिपीलिके प्रसिद्धे । एषु प्रमादाद्धविषि पतितेषु न दोषः । सर्वत्र क्षुद्रकीट मक्षिका पिपीलिकादीनामाचम्योध्दृत्याभ्युक्ष्यो-

त्पूय जुहुयात् । ऊर्ध्वं चेद्दुष्टमेवेति जैमिनिः ॥ दुष्टेन हविषा यागे कृते पश्चाद्दोषदर्शने पुनर्यागो न कर्तव्यः ।। तथाहि कात्यायनः । दुष्टेन हविषा यागनिवृत्तौ पश्चाद्दोष संवित्तिर्भवति इति तत्कृतमेवेति । अदुष्टेन द्रव्येण पुनरावृत्तिरिति केचित् । आज्योपहृतौ तज्जले प्रक्षिप्यान्यत्संस्कृत्य तेन प्रचार इत्युक्तमापदेव्याम् । हुते हविष्यनग्नौ पतिते त्वंनो अग्ने सत्वंनो अग्ने इत्येताभ्यां स्रुवाहुती हुत्वा पुनरवदाय यजेदित्युक्तमापदेव्याम् । यद्यप्रत्तदैवतं हविर्व्यापद्येतान्यद्धविस्तद्दैवतं निर्वपेत् तत्र स्रुगादान प्रभृतयो मंत्रा आवर्तेरन् यावदते वायव्यापद्येत यदि प्रचरदैवतमाज्येन शेषं स्थापयेद्यस्य सर्वाणि हवींषि नश्येयुर्दुष्येयु रपहरेयुर्वाज्येन देवताः प्रतिसंख्याय यजेतान्यामिष्टि मनुल्बणां तन्वीत यज्ञस्य प्रायश्चित्तिरपो व्यापन्ना रभ्यवहरंतीति विज्ञायते । तदार्याणामभोजनीयां स्यानतेन यज्ञेनेत्यापस्तंब सूत्रम् । प्रधान हविर्व्यापत्तावपि पुनः प्रयोगाशक्तौ आज्यभागानंतरं जहोति । यन्म आत्मनो – पुनरग्निः – मनोज्योति यदाह भगवान् बौधायनः आज्येन वा प्रचरेत् । सैव तत्र प्रायश्चित्तिरपि खलु क्षिप्र संस्कारितमाज्यं ब्रुवत इति । मिन्दाहुती हुत्वा मनस्वतीं जुहोति सैव प्रायश्चित्तिर्विज्ञायत इति ।। तदेतद्यदाकदाचिदापदेव्यां पूर्वं व्युत्क्रमेण निर्वापे यद्वोदेवा इति प्रायश्चित्तमुक्तम् । तत्र भागिन्यै देवतायै निरूप्य प्रोक्षणादिषु आज्य भागिन्यनुल्लेखनेऽनंतरं विस्मृतस्मरणं चेत्पूर्ववद् यद्वो देवाइति स्रुवाहुतिं हुत्वा विस्मृतदेवतायै याग कुर्यात् । अभागिन्यै निरूप्य भागिन्याः स्मृतिश्चेन्निरुप्तममुष्यै त्वेत्यभिमृश्यामुष्यै

स्वाहेति सर्वमग्नौ जुहुयात् । तत्र यद्वो देवा त्वंनो अग्ने सत्वंनो अग्ने इति स्रुवाहुती जुहुयात् । विष्णुं स्मृत्वा पुनर्भागिन्यै निर्वपेत् । एतदासादनात्प्राक् तदनंतरं स्मरणे विस्मृत देवतायै निरूप्योभयोर्याग: तत्र मिंदाहुती जुहुयात् । यन्म आत्मन: - पुनरग्नि: ॥ पुनर्व्याहृतिभिर्हुत्वा ॐ स्वाहा । इत्युक्तमापदेव्याम् । दर्शपूर्णमासादिषु हविष्यासादितेषु हविषामुपरि यदि काक आसीदेत्तदा इदं विष्णुर्विचक्रम इति स्रुवाहुतिं हुत्वा तद्धविरप्सु निक्षिप्य शूर्पादानादि हव्यंतरमुत्पाद्य प्रचरेत् । एवमाज्य सोमानामपीत्युक्तं प्रायश्चित्तप्रदीपे । अत्रापस्तंब सूत्रं तु यदि हवींष्यासन्नानि कृष्णशकुनिरुपर्यतिचरेत् पक्षाभ्यामाधुन्वान इवाभिनिर्षिचेदिदं विष्णुरित्याहुतिं जुहुयाद्य-द्युच्चै: पतेन्न तदाद्रियेतेति यो यक्ष्म इत्युक्त्वा अन्वाधानादि यत्किंचित्कर्म कुत्वा यदि नयेत सविभ्रष्टंष्टचा यजेनेति दीपे उक्तत्वात् । एवं सति विभ्रष्टेष्टि देवताक: स्थालीपाक: कार्य: सतु प्रागेवोक्त: । श्रवणाकर्मणि एककपाल पुरोडाशमपर्यावर्तयन् प्रतिष्ठितमखण्डितं सर्वं जुहुयात् । यद्येककपाल: पुरोडाश: सर्वंहुतं परावर्तेत यजमान: स्वस्थाने प्रतिष्ठापयेत् । प्रजापतेवर्तनिमनुवर्तस्वेति मंत्रेण प्रतिक्षेत्रे प्रतिष्ठामि राष्ट्रे विश्वमन्याभिवावृधे इत्येताभ्यामनुमंत्रयति । अस्कां द्यौ: पृथिवीमस्कानृषभो युवागा: ॥ स्कन्नेमा विश्वा भुवना: स्कन्नो यज्ञ: प्रजनयतु ॥ अस्कानजनि प्राजन्या स्कन्नाज्जायते वृषा ॥ स्कन्नात्प्रजनिषीम यज्ञ प्रजनयतु ॥ अस्कानजनि प्राजन्या स्कन्नाज्जायते वृषा । स्कन्नात्प्रजनिषीमहि ॥ इत्येताभ्यां स्रुवाहुती जुहुयात् ॥ द्वयो वैश्वान-

रायेदमिति त्यागः प्रक्रान्तं कर्म समाप्यैक कपाल पुरोडाश परावर्तन प्रायश्चित्तार्थमग्नये वैश्वानराय स्थालीपाकं कुर्यात्। अथवा तदेव पूर्णाहुतिः दीपानुसारेणेदमुक्तम् । अत्र बौधायनसूत्रम् ॥ अथ यद्येककपालः परावर्तेत प्रजापतिवर्तनिमनुवर्तस्वेति अध्वर्युः स्वस्थाने प्रतिष्ठापयेत् प्रतिक्षेत्रे प्रतिष्ठामि राष्ट्रे विश्वामन्याभिवावृध इत्येताभ्यां यजमानोऽनुमंत्रयेतास्कां द्यौः पृथिवीमस्कानजनीत्येताभ्यां स्रुवाहुती जुहुयात् । संस्थिते वैश्वानरी निर्वपेदिति । दर्शपूर्णमासादिषु सर्वकर्मसूत्तरपुरस्तात् सौविष्टकृतमिति सूत्रादौपासन होमस्थले आप्रधानाहुतीनां स्विष्टकृतश्च संसर्गो न कार्यः । तत्संसर्गे प्रायश्चित्त विशेषाम्नानात् सर्वप्रायश्चित्तं कर्तव्यमिति दिक् । पौर्णमास्या इष्टेरमावास्यातिथेरर्वाक् गौणकालः । अमावास्याया इष्टेः पौर्णमासीतिथेरर्वाग्गौणकालः । आमावास्यस्य पौर्णमासस्य कालो नातीयादापौर्णमासादमावास्यस्येति बौधायन सूत्रम् । पुनः प्रायश्चित्तप्रदीपे । आपत्सु गौणकाले स्यादिष्टिः अनापदि गौणकाले इष्टि न कुर्यात् । कुर्याच्चेद्यथोक्त प्रायश्चित्त पूर्विकामिष्टि कुर्यात् । अत्र दीपे । बौधायनीय द्वैधसूत्रोक्तास्त्रयः पक्षा उक्ताः तेऽत्र न लिखिताः तत्र यद्वा एकस्मिन् पर्वण्यतिक्रान्ते प्राप्तकालस्य दर्शपूर्णमासस्य वा य आग्नेयोऽष्टाकपालस्तमेवाग्नि पथिकृद्गुणविशिष्टं कृत्वा यजेत् । आहवनादि निगदेष्वग्नि पथिकृतं निर्दिशेत् । तदा नातिपन्न यागः । अथवापूर्णाहुति राज्यभागानंतरं कुर्यात् । अयं चतुर्थः पक्ष इत्युक्तत्वात् । स्मार्तेपि गौणकालातिक्रमे वक्ष्यमाणं प्राजापत्यमुक्तं प्रायश्चितं कृत्वा प्राप्तकालीन स्थालीपाके

आज्यभागानंतरं अग्नये पथिकृते स्वाहेति पूर्णाहुतिं हुत्वा तत्तत्स्थालीपाक प्रधानहोमादि शेषं समापयेत् । मयेदं लिखितं तद्युक्तमयुक्तं वा सद्भिर्विचार्यं ग्राह्यम् । गौणकालेऽपि स्थालीपाकाकरणे प्रजापतिः । दर्शं वा पौर्णमासं वा लुप्त्वा चोभयमेव वा । एकस्मिन् कृच्छ्रपादेन द्वयोरर्धेन शोधनमिति ॥ एतानि दर्शपूर्णमासस्थालीपाकाद्युक्तानि प्रायश्चित्तानि सर्वेषु प्राकृत वैकृत स्थालीपाकेषु सर्वेषु अगुतहोमरुद्रहोमादिष्वपि तत्तदुक्त प्रकारेण तत्तन्निमित्तेषु ज्ञयानीत्यलं बहुना ॥ कारिकायां ॥ पंचमहायज्ञलोपे तु तत्तन्महायज्ञलोपनिमित्तं मनस्वत्या चतुर्गृहीतं होष्यामीति संकल्प्य संस्कृताज्यं दर्व्यां चतुर्गृहीत्वा मनोज्योतिर्जुषतां – । मनसेज्योतिषं इदं ॥ बोधायन इदं प्राह लोपे पंचमखेषु तु। एतेभ्यः पंचयज्ञेभ्यो यद्येकोऽपितु हीयते ॥ मनस्वत्याहुतिस्तत्र प्रायश्चित्तं विधीयत इति कारिका ॥ द्व्यहं त्र्यहं वा लोपेतु । द्व्यहं त्र्यहं वा तत्तन्महायज्ञलोपनिमित्तं तिसृभिस्तंतुमतीभिर्होमं चतसृणां वारुणीनां जपं करिष्ये । तंतुं तन्वन् — । उद्बुध्यस्वाग्ने — । त्रयस्त्रिं शत्तंतवो — । स्रुवेण होमः तिसृष्वप्यग्नये तंतुमत इदं ॥ अवते हेळो – । उदुत्तमं वरुणपाशं – । इमं मे वरुण श्रुधी – तत्त्वायामि — ॥ इति चतस्रो वरुणीजंपेत् । द्व्यहं वापि त्र्यहं वापि प्रमादाद्यकृतेषु तु ॥ तिस्रस्तंतुमतीर्हुत्वा चतस्रो वारुणीर्जपेदिति कारिका ॥ सर्वेषां महायज्ञानां दशाहं वा द्वादशाहं वा लोपे चतसृभिर्वारुणीभिर्होमं तंतुमत्स्थालीपाकं च करिष्ये इति संकल्प्य अन्वाधानाद्याज्यभागोत्तरं वरुणं चतुर्वारमाज्येनाग्निं तंतुमतं चरुणा अग्निं स्विष्टकृतमित्यादि पूर्णपात्रनिधानांते अग्नये

तंतुमते त्वा जुष्टं निर्वपामि इत्येवं स्थालीपाकं श्रपयित्वा-ज्यभागांते अवतेहेळउदुत्तममिमंमेवरुण तत्वायामीति चतसृणा माजीगर्तिः शुनः शेपो वरुणस्त्रिष्टुप् तृतीयागायत्री होमे-विनि-।। पूर्वोक्ताभिश्चतसृभिराज्यं स्रुवेण हुत्वा वरुणायेदमिति त्यजेत् ।। ततोऽग्नये तंतुमते स्वाहेति चरुं हुत्वा स्थालीपाक वत्कर्मशेषं समापयेत् ।। दशाहं द्वादशाहं वा विनिवृत्तेषु सर्वशः। चतस्रो वारुणीर्हुत्वा कार्यस्तंतुमतश्चरुरिति कारिका । उपवासपक्षे तु तत्तन्महायज्ञ होमनिमित्तमुपवासं करिष्ये ।। स्नातकव्रत लोपे तु स्नातकव्रतलोपनिमित्तमुप इति संकल्प्य। एवमष्टकादि कर्मस्वपि तत्तत्कर्मलोपमुपवासं करिष्ये ।। अकृतान्यतमं यज्ञ पंचानान्वाष्टकादिषु ।। उपवासेन शुद्धिः-स्यात्सुमंतुमतमीदृशम् ।। स्नातकव्रतलोपे तु प्रायश्चितमभोजन-मिति ।। कारिकोक्तानि प्रायश्चित्तानि समाप्तानि ।। अत्र कारिका तृतीयाध्यायांते ।। समिदारोपणे पक्षे होमो विच्छि-द्यते यदि ।। आपंचमदिनादर्वाक् ऊर्ध्वं विच्छिद्यतेऽनलः ।। आत्मारोपण पक्षेतु होमो विच्छिद्यते यदि। आद्वादशदिना-दर्वागूर्ध्वं विच्छद्यतेऽनलः ।। इति यद्वाक्यद्वयं कस्मिश्चित्पुस्तके लिखितमस्ति तन्निर्मूलम् ।। बहुपुस्तकेष्वदृष्टत्वात् श्रौतग्रंथा-दावप्यदृष्टत्वाच्च ।। अन्वष्टक्याकरणे प्रायश्चित्तांतरमृग्विधाने। एभिर्द्युभिर्यजेन्मंत्रं शतवारं तु तद्दिने । अन्वष्टक्यं यदाशून्यं संपूर्णं याति सर्वदेति अन्वष्टक्याकरणनिमित्त प्रत्यवाय परि-हारार्थं शतावृत्या एभिर्द्युभिरिति मंत्रजपं करिष्ये। एभिर्द्युभिः काण्वः प्रस्कण्वः इन्द्रो जगती ।। अन्वष्टक्याकरण जनित प्रत्य-वाय परिहारार्थं जपे विनि ।। एभिर्द्युभिः इतिमंत्रं शतवारं

जपेत् ॥ आग्रयणादि पाकयज्ञानां मध्येऽन्यतमस्याकरणे प्रायश्चित्तमाह प्रजापतिः । हविर्यज्ञेष्वशक्तस्य लुप्तमाग्रयणादिकं ॥ लुप्तमध्येकआदित इति वा पाठः ॥ प्राजापत्येन शुध्येत पाकसंस्थासु चैवहीति । एतदनुक्त प्रायश्चित्तानां श्रवणाकर्म सर्पबलि आश्वयुजीकर्माग्रयण प्रत्यवरोहण प्रायश्चित्तमित्यवगंतव्यमित्युक्तं प्रयोगपारिजाते । अमुकपाकयज्ञाकरणजनित प्रत्यवायपरिहारार्थममुक प्रत्याम्नायेन प्राजापत्य निमित्तं प्रायश्चित्तं क-॥

अथ पिण्डपितृयज्ञेऽति प्रणीतानाशे तस्मिन् होमपक्ष सर्व प्रायश्चित्तमेव न पुनरति प्रणयनं कार्यं कार्याभावात् । तस्मिन् होमपक्षे पिण्डप्रक्षेप पक्षे च सर्वप्रायश्चित्तं कृत्वा पुनर्मंत्रेणाति प्रणयनं कार्यं ॥ अत्र प्रसंगादापस्तंबीयानां । अति प्रणीत नाशे तस्मिन् होमपक्षेऽहोमपक्षे च सर्वं प्रायश्चित्तं कृत्वा पुनर्मंत्रेणाति प्रणयनं कार्यम् ॥ तत्र तस्य पुनरग्नौ प्रक्षेप विधानात् ॥ पिण्डपितृयज्ञानामकरणे प्रायश्चित्तम् ॥ पितृयज्ञस्यत्वमावास्यायामनुष्ठाने तत्प्रायश्चित्तत्वेन वैश्वानरश्चरुरेव भवति न पुनः पितृयज्ञः । तस्यगौणकालाभावात् । स एव-निर्णयसिन्धौ पराशरमाधवीये कात्यायनः । पितृयज्ञात्ययेचैव वैश्वदेवात्ययेपि च । भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत् ॥ इति । चरुः स्थालीपाकः । पिण्डपितृयज्ञाकरण प्रत्यवाय परिहारार्थं अग्नये वैश्वानराय स्थालीपाकं करिष्ये । अग्नये वैश्वानराय त्वा जुष्टं निर्वपामि इति सर्वं स्थालीपाकवत् । अथवा पिण्डपितृयज्ञलोपे बौधायनापस्तंबमतात् संग्रहेण सप्त होत्रा चतुर्गृहीतं जुहुयात् । पिण्डपितृयज्ञलोपे सप्तहोतारमिति बौधायन सूत्रात् । महाहविर्होता । सप्तहविरध्वर्युः । अच्युत

पाजाअग्नीत् । अच्युतमना उपवक्ता । अनाधृष्यश्चाप्रति-धृष्यश्च यज्ञस्याभिगरौ । अयास्यउद्गाता । वाचस्पते विधे-नामन् । विधेमते नाम । विधेस्त्वमस्माकं नाम । वाचस्पतिः सोममपात् । मादैव्यस्तंतुच्छेदि मामनुष्यः । नमो दिवे । नमः पृथिव्यै स्वाहा । वाचस्पते ब्रह्मण इदं ॥ बौधायनमतात् इह हविर्विकल्पः । इति श्रीमदारडोपनामक लक्षीधरभट्टसूनु नारायण भट्टकृते गृह्याग्निसागरे स्थालीपाकादि प्रायश्चित्तवि-षयकनिरूपणम् ॥

अथ द्रव्यशुद्धिः ॥

दीपे । मलमूत्रपुरीषलोहितरेतोभिरुपहतं वस्तु मृदाद्भिः प्रक्षा-लनाच्छुध्येत् । अशुचिना स्पृष्टं वस्तु प्रोक्षणाच्छुध्येत् । अजिनं वासः सूत्रं वा प्रक्षालित मुत्तरीयं कुर्यात् । नाप्रक्षालितम् । अप्रक्षालित नवं वस्त्रमाधानदीक्षासु न परिदध्यात् । अप्रक्षालितं नवं वस्त्रं कर्मसु नोपयुंज्यात् । पुरोपयुक्तं नवं वस्त्रं कृष्णाजिनं नोपयुंज्यात् । वेद्यां मूत्राद्युपहतायामुपहतदेशभूमिर्दृढाचेत् गोम-याद्भिरुपलेपनाच्छुध्येत् । मृदुभूम्यामुपरि अदृढाचेत्कर्षणोपलेप नाच्छुध्येत् । आर्द्रायां वेद्यां मूत्राद्युपहतायां उपहतप्रदेशात्पुरीष मुद्धृत्य मेध्यामृदन्यत आहृत्य पूरयित्वोपलेपनाच्छुध्येत् । अत्यं-तोपहतायां कर्षणादि कृत्वा गोभिराक्रमणं खनन दहनादि-भिर्वर्षणादिभिर्व्यस्तैः समस्तैर्वाशुध्येत् ॥ अल्पोपहतं चेदुपलेपनं सोमसूर्यांशुमारुतैश्च शुध्येत् ॥ उपहतायां भूमावुपलेपादि संस्कृतायां निहितानां कुशेध्मादीनां प्रक्षालनाच्छुद्धिः । यज्ञार्थं शूद्रादिभिराहृतानां काष्ठयूपादीनामभ्युक्षणाच्छुद्धिः । अंगुली प्रमाणस्थूलानां समिधामल्पोपहतौ प्रोक्षणाच्छुद्धिः । इध्मप्रणय-

नीयेध्म महापरिध्यादीनामल्पोपहतौ प्रक्षाल्यात्रशोषणाच्छुद्धिः । मूत्राद्युपहतानां त्याग एव ॥ आर्द्रानां सत्वचानां उपघाते तक्षण प्रोक्षणाच्छुद्धिः । जुह्वादीनां दारुमयपात्राणां बुद्धिपूर्वं मुच्छिष्टपुरीषस्पृष्टानामवलेखन प्रोक्षणाच्छुद्धिः । जुहूशब्देन स्मार्ते दर्वी उच्छिष्ट पुरीषेण बुद्धिपूर्वं स्पृष्टानां प्रक्षालनाच्छुद्धिः। उच्छिष्टलेपोपहतानां दार्वाणां तक्षण प्रोक्षणाच्छुद्धिः । अत्यंतोपहतानां तक्षणासमर्थानां मंत्रेण पात्रांतरं गृहीत्वा भूरायुमेंत्यभिमंत्र्य उपहतमप्सु प्रक्षिपेत् ॥ भूमिर्भूमिमगादिति । सादितानां पात्राणामिध्माबर्हिःप्रभृतीनामपि मूत्राद्युपहतानां त्याग एव । अग्निहोत्रे घर्मोच्छिष्टे दधिघर्मे कुंडपायिना मायतने उत्सर्गिणां नयने दाक्षायणयज्ञे चातुर्मास्ये ब्रह्मोदने चाग्निहोत्र हवण्यादीनामुच्छिष्ट समन्वारब्धानामुच्छिष्टलेपोपहतानां चाद्भिर्मार्जयेत् दर्भैः प्रक्षालनाच्छुद्धिः । गृहं चमसाना मुच्छिष्टमन्वारब्धानामुच्छिष्टलेपोपहतानां चाद्भिर्मार्जयेत् दर्भैः प्रक्षालनाच्छुद्धिः । मूत्राद्युपहतानां त्याग एव । पात्रांतर स्वीकारेश्च । मृन्मयानामाज्यस्थाल्यादीना मल्पोपहतानामुच्छिष्टसमन्वारब्धानां च कुशाग्निना दहनाच्छुद्धिः । उच्छिष्टलेपोपहतानां मूत्राद्युपहतानां त्यागः पात्रांतर परिग्रहश्च । तैजसादीनां कुडच पुरीषादीनामुच्छिष्टोपहतानां सकृद्भूस्मोदकैः प्रक्षालनाच्छुद्धिः । ताम्रमयानामुच्छिष्टोपहतानामल्पोदक प्रक्षालनाच्छुद्धिः । कांस्यानामुच्छिष्टोपहतानां सकृद्भूस्मोदकैः शुद्धिः॥ रजतकांचनयोरद्भिरेव प्रक्षालनाच्छुद्धिः । विशिष्टमूत्राद्युपहतानामग्नौ प्रतापनाच्छुद्धिः। अश्ममयानां तैजसादिवच्छुद्धिः। पात्रभाजनानां बिल्वकपित्थमयानामलाबुपात्राणां वेणुवेत्रकृतानां

कुशादिनिर्मितानां गोमयाद्भिः प्रक्षालनाच्छुद्धिः । व्रीह्यादीनां सतुषद्रव्याणां चाण्डालादि स्पर्शोपहतानां द्रोणन्यून परिमाणानां प्रक्षालनावशोषणाच्छुद्धिः । द्रोणाधिक परिमाणानां प्रोक्षणाच्छुद्धिः । तण्डुलानामुदक्यादिभिः स्पृष्टानां शुद्धपात्रांतरेष्वनयनाच्छुद्धिः । द्रोणन्यूनानामुत्सर्गः । द्रोणाधिकानां स्पृष्टे देशे तावन्मात्रत्यागात्प्रोक्षणाच्च शुद्धिः । चरुपुरोडाशानामुदक्यादिभिर्दृष्टानां त्यागः । पयोदधि घृतादीनामुच्छिष्टसमन्वारब्ध पात्रोपहतानां शुद्धपात्रांतरेष्वानयनाच्छुद्धिः । पयोदधि घृतानामुच्छिष्टोपहतानां त्यागः । शूद्रभाण्डस्थितानां पयोदधि मध्वाज्यादीनां शुद्धपात्रांतरानयनाच्छुद्धिः । आपणस्थ द्रव्याणां विक्रयणाच्छुद्धिः । अग्निहोत्रद्रव्ये तैलसर्पि.पयो दध्यादावुच्छिष्ट समन्वारब्ध पात्रांतरेऽवनीयोदकेन निधायाग्निहोत्रार्थमुपयुंज्यात् । शौचदेश द्रव्यमंत्रवदर्थ संस्कार कालानामष्टानां द्वयोर्द्वयोर्विरोधे पूर्वस्य प्राबल्यं परस्य दौर्बल्यमिति । इति प्रायश्चित्त दीपोक्त द्रव्यशुद्धिः । प्रयोगपरिजाते तु । अथेदानीं कर्मणि प्रयुज्यमानानां पात्रादीनामुच्छिष्टोपहतौ कागतिरित्यपेक्षायां । आचार्यादि निरूपित रीत्या यावदुपयुक्ता शुद्धिरिष्यते । आह आश्वलायनाचार्यः । दारवादिष्वशुद्धेषु यद्वा संस्पर्शनादिभिः । शुद्धिर्भवति तोयेन मृन्मयानां तथाग्निना । आम्लेन शुद्धिस्ताम्रस्य कांस्यानां भस्मना भवेत् । नखसंस्पर्शनाच्छुद्धिरायसानां तु क्षालनात् । स्त्रीशूद्रभुक्तपात्राणि कांस्यादीन्यपि वर्जयेत् । सौवर्णरजतादीनां दाहात्प्रक्षालनाच्छुचिरिति ।। विज्ञानेश्वरोऽपि । सौवर्णरजतताम्रशंखशुक्ति दृषदामुलूखलमुसलचमस प्रोक्षणीपात्रप्रभृतीनां दारुमयानां च शूर्पादीनां च विलेपमुच्छिष्टस्पर्शे

वारिप्रक्षालनाच्छुद्धिः। तथा स्रुक्स्रुवादीनामलेपानां वारिभिः प्रक्षाल्य यथाविधि पुनः संमार्जनाच्छुद्धिः। एतेषां काकादि कृष्णशकुनिमुखावमर्शे निर्लेखनाच्छुद्धिः। मार्जारव्यतिरिक्तश्वा पदमुखावमर्शे परित्यागः। मललेपितानां तु तैजसमण्दश्ममयानां सर्वेषामपि भस्मना मृदावा संघृष्य जलैः प्रक्षालनाच्छुद्धिरिति ॥ इति प्रयोगपारिजातोक्त द्रव्यशुद्धिः ॥ इति श्रीमदारडोपना मकलक्ष्मीधरसूनु नारायणभट्टकृते गृह्याग्निसागरे द्रव्यशुद्धिः ॥

अथास्थिशुद्धिविधिः ॥

गंगातोयेषु यस्यास्थि क्षिप्यते शुभकर्मणः। न तस्य पुनरावृत्ति र्ब्रह्मलोकात्सनातनात् ॥ तथा। अस्तंगते गुरौ शुक्रे तथा मासि मलिम्लुचे। गंगायामस्थिनिक्षेपं न कुर्यादिति गौतमः। दशाहांतर्न दोपः। दशाह्नाभ्यंतरे यस्य गंगातोयेऽस्थि मज्जति। गंगायां मरणं यादृक् तादृक्फलमवाप्नुयात् ॥ इति मदनरत्ने वृद्धमनूक्तेः। शौनकः ॥ शौनकोऽहं प्रवक्ष्यामि अस्थिक्षेपविधिं क्रमात्। आदौ ग्रामाद्बहिर्गत्वा स्नानं कृत्वा सचैलकम्। प्रोक्षयेत्पंचगव्येन भुवं मंत्रैर्विचक्षणः। गायत्र्याद्यैः पंचगव्यमंत्रै र्निखातास्थि भूमिं प्रोक्षेदित्यर्थः। उपसर्पादिभिर्मंत्रैः प्रार्थनं खननं तथा। मृत्तिकोद्धरणं चास्थ्नां ग्रहणं च यथाक्रमम्। उपसर्पचतुर्मंत्रैः क्रमेण प्रार्थनास्वयम्। स्नात्वास्थिशुद्धिं कुर्वीत तत्तन्मंत्रैर्विचक्षणः ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। सभस्ममृदपादीनि मंत्रतः स्नाति वै दश ॥ कुशैः संमार्जये दस्थीन्यतो देवेति मंत्रतः ॥ एतोन्विद्रं शुचीवेति नतमंह इती ति च ॥ पावमानीयमाग्नेयं रुद्रसूक्तं यथाक्रमं। कुशैर्मार्जनं। हेमश्राद्धं ततः कुर्यात्पितृनुद्दिश्य यत्नतः ॥ पिण्डदानं प्रकुर्वीत

ततश्च तिलतर्पणम् ।। अस्थिक्षेपांगवेदं । अजिनं कंबला दर्भा गोकेशा शाणमेव च ।। भूर्जपत्रं ताडपत्रं सप्तधावेष्टनं स्मृतम् । हेमं च मौक्तिकं रौप्यं प्रवालं नीलकं तथा ।। निक्षिपेदस्थि-मध्ये तु शुद्धिर्भवति नान्यथा ।। ततो होमं प्रकुर्वीत तिलाज्येन विचक्षणः ।। उदीरतातु सूक्तेन हुनेदष्टोत्तरं शतम् ।। ततो गत्वा क्षिपेत्तीर्थे स्पर्शदोषो न विद्यते ।। मूत्रं पुरीषाचमनं कुर्वन्नास्थीनि धारयेत् ।। अत्र दशदान वैतरणी ऋणमोक्षणधेनु-दानमुक्तम् । दिवोदासीये । काशीखण्डे । धनंजयोऽपि धर्मात्मा मातृभक्ति परायणः । आदायास्थीन्यथो यातुं गंगामार्गस्थितोऽभवत् । पंचगव्येन संस्नाप्य तथा पंचामृतेन वै । यक्षकर्दमलेपेन लिप्त्वा पुष्पैः प्रपूज्य च । आवेष्टच तत्र वस्त्रेण ततः पीतांबरेण च ।। ततः सुरस वस्त्रेण ततो मांजिष्ठ वाससा । नेपालकंबलेनाथ मृदावाथ विशुद्धया । ताम्रसंपुटकं कृत्वा मातुरंगान्यथा वहन् ।। व्यासः । पट्टवस्त्रं वचो शौर्यं मांजिष्ठं श्वेत वस्त्रकम् ।। कंबलं शाणपट्टं च अजिनं च यथोत्तरम् ।। एषां विकल्पः । अन्यश्चात्र विशेषस्त्रिस्थली सेतौ भट्टाः ।। एवमस्थि शुद्धिः ।। इति श्रीमदारडोपनामकलक्ष्मीधरसूनु नारायण भट्टकृते गृह्याग्निसागरे अस्थिशुद्धि विधिनिरूपणम् । ग्रन्थांतरे तु प्रयोज्य प्रकृतावेव विकल्पेप्याधिकारतः । नायं नियम इत्याहु यथाकामं समाचरेत् ।। श्रीविरूपाक्षेश्वरार्पणमस्तु ।।

इति श्रीगृह्याग्नि सागरः समाप्तः ।।

SANSKRIT VIDYAPEETH
16966
Accession No 10.6.93

CENTRAL SANSKRIT UNIVERSITY

(Under Ministry at Education, Govt. of India)

GURUVAYOOR CAMPUS LIBRARY

Due Date Slip

Title : Grihyagnyagni Sagarah

Author : Sambasivashastri Gokarnam

Acc. No. 16906

This book should be returned to the library on or before the date last stamped. Otherwise over-due charges of ₹1/- per book per day will be collected.

Due date of Return	Due date of Return	Due date of Return

सांबदीक्षितविरचित संस्कृतकाव्यम्

संक्षिप्तकर्नाटकभाषानुवादसहितं

नित्यानन्दचरितम्

मूल्यम् - रू. १-५०

श्री साम्बदीक्षितविरचित

CSUGCKL
Q2:42y8l
1
Acc.No: 16906
16906

…तिप्रादुर्भावः

…म् - रू. २-००

अग्निसहस्रनाम

मूल्यम् - रू. २-००

भूकैलासनाटकम्

मूल्यम् - रू. ६-००

पुस्तकप्राप्तिस्थानम्—

श्री वे. साम्बदीक्षित
गोकर्ण (उ. कन्नड)
कर्नाटक राज्य